Published by PANDIT PANNALAL JAIN Bakaliwal
Secretary Bharatiy Jain Siddhant Prakashini Sanstha *Benares City*
Printed by Babu GAURI SHANKER LAL Manager
Chandraprabha Press Benares City

प्रस्तावना

प्रियमहाभागाः —

येऽचिनिरवधिरिंगकरगजवजवजलनिधिविलसितविविधासुदनकसायूकमजनिनामितभीतिभारचतुरचे तम सुषतर विरहितनिरिम्भसननैकरसभूतानघस्वरूपाल्प कमप्यान्य गवेषमाणा परिधावमा नश्चहरहस्तसगमसमीहयाऽवतरलनुभूतिगोचरता परितो भुवि । पर ग्विपैतामहमरदनादिदुर्वासनानि यितान करणत्वात् धारनाविकल्पतस्वानबोधबहिर्भूतसर्वज्ञमन्यस्वाधिमन्यप्रतारितात्मत्वात् कल्पितविकल्प लोकपवादसमुत्पस्यमानमपाकीर्णत्वाद्धा न नाम चेवयते ते आत्मनीनसरूप सायत्तया । किंतु न तथा विधपक्षपातहा मनस्विन । न वा तेनां पक्षपातो धर्म । अमुभसमष्टिसमीहितपरिपूरणकल्पमहीरहा हि मत समादरणीयतै निहत्य विकल्प विभाव्यात्मनीनमनीषया समीचीन पन्था । विनिमय्यैव समुन्नीयते प्रधानपदवी तात्त्विकात्मस्वरूपप्रतिभासकमिद **समयप्राभृत** ।

समवगानिरिय महती विदुषा यस्तत्त्वावस्थापनेषु सांख्यमीमांसाप्रभृतिनैकविधशास्त्रनिकरेषु समवबोध दनि यथा यथान्येनात्मन स्वरूप परमात्मभार्तिं च वेदांतशास्त्र न तथापर । अवितथ चैतत् यावत भव स्यात्मस्वरूपाविबोध स्वात्मनि, न विरमते तावदनात्मनीनतविनीमृतुसुहृत्सङ्गिरात्मा । आत्मस्वरूपा वगतिरेव वैराग्य तच्च यदि निश्चयति तद्वेदांतशास्त्रमेव कथंचित् ।

भारतव्यतिरिक्त-**इगलैंडा**दिदेशानामपि सङ्कुटौके संप्रति सम्मानसरणी वेदांतशास्त्र । समाविरमा विरत किमप्यधिन् परिषदस्तत्र परितो वेदांतशास्त्रानर्घसिद्धांतप्रसाराय । प्रभाति च नेगुर्यमथनदंडेन तद सघृतसमीहया तच्छास्त्रसिद्धांतधीरमहरहस्ते ।

विभाव्य वेदांतशास्त्रस्य तथाविधविचित्रसम्माननतार्ति, अमत्ल्लरस्वरूपलिलिक्षा च बहलतया पश्च पानबहिर्भूतानां रत्नरहितैविरिगी च सुमनायिनां समुपानीयते कथंकथमपि समाविर्भव्यैतत्समनन्तर तेषां पुरस्तात् । समेति सर्वीचीनतया जानातीति समय आत्मा तस्य प्राभृत शास्त्रमित्यनुगतार्थे विश्वाण नामेद आत्मन एव कृतो विचरोऽत्र शास्त्रे-इति समाविर्भूयते । दिगंबरजैनसमाजे प्राभृतमिद जैनवेदान्तत्वस्य शास्त्रनाम्नया विश्रुत स्वपानवदात्मस्वरूपविवरणशैलीप्रभावात् । नात्र चित्र प्राभृतरचयितु **श्रीमद्भगव त्कुन्दकुन्दस्य** कृतिर्निर्मवस्मततद्विभान्यते । पूर्वं जिनागमत समवगम्यात्मस्वरूप स्वल्पना च पश्चादनुभूय स्वतत्त्वात्मस्वरूपसमास्वादसमीहया क्लेशाद महीयान् प्रयो महता प्रयासेन जनसमुदयहिताय तेन भगवता ।

एतच्छास्त्रसमुपवर्णितसिद्धांता सर्वथा वेदांतशास्त्रसमर्हितसिद्धांतसाम्य प्रतिपद्यते इति तु न शक्नुमो वय प्रतिपादयितु यतो हि—आर्हतसिद्धांते वरीवर्ति नयद्वयमदिष्ट । तत्र नाम्न परकीय दन्ना नात्मजादिवस्तु-आत्मनीनमिति हि शुद्धनिश्चयविषय । परकीयवस्त्वपि कथंचित्सबाधितां विभर्ति घृतकुम्भ दिति व्यवहारविषय । नैतावता प्रय विहाय परवस्त्वेव नास्तीति जैनवेदांतमन । इतरवेदांते च वस्तुनस्तु वस्तु ब्रह्मैव तदपर सकल कल्पित ततो न सामस्त्येन जैनवेदान्तेतरवेदान्तयोरैक्य । सबधमात्रत पर वस्तु नात्मन [ब्रह्मण] परवस्तुन्यात्मत्वाभिमानो मिथ्येति इतरवेदांतसिद्धांतवे सम्मतमेव तज्जैनवेदान्त स्यापि । कियता चिदन्येतरवेदांतसिद्धांतानां विमतत्वेऽपि सम्मतत्वमपि कियता चिदत्र । नत्र सत्ति सकलोपाधिविरहितत्वेनोपासन तु ब्रह्मण इतरवेदांतस्य पुष्णात्येव निष्कल्मष तुल्यत्व जैनवेदांतस्य ।

विशदतया कियतां चित्सिद्धांतानां समन्वाविर्भावाय व्यचारि मया पर नाशक तत्र कनुमहमनवका शतया । मत्कृतसमन्वय एव वा मा तुष्युर्विद्वांस स्वय चोभयोस्तौल्य विनिर्णयास्तुरिति च विनिश्चय्य इत्यपि

नाविरभावि मया तदेतस्मान्यत्र । ततोनिरवद्यानमस्वरूपावजिगमिषवो विद्वांसो नियतं विचारयेयुरेतत्प्राभृतरहस्यमिति सविनय तेषां पुरस्तान्मामकाभ्यर्थना ।

समयप्राभृतसंपादनकाले आदिमस्यांकस्याविर्भावार्थं तात्पर्यवृत्त्यात्मख्यात्योः पुस्तकद्वयस्य कियाधिकार १०८ अभिनवभट्टारक-ईडरस्थ श्रीमद्विजयकीर्तिजीमहाराजैः प्रेषितं, तात्पर्यवृत्तिद्वयं च जैनमित्रसंपादकश्रीमद्ब्रह्मचारिशीतलप्रसादजीमहात्मभिः प्रहितं आत्मख्यातिपुस्तकैकं च सत्यवादिसंपादकसुहृद्वरविद्वद्वर्यश्रीपण्डित—उदयलालजीमहोदयैः समुपलब्धं ततोऽस्म्यहं गरीयानुग्रहभाजनं तेषु त्रिषु महात्मनां विदुषां च। सर्वेहि सांप्रतिकालीनां तथाविधामेव सकलजनताहितकारिणीमनुकंपामिति ।

[illegible] त्रिगाथानां परिच्युतत्वादात्मख्यातौ, समुल्लेखनाच्च तासां तात्पर्यवृत्तौ अकृत किल तात्पर्यवृत्त्यनुरूपमेव पाठक्रमः श्रीसमयप्राभृतस्य ततोमूलपाठस्तात्पर्यवृत्त्यनुसार्येव विभावनीयः । विषयक्रमोऽपि समयप्राभृतस्य तात्पर्यवृत्त्यनुगामी । चतुर्विंशतितमगाथाधस्ताल्लिखितात्मख्यातिर्द्वात्रिंशत्तमाया गाथाया ज्ञातव्या

स्वामिकुन्दकुन्दस्वामिनो जीवनवृत्तं प्राकाशि जैनहितैषिसंपादकपण्डितश्रीनाथूरामजीमहोदयैः तच्च जैनहितैषितस्तदेवेनाविकृत्य समाविर्भावितमत्र । ततोऽस्म्यहमुपकार्यो भूयानुक्तमहा[illegible] ।

[illegible] विद्यमानत्वात् [illegible] संपादनमिसकलो नैमित्तिकभ्रान्त्या वैकल्यतश्च । प्राकाशिषत या, अशुद्धय [illegible] परिमार्ज्य तत्क्षमणीयोऽहं सुविचारचेतोभिर्मनीषिभिरिति [illegible] ।

साश्रयानुचरो
गजाधरलाल

श्रीमद्भगवत्कुंदकुंदाचार्याः ।

प्रियपाठकमहाशयाः—

श्रीमन्महावीरजिनवरपरमनिर्वाणप्रापणानंतरमजनिषत नैकविधागमपयोमरालायमाना आर्हतमतहर्म्यदीपायमानाश्च भुवि गरीयांसोऽनेकविद्वांसः । परं पूज्यतामहत्तयोः परमावधिं तेषु भगवान् श्रीकुंदकुंदाचार्य एव समुपालभत । प्रतिवादिकरिनिकरपंचास्यनायमानैर्गरीयोभिर्विद्वद्भिः समाविरभावि यत्र कुताश्चिदात्मनीनपरिचितिस्तत्र 'वयं भगवत्कुंदकुंदान्वयिनस्तदनुयायिनश्चेति प्रतिपादयद्भिरेव ते सानंदमवाबोधि स्वीयं सौभाग्यं । अद्यत्वेऽपि भगवान् कुंदकुंदः तीर्थप्रवर्तकधर्मसंस्थापकसामान्येनैव दिगम्बरसमाजे मतिदाप्यते । आर्हतमतामन्तस्वतंत्रपवित्रतासंरक्षकत्वं भगवत्कुंदकुंदः एवाभूं मुख्यः । दिगम्बरजैनसंप्रदायस्य बहुतमांगं किल सांप्रतं भगवत्कुंदकुंदजल्पितसरणिशरण एव विभाव्यते, किंतु सत्यप्येव भगवत्कुंदकुंदः क आसीत् ? कदा, क, परमपावनात्मनीनवैदुष्येण भारतभूमिं विभूषयामास ? इति नांशमात्रमपि जानीमो वयं । भक्तिपारवश्यतया तद्विषयं किमपि वृत्तं परिचापयितुं समाश्रयतोऽपि **परंपरासरणिं** भ्रमाकार्णत्वात्तस्य नामकामना कर्तुं फलवती पारयाम । तत परिश्रमतमत्वेऽपि भगवत्कुंदकुंदपरिचयसमाविर्भावाय नियतं विद्वद्भिः सुरदमतिज्ञैर्भवितव्यमिति सनतिं तेषां पुरस्सरमास्माकीनाभ्यर्थना ।

भगवत्कुंदकुंदविषयकं यत्किमपीतिवृत्तं समवाबोधि, समुपानीयते विदुषां पुरस्तात् तदस्माभिरत्र—

नामविचारः

प्राथमिकं प्रधानंचाभिधेयं श्रीमद्भगवत्कुंदकुंदस्य **पद्मनंदीति** । परं विश्रुतिर्बहुलतयाद्यत्वेऽस्य महात्मनः **कोण्डकुंदनाम्ना कुंदकुंदेन** वा । आसीद्वायं **कोण्डकुंडाभिधनगरवास्तव्य**स्ततोऽनुमीयते नागरिकाभिधयैवायमात्मविश्रुतिं प्रत्यपद्यत । कोण्डकुंदेतिकर्णाटकभाषीयं नाम तस्य श्रुतिकटुकतया संस्कृतकविभिः समस्ति परावर्तितं श्रुतिमधुरकुंदकुंदरूपेणेति । श्रीमदिंद्रनंदिसूरिभिर्व्यलेखि स्वविरचितश्रुतावतारग्रंथे

> एवं द्विविधो द्रव्यभावपुस्तकगतः समागच्छन्
> गुरुपरिपाट्या ज्ञातः सिद्धांतः **कोण्डकुंडपुरे** ॥ १९० ॥
> श्रीपद्मनंदिमुनिना सोऽपि द्वादशसहस्रपरिमाणः
> ग्रंथपरिकर्मकर्ता षट्खंडाद्यत्रिखंडस्य ॥ १९१ ॥

अमुना पद्येन श्रीमन्मुनिवरपद्मनंदिवासः **कोण्डकुंडपुर** एव निश्चीयते । अन्येऽपि समभूवन् भूयांस आचार्याः कार्णाटकदेशे, समुपालेभिरे ये स्वनिवासस्थाननाम्नैव भुवि विश्रुतिं यथा **श्रीतुम्बुलूराचार्यः** । प्राथमिकं नाम श्रीमत्तुम्बुलूराचार्यस्य **वर्धनदेव** आसीत् परं तुम्बुलूरग्रामनिवासित्वादयमाचार्यपादो विश्रुतस्तुम्बुलाचार्याभिधया । विलिखितं श्रुतावतारे तदुल्लेखसमये—

'अथ तुम्बुलूरनामाचार्योऽभूत्तुम्बुलूरसद्ग्रामे' इति

नवमे दशमे च **श्रवणबेलगुलशिलालेखे** श्रीमत्कुंदकुंदाचार्यस्य समुल्लेखः खलु पद्मनंदि कुंदकुंदेतिनामद्वितयेनैव कृतः । एवमन्यत्रापि । किंतु नंदिसंघपट्टावल्यामस्य पावनात्मनः कुंदकुंद-वक्रग्रीव-एलाचार्य-गृध्रपिच्छ-पद्मनंदीतिनामपंचकमभाणि —

> ततोऽभवत्पंचसुनामधामा श्रीपद्मनंदी मुनिचक्रवर्ती ।
> आचार्य कुंदकुंदाख्यो वक्रग्रीवो महामतिः ।
> एलाचार्यो गृध्रपिच्छः पद्मनंदीति तन्नुतिः ॥४॥

गृध्रपिच्छ-वक्रग्रीव एलाचार्येति नामत्रिकमन्यदप्यास्ति श्रीमत्कुंदकुंदाचार्यस्येति पट्टावलीस्थपद्यपङ्क्ती नानाम्नामत्र तात्पर्य ।

कुतश्चिदसाधारणकारणसंघातात्तिरोभूतत्वात्पुरातनपट्टावलीनां तत्स्थाने—अनुमानत, कल्पनाव [illegible] पूर्वापरविरुद्धामिलिताकियच्चिरप्राचीनोद्धारैश्चेमा विरचिता सत्यभिनवा पट्टावल्य शतद्विशततीव [illegible]रिकैर्भट्टारकै । तत्र समुपलब्धाधुनिकपट्टावल्य सर्वथा सर्वातिकारणत्वान्न प्रमाणतामञ्चति । नहि [illegible] पट्टावल्यपि तथाभूतैव । एव च तल्लिखितगृध्रपिच्छ इति नाम न भगवत्कुंदकुंदस्वामिन किंतु भगवदुमास्वामिन -उमास्वातेर्वा । अत्र नैकानि प्रमाणानि सति यथा—

> तत्त्वार्थसूत्रकर्तार गृध्रपिच्छोपलक्षित
> वंदे गणींद्रसंजातमुमास्वामिमुनीश्वर ॥ १ ॥

तत्त्वार्थप्रशस्ति

> तस्यान्वये भूविदिते बभूव य पद्मनंदिप्रथमाभिधान
> श्रीकुंदकुंदादिमुनीश्वराख्य सत्संयमादुद्गतचारणर्द्धि ॥ ४ ॥
> अभूदुमास्वातिमुनीश्वरोऽसावाचार्यशब्दोत्तरगृध्रपिच्छ
> तदन्वये तत्सदृशोऽस्ति नान्यस्तात्कालिकाशेषपदार्थवेदी ॥ ६ ॥

४० तम श्रवणबेलगुलशिलालेख

> [illegible] प्रभिदादमूदयदोषा यतिरत्नमाला
> बभौ [illegible]मुनींद्रस्स कुण्डकुण्डोदितचण्डदण्ड ॥१०॥
> अभूदुमास्वातिमुनि पवित्रे वंशे तदीये सकलार्थवेदी
> सूत्रीकृत येन जिनप्रणीत शास्त्रार्थजात मुनिपुंगवेन ॥११॥
> स [illegible] बभार योगी [illegible] गृध्रपक्षान्
> [illegible] मुनि यमाहुराचार्यशब्दोत्तरगृध्रपिच्छ ॥१२॥

नगरतालुकशिलालेख ।

[illegible]—उमास्वामिनो गृध्रपिच्छनाम्नि सति तानि च सर्वाणि तानि [illegible] [illegible] निर्विवादं नाभवन् भगवत्कुंदकुंदस्य गृध्रपिच्छ इति नाम ।

[illegible] वक्रग्रीवनामापि कुन्दकुन्द [illegible] किंतु तत्रान्यत्र [illegible] । [illegible] समुदीरितश्चाय तदुल्लेख —

> [illegible] यथा
> [illegible] भगवत्पादभिधान
> [illegible]
> [illegible]समभिधानेन पदं ॥ इति ॥

[illegible] ।

[illegible]

[illegible] मुनिचंद्र [illegible] [illegible]

[illegible] ।

[illegible] । [illegible] ।

[illegible] । [illegible]

काले गते कियत्यपि ततः पुनश्चित्रकूटपुरवासी
श्रीमानेलाचार्यो बभूव सिद्धान्ततत्त्वज्ञः ॥ १७७ ॥
तस्य समीपे सकलं सिद्धान्तमधीत्य वीरसेनगुरुः
उपरि तमनिबन्धनाद्यधिकारानष्ट च लिलेख ॥ १७८ ॥

कुन्दकुन्द उमास्वामी च ।

कुन्दकुन्दोमास्वामिनोः कः पारम्परिकसम्बन्ध आसीदित्यत्र मतत्रैविध्यम्—उमास्वामिनो गुरुस्स्वामी कुन्दकुन्द इत्येकम् । कुंदकुंद एव शिष्य उमास्वामिन इति द्वितीयम् । तृतीयं कुन्दकुन्द एवोमास्वामीति । परन्तु बहुषु मतेषु [illegible] शिलालेखेषु भगवत्कुन्दकुन्दसमुल्लेखानन्तरेषु भगवदुमास्वामी श्रीकुन्दकुन्दान्वय इति प्रथममतम् । [illegible] उमास्वाम्येव कुन्दकुन्दस्य शिष्य इति संपुष्य समादिरमाति श्रीकुंदकुंदगुरु [illegible] इति [illegible] प्रमाणात् । अनेकेषु ग्रन्थेषु कुन्दकुन्दस्यानुल्लिख्योमास्वामिनः गुरुः तत्पर एव [illegible] इति तृतीय [illegible] निपतति विनयतऽस्माभिः—उमास्वाम्येव कुन्दकुन्दस्य [illegible] मतानुसारादेव [illegible] द्वीतस्येति ।

श्रीमानुमास्वातिरयं यतीशस्तत्त्वार्थसूत्रं प्रकटीचकार ।
यन्मुक्तिमार्गे चरणोद्यतानां पाथेयमर्घ्यं भवति प्रजानां ॥ १ ॥
तस्यैव शिष्योऽजनि गृद्धपिच्छ द्वितीयसंज्ञस्य [illegible] ।
यत्सूक्तिरत्नानि भवन्ति लोके मुक्त्यङ्गनामोहनमण्डनानि ॥ २ ॥

इति पद्यद्वयं यशोधरचरितमभिधायां [illegible] समुद्धृतम् । अमुना पद्यद्वयेन [illegible] [illegible] यदगृद्धपिच्छ इतीदं नाम न भगवदुमास्वामिनः किन्तु [illegible] स च कुन्दकुन्द [illegible] । पद्मावत्यादिनापि च गृद्धपिच्छ इति नाम कुन्दकुन्दस्य [illegible] परन्तु [illegible] । गृद्धपिच्छ [illegible] भगवदुमास्वामिशिष्यस्य तत्त्वार्थात् [illegible] भगवदुमास्वा [illegible] शिष्यत्वेन स । निर्दिश्य चैनं गृद्धपिच्छेतिनाम भगवदुमास्वामिनः । यदि [illegible] तदा भगवदुमास्वामिशिष्यश्चैवेति विभावनीयं ।

कुन्दकुन्द एवोमास्वातिरिति तृतीयमतसमुद्धृतम् [illegible] [illegible] [illegible]—[illegible] परन्तु [illegible] [illegible], [illegible] [illegible] प्रतिपाद्य, अर्थतश्च [illegible] [illegible] [illegible] न हि कुन्दकुन्दोमास्वामिनोरैक्य [illegible]—[illegible] उभयोर्वा गृद्धपिच्छेतिनामसाम्येन [illegible] [illegible] ।

भगवत्कुंदकुंदगुरु

भगवत्कुन्दकुन्दस्य पाठयिता गुरुः क आसीदित्यत्र [illegible]—[illegible] [illegible] यापनयाचार्यनिवासी गुणभद्रस्वामिशिष्य [illegible] भगवान् कुन्दकुन्द [illegible] [illegible] ।

---

१ श्रीमूलसंघऽजनि [illegible] ।
[illegible] ॥ १ ॥
[illegible] ।
[illegible] ॥
२ [illegible]
[illegible]
३ [illegible]

अथ श्रीकुमारनन्दिसैद्धान्तिकदेवशिष्यैः प्रसिद्धकथान्यायेन पूर्वविदेहं गत्वा वीतराग सर्वज्ञसीमंधरस्वामितीर्थंकरपरमदेवं दृष्ट्वा च तन्मुखकमलविनिर्गतदिव्यवर्णश्रवणादवधा रितपदार्थसमूहैर्बुद्धात्मतत्त्वादिसारार्थं गृहीत्वा पुनरप्यागतैः श्रीमत्कुंदकुंदाचार्यदेवैः पद्मनन्द्य परनामधेयैरन्तस्तत्त्वबहिस्तत्त्वगौणमुख्यप्रतिपत्त्यर्थं — अथवा — शिवकुमारमहाराजादिसंक्षेप रुचिशिष्यप्रतिबोधनार्थं विरचिते पञ्चास्तिकायप्राभृतशास्त्रे यथाक्रमेणाधिकारशुद्धिपूर्वकं तात्पर्यार्थव्याख्यानं कथ्यते-

इति श्रीमज्जयसेनाचार्यकरकल्पमहीरुहरचितसमयसारसंस्कृतटीकालिङ्गितगद्यतश्च पद्मनन्द्यपरा- भिधाविभूषितश्रीकुंदकुंदभगवान् कुमारनन्दिसैद्धान्तिदेवशिष्यः प्रकटीकृतः । किंतु सन्दर्भमिदमर्वाची नतमत्वान्न प्रामाणिकीं तथ्यतामवाचति । यतः —

श्रुतावतारे—अर्हद्बलेः पश्चान्माघनन्दिनस्तदनन्तरं च धरसेनाख्यगुरूणां समुल्लेखः कृतः न माघनन्द्यनन्तरं गुणचन्द्रस्य नापि कुमारनन्दिनः । श्रवणवेल्गुलशिलालेखेष्वपि न क्वापि श्रीकुंदकुंद गुरोरुल्लेखो दृष्टिपथमवातरत् किंतु महीपतिचन्द्रगुप्तवर्णनासमनन्तरं कुंदकुंदभगवानेव समुपवर्णितः । प्रारब्धा च गुरुपरंपरा श्रीमत्कुंदकुंदत एव तद्वर्णनायां । नन्दिसंघस्य प्रधानाराधीयः श्रीकुंदकुंद एवाजीग णत, इति न केनापि विजज्ञे क आसीत्कुंदकुंदभगवद्गुरुः [१] स्वरचितग्रंथेष्वपि क्वापि नोल्लेखयाचक्रे कुंद कुंदभगवानात्मनीनं गुरुमिति ।

शिष्यपरंपरा

श्रीमद्भगवत्कुंदकुंदाचार्यः समजनिष्ट नन्दिसंघस्य नंदिगणस्य वा प्राथमिकाचार्यः । समस्ति कश्चित् १११५ तम—ए डी शताब्दिसन्निकृष्टः शिलालेखः । तत्र व्यलेखि विस्तरतया समुल्लेखः श्रीकुंदकुंदशिष्य परंपरायाः । स्थानाभावादप्रकाशयतोऽपि वयं तं, समुद्धारयामः कियन्तं चित्तसारं—

श्रीमत्पद्मनन्दिनोऽपराभिधेयः कुंदकुंद आसीत् । स च समियाय चारणर्द्धिं प्रवरामलचारणमाहा त्म्यात् । समजनि च तस्योमास्वातिः शिष्यः । गृध्रपिच्छाचार्यनाम्नापि स समुपालेभे मुनिः विश्रुतिं । नाभूच्च पद्मनन्द्यन्वये गृध्रपिच्छसमः कश्चिदन्यः प्रखरविद्वान् । तस्य च नैकनरपतिपरिपूजितचरण योर्महतिस्म बलाकपिच्छः शिष्यः । बलाकपिच्छस्यान्तेवासी च तर्कव्याकरणसाहित्यादिनिगमागमवर निधिसमाहितपारो यतिश्च समजनि गुणनन्दिविद्वान् । गुणनन्दिनश्च त्रिशतशिष्याः समभूवन् तेष्वपि कठि- नतममपि विषयं सुलभतया व्याख्यातृत्वात्, प्रमाणतत्त्वानवोद्धृत्वान् सिद्धान्तशास्त्रस्य वेत्तृत्वाच्च समभूत् खिलान्तेवासिशिरोमणिः श्रीदेवेन्द्रविद्वान् । देवेन्द्राचार्यान्तेवासी सिद्धान्तचक्रवर्ती या कामिनीवल्लभश्च बभूव कलधौतनन्दी (कनकनन्दी (?)) तस्य च पुत्रो मदनशंकरो महेन्द्रकीर्तिर्वा समजनि । तच्छिष्यश्च श्रीवीरनन्दी स च कविचूडामणिः, गमकः महावादी, वाग्मी च जातः । इत्यादि ।

तृतीयपत्रगराजरचितशिलालेखेऽपि पद्मनन्दि—उमास्वाति—बलाकपिच्छेत्याचार्यत्रयवर्णनानंतरं स स्तुताः समन्तभद्र—पूज्यपाद—अकलंकप्रभृतयः सूरयः । किंतु न क्वापि समुल्लिलिख समन्तभद्रः किं बलाकपिच्छस्य शिष्य आसीदिति । परं तद्वंशपरंपरायामभूदिति लेख । ४०तम शिलालेखेऽपि यत्र बलाकपि च्छवर्णनानन्तरं समन्तभद्रपूज्यपादौ स्तूयते स्म तत्र समन्तभद्रः —बलाकपिच्छपरंपरायामेव समजनि न तु तच्छिष्य इति सम्यग्विभाति सुस्पष्टतया ।

परन्तु लेखाङ्कितपद्मनन्दि न नन्दिसंघपट्टावलीसमनामवाचति । नन्दिसंघपट्टावल्यास्तु परंपरेयं—उमा स्वाति, लोहाचार्य, यशःकीर्ति, यशोनन्दी, देवनन्दी, (पूज्यपाद) गुणनन्दीत्यादयः । समाम्नात पट्टभेदा द्भवतु भेदः । लेखकैरेव लिखिता वा प्रमाणाभावेऽप्यनुमानतस्तु भ्रम विजिज्ञासिति ? ।

स्थानं ।

इत्थमवगम्यते समनुभूयते-समभूद्भगवान् कुन्दकुन्दः संभाव्यमानकर्णाटकप्रान्तान्तर्गतकोण्डकुण्डपुरे । यतो भद्रबाहुस्वामिसमानकाले समजनि गरीयान् दुष्कालस्तदा, अगाद्विशालसंघो मुनीनां मुनिवरभद्रबाहुना सह कर्णाटकदेशम् । समजनि च तदारभ्य चारित्रशैथिल्यादत्र श्वेताम्बरदिगम्बरविभागः । विनिर्धार्यते च जायमाने किंतु भेदद्वये दिगम्बराचार्यैर्दक्षिणकर्णाटकदेशः श्वेताम्बरैश्च गुर्जरः, उत्तरभारतश्च विचरणस्थलं स्वीयप्रधानस्थानं । किंयत्कालानन्तरं तस्मादेव देशात्समजनि श्रीकुन्दकुन्दभगवान् । अतः कर्णाटकप्रान्त एव नियतमेतन्निवासस्थानं विभाव्यते । श्रीमत्कुन्दकुन्दशिष्या गुणनन्दिदेवेन्द्रादयोऽपि कर्णाटकप्रान्त एव समभूवन्नतोऽपि भगवान् कुन्दकुन्दः कर्णाटकप्रान्तस्थ एव विनिश्चीयते ।

यानि नात्र द्रष्टव्यस्थानानि तानि नेमिनाथमहोदयैर्लिखितानि काचित्कुन्दकुन्दाचार्यविषयिणी कथा ज्ञानप्रबोधाभिधभाषाग्रन्थाधारतः । तत्र प्रकटीचक्रुः श्रीमत्पांगलमहोदयैः कुन्दकुन्दभगवान् मालवप्रान्तान्तर्गतवारापुरवास्तव्यः परंतु कथान्तरस्थानातिरिक्तं वारापुरनिवासित्वे न नियामकं किमप्यनवद्यं गमकं ।

समयविचारः

समवगम्यते किल नन्दिसंघपट्टावलीतो यत् ४९ तमायां वैक्रमशताब्द्यां पट्टारूढोऽभूद्भगवान् कुन्दकुन्दो नन्दिसंघे । स च तदानीं चतुश्चत्वारिंशद्वर्षीयः । एवं च मासदशकपूर्वकैकपञ्चाशद्वर्षाणि संघं संशास्य १०१ तमसंवत्सरसन्निकृष्टे समन्वभूदायुषोऽन्तम् । परंतु विचारनिकषायमाणं विनिर्णीतं किलायं समयकल्पितः सर्वथा कल्पित एव प्रतिभाति ।

जिनवरमहावीरनिर्वाणप्राप्त्यनन्तरं समजनिष्ट ६८३ वर्षपर्यंतमङ्गज्ञानप्रवृत्तिरत्र । अनन्तरं च सा तिरोबभूव इति श्रुतावतारग्रन्थाधारतः समवगम्यते । इत्थं तद्व्यवस्था—

१ इन्द्रभूतिगणधर (केवली)	१२ वर्षाणि
२ सुधर्माचार्य	१२ वर्षाणि
३ जम्बूस्वामी	३८ वर्षाणि
४ विष्णुप्रभृतिपञ्चश्रुतकेवलिन	१०० वर्षाणि
५ विशाखदत्तप्रभृतय एकादशांगदशपूर्वपाठिन	१८३ वर्षाणि
नक्षत्राद्य एकादशांगपाठिन	२२० वर्षाणि
सुभद्राद्य आचारांगपाठिन	११८ वर्षाणि
	६८३

महावीरभगवन्निर्वाणानन्तरं ६८३ वर्षपर्यंतं जागर्ति स्म अंगप्रवृत्तिरिति-हरिवंशपुराणप्रशस्तावपि लिखितमास्ते । यथा—

> त्रयः क्रमात्केवलिनो जिनात्परं द्विषष्टिवर्षान्तरभाविनोऽभवन् ।
> ततः प्र पञ्च समस्तपूर्विणस्तपोधना वर्षशतान्तरे गताः ॥ १ ॥
> त्र्यशीतिके वर्षशते तु रूपयुक् दशैव गीता दशपूर्विणः शते ।

---

१ त्रिलोकसारादिग्रन्थप्रामाण्यात्सुनिश्चितमेतद् ४७ तमवैक्रमसंवत्सरपूर्वे मुमुचे भगवन्महावीर । अयम् विनिर्दिष्टसमयः श्वेताम्बरग्रन्थेष्वपि निश्चितः ।

२ पट्टावलीलेखकमतात्—लोहाचार्यानन्तरभाविनः —अर्हद्बलि-माघनन्दि-भूतबलि-पुष्पदन्ताख्या अल्पांगज्ञानिनः समभूवन् किंतु प्रमाणाभावान्न तथात्र ।

> ३ गुणधरधरसेनान्वयगुर्वोः पूर्वापरक्रमोऽस्माभिः ।
> न ज्ञायते तदन्वयकथकागममुनिजनाभावात् ॥ १५१ ॥

श्रुतावतार ।

द्वये च विंशैगभृतोऽपि पच ते शते च साष्टादशके चतुर्मुनि ॥ २ ॥

आदिपुराणस्य द्वितीयपर्वणि १३९ १५० तमाभ्या पद्याभ्या भगवज्जिनसेनाचार्यैरपि मतमिद पुपुरे। श्रुतग्रथमपीद पराचीनतमत्वात्प्रमाणतम च ततो वीरनिर्वाणानतर ६८३ सवत्सरपर्यंत–अर्थात् २१३ वैक्रम सवत्सरपर्यंतमवीक्रमतभारतेऽगज्ञानप्रवृत्तिरत्र न क्वापि सशीति ।

श्रुतावतारानन्तरत वीरनिर्वाण ६८३-वर्षानतर श्रीदत्त शिवदत्त अर्हद्दत्ता अगपूर्वाणा कियतां चिद ज्ञाना समभूवन् ज्ञातार । तदनंतर समजनि **पुण्ड्रवर्धनपत्तने श्रीमदर्हद्वलि**.–अगपूर्वांशदेशज्ञ । तत श्चांगपूर्वांशदेशज्ञो बभूव माघनंदिमुनि –समाययौ च स स्वर्ग समाधिद्वारेण । तत्पश्चात् कर्मप्राभृतबोध विचक्षणा **धरसेनाचार्यः** समुत्पेदे। स च **भूतवलिपुष्पदंता**वध्यापयामास। शिष्यद्वय चेद कर्मप्राभृतस्य षट्खण्डशास्त्राणि विरचयामास ।

गणधर-यतिवृषभ-उच्चारणाचार्या इति त्रय सूरयोऽपरेऽपि समुत्पेदिरे। तैश्च क्रमश कषायप्राभृतगाथा, चूर्णिका, वृत्तिश्च विलिखिता ।

समग्र च पद्मनंदिमुनि कर्मकषायप्राभृतसिद्धांतद्वय गुरुपरिपाटीत कोण्डकुन्दपुरे । अथात् इन्द्रनंदि सूरिरचितश्रुतावताराद्वचनेन प्रादुरभूद्भगवान् कुदकुद भूतवलि पुष्पदत-उच्चारणाचार्यसमनंतर । पर ना [illegible] यदा ? तथापि निम्नलिखितपद्यात् सुनिश्चित समनुमन्यते प्रतिपादिताचार्यमरणानतर कियद्वर्षा न्तर प्रजग्मदि भगवान् कुदकुद । अन्यथा गुरुपरिपाटीत सिद्धांतद्वितयमवाप कुदकुदप्रभुरिति न प्रतिपादयितु पर्येत । तच्च पद्यमिद—

एव द्विविधो द्रव्यभावपुस्तकगत समागच्छत् ।
गुरुपरिपाट्या ज्ञात सिद्धांत कुडकुन्दपुरे ॥ १६० ॥
श्रीपद्मनदि [illegible]

[illegible] श्रुतावताररचयिता श्रीमदिन्द्रनंदी नाजीगणत् गुणधरधरसेनाचार्ययो पूर्वापरक्रम [illegible] यत गुरुपरिपाटी प्रयवादि तदा सुनिश्चित श्रीमत्कुदकुदसमय । तथा [illegible] दशपूर्वधरेभ्यो दशवर्षान्तरतो भरतमायमान प्रतिपद्य [illegible] प्रादुर्भूता [illegible] । यौ च–अग्रायणीपूर्वांतर्गतपचमवस्तुन [illegible] प्राभृतस्य च ज्ञातारावास्ता ।

[illegible] चरम [illegible] लोहाचार्य । तदनंतर [illegible] ।

[illegible] यदि [illegible]

[illegible] । तदनतर [illegible] भूतवलि पुष्पदत गुणधर-यतिवृषभ उच्चारणाचार्य [illegible]

[illegible] कुदकुद [illegible] ।

[illegible] भगवान् कुदकुद [illegible]

[illegible]

[illegible]

पद्मनन्दिगुरुर्जातो बलात्कारगणाग्रणी
पाषाणघटिता येन वादिता श्रीसरस्वती ।

गुर्वावली—

कुन्दकुन्दगणी येनोर्जयन्तगिरिमस्तके
सोऽवताद्वादिता ब्राह्मी पाषाणघटिता कलौ ।

दर्शनपाहुड

प्रमाणेनानुना विनिश्चीयते भगवत्कुन्दकुन्दस्य पुरस्तादपि जैनधर्मो दिगम्बरश्वेताम्बरेतिभागद्वये विभक्त आसीत् । कुन्दकुन्दविरचितषट्प्राभृतमध्येऽपि श्वेताम्बरसम्प्रदायास्तित्वमाभासते । यथा—

णवि सिज्झइ वत्थधरो जिणसासणे जइ वि होइ तित्थयरो ।
णग्गो विमोक्खमग्गो सेसा उम्मग्गया सव्वे ॥ १ ॥
जइ दंसणेण सुद्धा उत्ता मग्गेण सावि संजुत्ता ।
घोरं चरिय चरित्तं इत्थीसु ण पव्वया भणिया ॥ २ ॥

सूत्रपाहुड

निर्णयमिदमत्र दिगम्बरसम्प्रदाये कदा श्वेताम्बरसम्प्रदायसमुत्पत्तिरभिमता । देवसेनसूरिभिः स्वीय
दर्शनसारग्रन्थे तु गाथेयं प्रकटिता—

एकसये छत्तीसे विक्कमरायस्स मरणपत्तस्स ।
सोरट्ठे वलहीए उप्पण्णो सेवडो संघो ॥ १ ॥

दर्शनसारे यस्य विक्रमस्य मृतेरपि संवत्सरा भवद्भिरनुमन्तव्याः स विक्रमस्य ... इत्यनुमितो वा । जैन ग्रन्थेषु समुल्लीय ... सम्वत्सरयोर्विभिन्नत्वं ... । ततो १३६ तम ... सदा ... शकसंवत्सरे, १३५ ... सम्मिलनेन २७१ तम ... श्वेताम्बरसमुत्पत्तिस्तस्मादपि समजनीति निर्विवादनिश्चय । एवं ... श्वेताम्बरसमुत्पत्तेः ... सुनामतोऽप्र ... भगवत्कुन्दकुन्दसमयः ... । २११ ... स्मरात्पूर्वं तु साधयितुमत्र नार्हति भगवत्कुन्दकुन्दस्याविर्भावसमय ।

श्रीमद्भगवत्कुन्दकुन्दसमयविषये विद्वद्वर्य मदरासनिवासी पाठकमहोदया ... —

कोण्डकुन्दान्वयोदारो गणोऽभूद्भुवनस्तुत तदैतद्विषयविख्यात(?) ... ॥१॥
आसीदतोरणाचार्यस्तस्मिन्निह । तत्राभवत्समस्त ... ॥ २ ॥
पण्डित पुष्पनन्दीति बभूव भुवि विश्रुत । अन्तेवासी मुनेस्तस्य सकलचन्द्रमा इव ॥ ३ ॥
प्रतिदिवसभवद्वृद्धिर्निरस्तदोषो व्यपेतहृदयमल ।
परिभूतचन्द्रबिम्बस्तच्छिष्योऽभूत्प्रभाचन्द्र ॥४॥

अमूनि पद्यानि राष्ट्रकूटवंशोद्भवगोविंदमहाराजसमकालीन ७२४ तम शकसंवत्सरस्य ... लिखितानि प्रमाणानि । तस्यैव गोविंदमहाराजस्य समकालीन ७१९ तम शकसंवत्सरस्य ... ताम्रपत्रे निर्दिष्टानि पद्यानि—

आसीदतोरणाचार्य कोण्डकुन्दान्वयोदय । स देश ... ॥१॥

---

१ णवि सि ... वत्थधरो जिणसासणे ... तित्थयरो ।
णग्गो विमोक्खमग्गो सेसा उम्मग्गया सव्वे ॥ १ ॥
जइ दंसणेण सुद्धा उत्ता मग्गेण सावि संजुत्ता ।
घोरं चरिय चरित्तं ... ण पव्वया भणिया ॥ २ ॥
एकसये छत्तीसे विक्कमरायस्स मरणपत्तस्स
सोरट्ठे वलहीए उप्पण्णो सेवडो संघो ॥१॥

निराकृतमतमोऽरातिं स्थापयन् सत्पथे जनान् । स्वतेजोद्योतितक्षोणिश्चण्डार्चिरिव यो बभौ ॥२॥
तस्याभूत्पुष्पनन्दी तु शिष्यो विद्वान् गणाग्रणी । तच्छिष्यश्च प्रभाचन्द्रस्तस्येयं वसतिः कृता ॥३॥

अमूभिः पद्यैर्निर्णीयते यत् कुन्दकुन्दान्वयि (अ) तोरणाचार्यस्य शिष्यः पुष्पनन्दी तच्छिष्यश्च प्रभाचन्द्रो यदि, ७१९ तम शकसंवत्सरिकस्तदा तोरणाचार्यः ६०० तमायां शकशताब्दौ सिद्ध्यति । अनया दिशा तेषां कुन्दकुन्दान्वयिनां भगवत्कुन्दकुन्दसमयस्तेषां १५० शतोत्तरपंचाशद्वर्षपूर्वं 'अर्थात् ४५० तम सवत्सरे' सिद्ध्यति ।

५०० तमे शकसंवत्सरे शास्ति स्म कश्चित् चालुक्यचक्रवर्ती **कीर्तिवर्ममहाराजः** बादामीनगरे वा वातापीपुरे वा स च विनाशयामास प्राचीनं कदम्बवंशं । अर्थात् ५०० तमशकसंवत्सरात् पंचाशद्वर्षपूर्वं (४५० [illegible]) प्राचीनकदम्बवंशाय श्रीशिवमृगेशवर्ममहाराजो निषेवेस्म राज्यमिति निश्चितिः । [illegible] महाराजप्रतिबोधनार्थं विलिख्य भगवान् कुन्दकुन्दः स्वीयं ग्रंथमिति समाविर्भावितं च पंचास्ति[illegible] कायस्य [illegible] कर्णाटिकसंस्कृतटीकाकारैः **श्रीबालचन्द्रजयसेनाचार्यैः**। ततो युक्त्यानयापि भगवत्कुन्दकुन्दस्य तस्य शिवमृगेशवर्मसमानकालीनत्वात् ४५० तमशकसंवत्सर एव सिद्ध्यति स्वीकारं चास्मिन् [illegible] ।

ग्रंथरचना

भगवत्कुन्दकुन्दस्वामिभिर्विरचिता समस्तग्रंथाः प्राकृतभाषायामेवोपलभ्यन्ते । संस्कृतभाषायामपि [illegible] न किमपि प्रमाणं । तत्काले जनता संस्कृतभाषापेक्षया कठिनतममपि विषयं प्राकृत[illegible] । अत भवन्त्यपि स्वामिनः प्राकृतमेव [illegible] स्वीयपाण्डित्यप्रकटनार्थ [illegible] । इमानि तद्रचितग्रंथरत्नानि—

१ [illegible] २ पंचास्तिकायप्राभृतं ३ प्रवचनसारप्राभृतं ४ षट्प्राभृत–(दर्शनपाहुड–सुत्त[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–भावपाहुड–मोक्षपाहुडेतिषट्पाहुडग्रंथाः) रयणसार बारहाणुवेक्खा [illegible] । [illegible] तु मुद्रितं । सप्तमो नियमसारः संमुद्रितो [illegible] श्रीयुक्त[illegible]प्रसादैः ।

[illegible] महती भगवत्कुन्दकुन्दस्वामिभिर्विरचिता । [illegible] । पर न [illegible] समुपलभ्यते सांप्रतं । [illegible] विरचित [illegible] समुद्धृत उपरि[illegible] । [illegible]

[illegible]—[illegible]—[illegible]सार–[illegible]सार–[illegible]सार–[illegible]सार–[illegible]सार–[illegible]–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–सिद्धांतपाहुड–लोयपाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–जोणिपाहुड–आयारपाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–[illegible]पाहुड–णिमित्तपाहुड–[illegible]पाहुड–[illegible]पाहुड [illegible] ।

[illegible] । [illegible]

[illegible]

* [illegible]

भगवत्कररचितकृतिषु समयसार-पंचास्तिकाय-प्रवचनसारेति त्रिकृतय सत्रप्रधाना । कृतित्रिकमिद च दिगम्बरसमाजे प्राभृतत्रयनाम्ना च विश्रुत । अध्यात्मवेदांतविषय किल जैनधर्मस्य ग्रथत्रय एतस्मिन् समजसतया समुपवर्णित । न चाप्यत्युक्ति स्यात् यदि ग्रथत्रयमिद जैनधर्मस्य जीवत्वेन प्राणत्वेन वाभ्युपगत स्यात् । निश्चयकिलायमस्माक यावन्न कश्चिदध्यैष्यत ग्रथत्रयमिद न प्रत्यपत्स्यत स तावज्जैनधर्मज्ञता ततो जैनधर्मज्ञातृत्वमानिभि सत्समहिमानैश्च नियतमभ्यसनीयमेतद्ग्रथरत्नत्रय ।

टीकाकारौ ।

श्रीमदमृतचन्द्रसूरि —

नात्र सशीति समजनि श्रीमदमृतचद्रा ग्रथकारटीकाकारश्च । परतु पावनात्माय महात्मा कदा ' क ' अननधामनीनवैदुष्येण भारतभूमिं विभूषयामासेति निर्णयाय न षरीवरीति सर्मीपऽस्माक किमपि सुदृढ गमक । केचिदामनति विद्वांसोऽस्य महात्मना दशमशताब्दिकाल पर तत्र पुष्कलप्रमाणाभावान् न स हि प्रमाणतामास्कन्दति । महात्माय स्वकरकलितग्रथषु टीकासु वा स्वनामातिरिक्तमात्मनो गुर्वादिनामापि न विलिलेख यतो भवेत् सुगमता तत्समयादिविनिर्णयाय । ततो दुरधिगम्य एवास्य विदुष समयाभिनिर्णय । पुरुषार्थसिद्ध्युपाय तत्त्वार्थसार , इति ग्रथद्वय स्वातन्त्र्येण तन्निर्मितमवातरति दृष्टिपथ साम्प्रत । भगवत्कुदकुदस्वामिरचितसमयसार-पचास्तिकायसार-प्रवचनसारेतिनाटकत्रयस्य टीकाश्च निस । ताश्च टीका स्वस्वरूपेण भाष्यतामनुकुर्वंति । नात्र सदेह महात्माय तात्त्विकनानानयनिर्णायकवचनरचनाना सम्यग्बोधयति यत्समयसारादिमयदमध्यात्मटीकाकृत्स्तु स ।

विद्यते जैनसमाजे कश्चिदपूर्व किंतूर्ण पचाध्यायी ग्रथ । योऽचिरकालतएव प्रकाशपदवीमुपनीत यस्य चाध्ययनाध्यापनप्रसार समजनि **न्यायवाचस्पति पंडितप्रवरश्रीगोपालदासपावनजीवनमूल्य जैनसिद्धांतमहाविद्यालयमुरैनात** । सोऽप्यस्यैव महात्मन कृतिरिति विनिर्धारितस्तद्वचनाशैलीविलोकनात् विषयप्रतिपादनशैलीदर्शनाच्च । भवितव्य चानवद्यप्रतिभामृतचद्रसूरिकल्पेनैव विदुषा तथाविधगभीरकृतिनिर्माणमिति ।

जयसेनाचार्य

नाम्नानेन किल, समजनिषत नैकविद्वांसो भुवि, तत्र भगवज्जिनसेनाचार्यैरादिपुराणे य सस्तुत स प्रथम । हरिवंशपुराणप्रशस्तौ च य सिद्धांतशास्त्रज्ञत्वेनोपन्यस्त स द्वितीय तृतीयश्च परिवर्तिनवर्ति दुल्लीचद्रप्रतिष्ठापाठप्रणेता । गवेषणायां सत्यामन्येपि मिलिष्यन्ति । ततो न निश्चतु पायत निष्टकं कतमो जिनसेनाचार्यैस्तात्पर्यवृत्तिप्रणता । प्रवचनसारपचास्तिकायसारप्रशस्तौ परिचाययति महात्मायमित्थ-

अज्ञानतमसा लिप्तो मार्गो रत्नत्रयात्मक । तत्प्रकाशसमर्थाय नमोऽस्तु कुमुदेंदवे ॥ १ ॥

सूरि **श्रीवीरसेनाख्यो** मूलसघेऽपि सत्तपा । नैर्ग्रथ्यपदवीं भेजे जातरूपधरोऽपि य ॥ २ ॥

तत **श्रीसोमसेनोऽभूत्** गुणी गुणगणाश्रय । तद्विनेयोऽस्ति यस्तस्मै जयसेनतपोभृत (१) ॥३॥

इतिपद्यत्रयाद्विज्ञायते वीरसेनशिष्य सोमसेनस्तच्छिष्यो जयसेन स च मुनिर्मूलसघीय । अपर श्चैको जयसेन स्वनिर्मितवसुविंदुप्रतिष्ठापाठ परिचाययतीत्थ—

कुदकुदाग्रशिष्येण जयसेनेन निर्मित । पाठोऽय सुधियां सम्यग् वर्तन्म्याद्य योगत ॥१॥

श्रीदक्षिणे कुकुणनामदशे सह्याद्रिणा सगतसीम्नि पूते । श्रीरत्नभूभोपरिदोधचैत्य ज्ञानदराश विद्धनाचिन यत्र

तत्कार्यमुद्दिश्य गुरोरनुज्ञामादाय योल्हापुरवासिहर्षात् दिनद्वय स लिखित ज्ञातज्ञाप्रयमेव मुनर्षिप्र ॥३॥

वसुविंदुरिति प्राहुस्तदादि गुरवो यत । जयसेनापराख्या तत्नम ऽस्तु निर्मितां ॥४॥

प्रथमश्लोकस्थ ' कुन्दकुदाग्रशिष्येणेति विशेषणेनानुमीयते यत् तात्पर्यवृत्तिप्रणतान्नैव जयसेनेन भाव्य । परं कस्मिन् समभूदय मुनिराडिति विनिश्चित्यै नास्ति किमपि निष्कम्पत्र गमक । मुनिनानेन स्वनिर्मितस्तात्पर्यवृत्तौ कियसुचित्स्थलेषु श्रीमदमृतचद्रसूरिटीका वर्णित समुद्धृता ... परावृत्य तात्पर्यमपि यत्र कुत्र चित् ... दमृतचद्रसूरिनिर्दिष्टमेव समुद्घोषित तत समजन्यय महात्मा श्रीमदमृतचद्रसूरेत्तरकालादिति नितरा विभाव्यत ।

निवेदयिता-गजाधरलाल

श्रीसमयप्राभृतस्य शुद्ध्यशुद्धिपत्रम् ।

अशुद्धि	शुद्धि	पृ	पंक्ति
अचलां	अमलां	१	३
प्राप्तां	प्राप्तान	१	३
समयप्राभृतमिद	समयप्राभृतमहो	१	४
सव्वगमिधेयेति	सव्वगाभिधयेति	२	६
णाणट्ठिदेति	णाणट्ठिदेति	,,	१६
नारकेति	नरनारकेति	,,	३७
वर्तत्त	वर्तते	३	१२
अनुगृह्णतो	अनुगृह्णतो	,,	३१
अथ एवैतस्य	अत एवैतस्य	४	२१
स्खलित	च्यवय	,,	२९
चारित्रनस्त्वेन	चारित्रनस्त्वेन	५	१७
गत ।	गत ॥१२॥	७	३१
शेपकाले॥१२॥	शेपकाले ।	,,	३३
अतयो	अनयो	,,	३६
कातस्वर्णेति	कार्तस्वरेति	८	३२
शुभोपयोग	शुभोपयोगे	,,	३६
हेयोपादेयतत्व	हेयापादेयतत्त्व	९	३
परमादितरेति	परमामादितत्त्वेति	१०	४
अवरस्पृष्ठ	अवधस्पृष्ट	,,	२२
पयायमुख्यतया	पर्याय मुख्यतया	११	७
विपार्णाद्दि	विपाणाद्दि	,,	१८
भावार्थ	भावाथ	,,	२७
अपदेश शब्दा	अपदेश शब्दा	१२	२६
स्वरूपमेव	स्वरूप एव	,,	३०
सम्यग्ज्ञनादिक	सम्यग्ज्ञानादिक	,,	३३
अबुद्धाना	अबुद्धानां	१३	१
व्यपच्छेदेन	व्यवच्छेदेन	,,	६
वन्यत्तर	वन्यतर	,,	३५
सो एव	सोचेव	१४	१९
पुण्णं	पुण्ण	१४	२५
अहमेतदेतद	अहमेतदेतदह		
ह्मेतस्यास्मि	मह्येतस्यास्मि	१६	१२
पूनमतदेतत्	पूनमेतत्	,,	२४
अहमिदच	अहमिदं चापि	,,	२४
दव्य	दव्व	१८	४
देहाद्भिन्न	देहाद्भिन्न	,,	५
सव्वण्हुणाणदिट्ठो	सव्वण्हुणाणदिट्ठो	,,	७
ववहारणयो	ववहारणओ	१९	१५
तन्निश्चयेन	तन्निश्चये	२०	९
निश्चयस्तुतिप	निश्चयस्तुति		
रिहार	रिति परिहार	,,	२९
सुखादिमत्वाभानान	सुखादिमत्त्वाभावात्	,,	३३
तृतीता	तृतीया	२२	१७
गाथाचतुष्टये	निश्चये गाथाचतुष्टये	,,	१८
प्रतिबुरद्ध ।	प्रतिबुद्ध	२३	२
प्रतिपत्या	प्रतिपत्त्या	,,	३०
शुद्धात्मस्वरूपस्व	शुद्धात्मस्वरूपस्य	२४	१३
इति	इति ।	,,	१४
लोमेति	लोभेति	,,	१५
दर्शनोपपयोग	दर्शनोपयोग	,,	२३
किंचिव	किंचिवि	२५	१८
किंचिदप्यपत्	किंचिदप्ययत्	,,	२०
त्रिशतगाथापर्यंत	त्रिशद्गाथापर्यंत	२६	१०
पार्श्वदान्	पार्श्वदान्	,,	१७
कमणोकमति	कमनोकर्मेति	२७	१०
कर्मोणभाग	कर्मानुभाग	,,	१२
सयागेणापि	सयागनापि	,,	१६
इतरे	इतर	,,	३२
श्यामिकायाम	श्यामिकापाति		
निरितेनि	रितेति	२८	१९
नवपुराणवस्त्रादि	नवपुराणवस्त्रादि	,,	३१
चिस्वात्रस्य	चित्स्वभावस्य	,,	२७
विदवि	विंदवि	,,	३६

अशुद्धि	शुद्धि	पृ	पंक्ति
जिण	जिणा	२९	१
यथप्यवसानदय	यथप्यवसानादय	,,	११
एव	एष	३०	६
प्रबद्धणेभ्य	द्रव्यगुणेभ्य	३१	१६
अज्झप्पट्ठाण	अज्झप्पट्ठा	३२	७
सति	नसति	३३	३
असणि	असण्णि	,,	१४
तत्रांतरे	तत्रांतरे	३४	२४
दृष्टा	दृष्ट्वा	३५	२६
भव	भवे	३६	२९
प्राप्ता	प्राप्त	३७	३५
जीवो	जीवा	३८	१८
जीवण	जावण	४०	२९
वृत्त	निवृत्त	४२	२७
सकत्वात्	सकलत्वात्	४३	२३
अज्ञानीसज्ञानी	अज्ञानिसज्ञानि		
जावेति	जीवति	४४	६
सज्ञानीजीवति	सज्ञान	४५	२३
ज्ञानी	ज्ञानि	४४	३४
दृश्यते	दृश्यते	४४	३५
पयाये	पर्याये	४७	३९
कर्तृकमभाव	कर्तृकर्मभाव	४८	८
जीवेति	जीवस्य	४९	८
परमप्पाणकुव्वी	परमप्पाणमकुव्वी	५०	१३
स	तव	५०	३५
दृढयति	दृढयति	५१	६
परिणामकम्मणा	परिणामकर्मणा		
करेदिधम्मदि	करेदि धम्मादि	५६	१२
नो इद्धाति	नो इन्द्रचेति		
स्वात्मा	स्वेव	५९	१९
वादीति	वादति	६०	३५
करोत्यस्मन	करोत्यात्मा	६१	१८
सम्मलेवसोऽपि	सम्ममदव	६२	३
सनिरतर	सन्निरतर	६२	२१
सया	यथा	६८	२८
गाथाष्टक	गाथाष्टक	७०	१६
एवमनुदेति	एव ह्युदेति	७०	१८
सत्पदार्थानां	सत्पदार्थानां।	७०	२८

अशुद्धि	शुद्धि	पृ	पंक्ति
ज्ञानीजीवस्वरूप	ज्ञानिजीवस्वरूप	७१	२
मुत्ता	मुइचा	७१	११
मप्पग	मप्पग	७२	१
ज्ञानमयोऽज्ञानति	ज्ञानमयाज्ञानेति	७२	१३
समण	भावस्य	७२	१६
परिणतत्वाजानिन	परिणतत्वाज्ञानिन	७२	२१
ज्ञानमयो	ज्ञानमयो	७२	३१
यद्भवेति	यद्भावेति	७३	३
भावा	ज्ञानत्	७३	२२
ज्ञानमय	अज्ञानमय	,,	२४
समयसारे	समयसार	८०	२७
पुण्यमेवकर्ता, तेन	पुण्यमेवेति तेन	८६	२८
सर्वोऽपि	स सर्वोऽपि	८८	१९
न	सदा न	९१	३१
विभायतो	विभावयतो	९२	२५
दृष्टा	दृष्ट्वा	९९	१२
दिट्ठ	दिट्ठ	९५	१०
किं बूयात	किं ब्रूयात्।	,,	२५
प्रत्यया कारण	प्रत्यया कारण	९७	२९
उपयोग प्रयोग	उपयोगप्रायोग्य	१०२	११
प्रकृति	प्रकृति	१०३	७
शुद्धोमपादेयत्वे	शुद्धस्योपादेयत्व	१०४	२२
प्रकृति	प्रकृति	१०५	३१
कर्पेत	कथ्यत	१०७	२७
महसहावा	महमहावा	११०	२९
यदरेदकभावी	यदरेदकभावी	११२	१२
अपरिग्रहा	अपरिग्रह	११८	५
णाइ	णाइ	१२०	१०
मूल	मूल।	१३०	६
मूख	मूढ	,	२६
इच्छदि	इच्छदि	१३१	२१
समादिट्ठी	सम्मादिट्ठी	१३४	५
एव	एव	१३०	१८
आउन	आउण	१३१	७
इच्छदि	इच्छदि	१३१	६
इच्छ	इच्छ	१३०	१३
दुक्खिदेदि	दुक्खिदेहि	१३८	१

अशुद्धि	शुद्धि	पृ	पंक्ति
पापादयेन	पापोदयेन	१३९	१३
सक्र	शक्र	१४१	२१
आधाक्रमाया	आधाकर्माया	१४५	२
शद्धेन	शब्देन	१४७	२५
वण्गिदो	वण्णिदो	१४८	२२
निमित्तत्तापत्तो	निमित्तत्तापत्तौ	१४९	२०
पुगालद्व्वस्स	पुग्गलदव्वस्स	,,	२६
तत्पर्यवृत्ति	तात्पर्यवृत्ति	१५१	९
सर्विकल्पमच	सविकल्पमत्र	१५२	१०
सद्भावेऽपि	सद्भावेऽपि	,,	१४
पूर्वे	पूर्वे	१५२	२१
क्रिमपदेव	किमयमेव	१५२	२२
यथ	यथा	१५४	१६
सवविशुद	सवविशुद्ध	१५६	१४
[illegible]	नातिक्रमति	१५६	१६
भवति	भ्रमति	१५७	१७
[illegible]	[illegible]	,,	१९
कन	कन	,,	३१
[illegible]	[illegible]	१५८	१५
[illegible]	परिहार	१५९	८
[illegible]	[illegible]	१५९	२४
[illegible]	[illegible]	१६०	२१
स्वीकीयगुणै	स्वकीयगुणै	१६१	२४
कम्मफळं	कम्मफळ	१६३	११
भाक्तृत्वभावं	भोक्तृत्वभाव	१६५	१०
सहाररूपण	सहाररूपेण	१६६	१४
दोह्र	दोह्र	१६९	१७
निपयातरे	विषयांतरे	१७१	३१
तषामाक्षेव कृत	तासामाक्षेप कृत	१७१	३२
स्वनिदाद्य	स्वविदाद्य	१७६	१९
चेम	चेत्	१७६	३३
सख्योपदेश	सात्योपदेश	,,	३७
रागादि	रागादी	१७९	१२
यथा	यथा	१८४	१७
तत्त्वार्थाश्रद्धानेति	तत्वार्थश्रद्धानेति	१८५	१७
व्यख्यानमुख्यत्वेन	व्याख्यानमुख्यत्वेन	,,	२८
पर्यायपु	पर्यायेषु	१८६	१
स्वम्पशो	स्वाम्यशी	१८७	९
अपात्र।	अथात्र	१९३	१८
शाममयस्य	शर्ममयस्य	२०१	१९
पद्मपयोगेन	षट्सपयोगेन	२०३	७
जानानि	जानाति	२०४	९
समारणा	ससारिणा		
मुष्ठो	सुष्टु	२११	१९

श्रीसमयप्राभृतस्य विषयानुक्रमणिका ।

जीवाजीवाधिकारः

प्रथमरङ्ग

स्वभावमहितत्वेन अनुपमा। एवं पूर्वार्द्धेन नमस्कारं कृत्वा परार्द्धेन सम्बन्धाभिधेयप्रयोजनान्यूचनार्थं प्रतिज्ञां क
वक्ष्यामि किं **समयपाहुड** समयप्राभृतं सम्यक् अय बोधो यस्य स भवति समय आत्मा। अथवा सम
भावेनायनं गमनं समयः। प्राभृतं सारं सारः शुद्धावस्था। समयस्यात्मनः प्राभृतं समयप्राभृतं। अथवा
यएव प्राभृतं समयप्राभृतं। **इण** इदं प्रत्यक्षीभूतं **ओ** अहो भव्याः कथंभूतं **सुदकेवलीभणिद** प्र
एक्षणवत्त्वकेवलीशब्ददीर्घत्वं। श्रुते परमागमे केवलिभिः सर्वज्ञैर्भणितं श्रुतकेवलिभणितं। अथवा श्रु
लिभणितं गणधरदेवकथितमिति। सम्बन्धाभिधेयप्रयोजनानि कथ्यंते। व्याख्यानं वृत्तिग्रंथः व्याख्येय
ख्यानतत्प्रतिपादकसूत्रमिति। तयोस्सम्बन्धो व्याख्यानव्याख्येयसम्बन्धः। सूत्रमभिधानं सूत्रार्थोऽभिधेय
सम्बन्धोऽभिधानाभिधेयसम्बन्धः। निर्विकारस्वसंवेदनज्ञानेन शुद्धात्मपरिज्ञानं प्राप्तिवा प्रयोजनमित्यभिप्राय
अथ गाथापूर्वार्द्धेन स्वसमयमपरार्द्धेन परसमयं च कथयामीत्यभिप्रायं मनसि सम्प्रधार्य सूत्रमिदं निरूप

आत्मख्याति ।

नमः समयसाराय स्वानुभूत्या चकासते।
चित्स्वभावाय भावाय सर्वभावांतरच्छिदे ॥ १ ॥
अनंतधर्मणस्तत्त्वं पश्यंती प्रत्यगात्मनः।
अनेकांतमयी मूर्तिर्नित्यमेव प्रकाशतां ॥ २ ॥
परपरिणतिहेतोर्मोहनाम्नोऽनुभावा-
दविरतमनुभाव्यव्याप्तिकल्माषितायाः।
मम परमविशुद्धिः शुद्धचिन्मात्रमूर्ते-
र्भवतु समयसारव्याख्ययैवानुभूते ॥ ३ ॥

अथ सूत्रावतारः **वंदित्तु** इत्यादि—

अथ प्रथमत एव स्वभावभावभूततया ध्रुवत्वमवलंबमानामनादिभावांतरपरपरिवृत्तिविश्रांतिवशेना
मुपगतामखिलोपमानविलक्षणाद्भुतमाहात्म्यत्वेनाविद्यमानौपम्यामपवर्गसंज्ञिकां गतिमापन्नान् भगवतः स
द्धान् सिद्धत्वेन साध्यस्यात्मनः प्रतिच्छंदस्थानीयान् भावद्रव्यस्तवाभ्यां स्वात्मनि परात्मनि च निधायाना
धनश्रुतप्रकाशितत्वेन निखिलार्थसार्थसाक्षात्कारिश्रुतकेवलिप्रणीतत्वेन श्रुतकेवलिभिः स्वयमनुभवद्भिर
तत्वेन च प्रमाणतामुपगतस्यास्य समयप्रकाशकस्य प्राभृताह्वयस्यार्हत्प्रवचनावयवस्य स्वपरयोरनादिमो
णाय भाववाचा द्रव्यवाचा च परिभाषणमुपक्रम्यते ॥१॥ तत्र तावत्समयएवाभिधीयते—

जीवो चरित्तदंसणणाणट्ठिद तं हि ससमयं जाण।
पुग्गलकम्मुवदेसट्ठिदं च तं जाण परसमयं ॥ २ ॥

जीवश्चारित्रदर्शनज्ञानस्थितस्तं हि स्वसमयं जानीहि।
पुद्गलकर्मप्रदेशस्थितं च तं जानीहि परसमयं ॥ २ ॥

तात्पर्यवृत्तिः —**जीवो चरित्त** इत्यादि—**जीवो** शुद्धनिश्चयेन शुद्धबुद्धैकस्वभावनिश्चयप्राणेन
शुद्धनिश्चयेन क्षायोपशमिकाशुद्धभावप्राणैरसद्भूतव्यवहारेण यथासंभवद्रव्यप्राणैश्च जीवति जी
जीवितपूर्वो वा जीवः। **चरित्तदंसणणाणट्ठिद तं हि ससमयं जाण** स च जीवश्चारित्रदर्शनज्ञान
यदा भवति तदा काले तमेव जीवं हि स्फुटं स्वसमयं जानीहि। तथा हि—विशुद्धज्ञानदर्शनस्वभा
परमात्मनि यद्रुचिरूपं सम्यग्दर्शनं तत्रैव रागादिरहितस्वसंवेदनं ज्ञानं तथैव निश्चलानुभूतिरूपं
चारित्रमित्युक्तलक्षणं निश्चयरत्नत्रयेण परिणतजीवपदार्थं हे शिष्य स्वसमयं जानीहि। **पुग्गलकम्मुवदेस**
च तं जाण परसमयं पुद्गलकर्मोपदेशस्थितं च तमेव जानीहि परसमयं। तद्यथा—पुद्गलकर्मोदयेन जी
नारकादिपर्यायरूपेण संज्ञा पूर्वोक्तनिश्चयरत्नत्रयाभावात्तत्र यदा स्थितो भवत्ययं जीवस्तदा तं जीवं प

अनेहोऽपि [illegible] ॥२॥ अथ स्वगुणैकत्वनिश्चयगतशुद्धात्मैवोपादेयः कर्मबंधेन सहैकत्व [illegible] इति। अथवा [illegible] एव शुद्धात्मनः स्वरूपं न पुनः परसमय इत्यभिप्रायं मनसि धृत्वा। अथवास्य [illegible] सूत्रमिदमुचितं भवतीति निश्चय [illegible] सूत्र प्रतिपादयतीति पातनिकालक्षणं सर्वत्र ज्ञातव्यं ।

आत्मख्याति — योऽयं नित्यमेव परिणामात्मनि स्वभावे अवतिष्ठमानत्वात् उत्पादव्ययध्रौव्यैक्यानुभूति लक्षणया सत्तयानुस्यूतश्चैतन्यस्वरूपत्वान्नित्योदितविमलदृशिज्ञप्तिज्योतिरनन्तधर्माधिरूढैकधर्मित्वादुद्योतमानद्रव्यत्वः क्रमाक्रमप्रवृत्तविचित्रभावस्वभावत्वादुत्संगितगुणपर्यायः स्वपराकारावभासनसमर्थत्वादुपात्त वैश्वरूप्यैकरूपः प्रतिनियतविशिष्टावगाहगतिस्थितिवर्तनानिमित्तरूपित्वाभावादसाधारणचिद्रूपतास्वभावसद्भावा च्चाकाशधर्माधर्मकालपुद्गलेभ्यो भिन्नोऽत्यंतमनंतद्रव्यसंकरेऽपि स्वरूपादप्रच्यवनात् टंकोत्कीर्णचित्स्वभावो जीवो नाम पदार्थः स समयः । समयत एकत्वेन युगपज्जानाति गच्छति चेति निरुक्तेः । अयं खलु यदा सकल भावस्वभावभासनसमर्थविद्यासमुत्पादकविवेकज्योतिरुद्गमनात्समस्तपरद्रव्यात्प्रच्युत्य दृशिज्ञप्तिस्वभावनियतवृत्ति रूपात्मतत्त्वैकत्वगतत्वेन वर्तते तदा दर्शनज्ञानचारित्रस्थितत्वात्स्वमेकत्वेन युगपज्जानन् गच्छंश्च स्वसमय इति । यदा त्वनाद्यविद्याकंदलीमूलकंदायमानमोहानुवृत्तितंत्रतया दृशिज्ञप्तिस्वभावनियतवृत्तिरूपादात्मतत्त्वा त्प्रच्युत्य परद्रव्यप्रत्ययमोहरागद्वेषादिभावैकगतत्वेन वर्तते तदा पुद्गलकर्मप्रदेशस्थितत्वात्परमेकत्वेन युगपज्जा नन् गच्छंश्च परसमय इति प्रतीयते । एवं किल समयस्य द्वैविध्यमुद्धावति ॥२॥ अथैतद्बाध्यते—

एयत्तणिच्छयगदो समओ सव्वत्थ सुंदरो लोगे ।
बंधकहाएयत्ते तेण विसंवादिणी होदि ॥३॥

एकत्वनिश्चयगतः समयः सर्वत्र सुंदरो लोके ।
बंधकथैकत्वे तेन विसंवादिनी भवति ॥३॥

तात्पर्यवृत्तिः —**एयत्तणिच्छयगदो** स्वकीयशुद्धगुणपर्यायपरिणतः, अभेदरत्नत्रयपरिणतो वा एकत्व निश्चयगतः **समओ** समयशब्देनात्मा, यस्मादेवात्मा सम्यगयते गच्छति परिणमति यान् स्वकीयगुणपर्यायानिति व्युत्पत्तेः । **सव्वत्थसुंदरो** सर्वत्र समीचीनः क **लोगे** लोके अथवा सर्वत्रेंद्रियाद्यवस्थासु शुद्धनिश्चय नयेन शुद्ध उपादेय इति। **बंधकहा** कर्मबंधजनितगुणस्थानादिपर्याया । **एयत्ते** एकत्वे तस्मिन् या बंधकथा प्रवर्तते **तेण** तेन पूर्वोक्तजीवस्वभावेन सह सा **विसंवादिणी** विसंवादिनो कार्यं विसंवादिणी विसंवादिनीकथा प्राकृतलक्षणबलात् पुल्लिंगे स्त्रीलिंगनिर्देशः । विसंवादिनी असत्या [illegible] भवति । शुद्धनिश्चयनयेन शुद्धजी वस्वरूपं न भवतीत्यर्थः । तत्र स्थितं स्वसमयस्वरूपमिति ॥ ॥ अथैकत्वपरिणत शुद्धात्मस्वरूप सुलभं न भवतीत्याख्याति—

आत्मख्याति —समयशब्देनात्र सामान्येन सर्व एवार्थोऽभिधीयते । समयत एकीभावेन स्वगुणप र्यायान् [illegible] ते सर्वत्रापि [illegible] मान [illegible] यावन्तः [illegible] ते सर्व एव स्वकीयद्रव्यान्तर्मग्नानन्तस्वधर्मचक्रचुम्बिनः [illegible] परस्परमचुम्बन्तः [illegible] नित्यमेव स्वरूपाद पतन्तः पररूपेणापरिणमनादविनष्टानन्तव्यक्तित्वात् टङ्कोत्कीर्णा इव [illegible] समस्तविरुद्धाविरुद्ध [illegible] शश्व द्विश्वमनुगृह्णन्तो नियतमेकत्वनिश्चयगतत्वेनैव सौन्दर्यमापद्यन्ते । प्रकारान्तरेण सर्वसङ्करादिदोषापत्तेः । एवमेकत्वे सर्वार्थानां प्रतिष्ठिते सति जीवाह्वयस्य समयस्य बन्धकथाया एव विसंवादापत्तिः । कुतस्तन्मूल पुद्गलकर्मप्रदेशस्थितत्वमूलपरसमयत्वोत्पादितमेतस्य द्वैविध्यं । अतः समयस्यैकत्वमेव सिद्धं ॥३॥ अथैतद सुलभत्वेन विभाव्यते

जह णवि सक्कमणज्जो अणज्जभासं विणा दु गाहेदुं।
तह ववहारेण विणा परमत्थुवदेसणमसक्कं ॥८॥

यथा नापि शक्योऽनार्योऽनार्यभाषां विना तु ग्राहयितुं।
तथा व्यवहारेण विना परमार्थोपदेशनमशक्यं ॥८॥

तात्पर्यवृत्तिः –जह णवि सक्कं यथा न शक्यः कोसौ अणज्जो अनार्यो म्लेच्छः। किं कर्तुं गाहेदुं अर्थग्रहणरूपेण संबोधयितुं। कथं अणज्जभासं विणा अनार्यभाषां म्लेच्छभाषां तां विना। दृष्टांतो गतः। इदानीं दार्ष्टांतमाह–तह तथा ववहारेण विणा व्यवहारनयं विना परमत्थुवदेसणमसक्कं परमार्थोपदेशनं कर्तुमशक्यं इति। अयमत्राभिप्रायः। यथा कश्चिद्ब्राह्मणो यतिर्वा म्लेच्छपल्ल्यां गतः तेन नमस्कारे कृते सति ब्राह्मणेन यतिना वा स्वस्तीति भणिते स्वस्त्यर्थमविनश्वरत्वमजानन्सन् निरीक्षते मेष इव। तथायमज्ञानी जनोप्यात्मेति भणिते सत्यात्मशब्दस्यार्थमजानन्सन् भ्रान्त्या निरीक्षत एव। यदा पुनर्निश्चयव्यवहाररूपेण सम्यग्दर्शनज्ञानचारित्राणि जीवशब्दस्यार्थ इति कथ्यते तदा संतुष्टो भूत्वा जानातीति। एवं भा[illegible]व्याख्यानमुख्यतया गाथाद्वयेन द्वितीयस्थलं गतं ॥८॥ अथ पूर्वगाथायां भणितं व्यवहारेण परमार्थः प्रतिपाद्यते तमेवार्थं कथयति–

आत्मख्यातिः –यथा खलु म्लेच्छः स्वस्तीत्यभिहिते सति तथाविधवाच्यवाचकसंबंधावबोधबहिष्कृतत्वान्न किंचिदपि प्रतिपद्यमानो मेष इवानिमेषोन्मेषितचक्षुः प्रेक्षत एव। यदा तु स एव तदेतद्भाषासंबंधैकार्थज्ञेनान्येन तेनैव वा म्लेच्छभाषां समुदाय स्वस्तिपदस्याविनाशो भवतो भवत्वित्यभिधेयं प्रतिपाद्यते तदा सद्य एवोद्यदमंदानंदमयाश्रुझलज्झलल्लोचनपात्रस्तत्प्रतिपद्यत एव। तथा किल लोकोप्यात्मेत्यभिहिते सति यथावस्थितात्मस्वरूपपरिज्ञानबहिष्कृतत्वान्न किंचिदपि प्रतिपद्यमानो मेष इवानिमेषोन्मेषितचक्षुः प्रेक्षत एव। यदा तु स एव व्यवहारपरमार्थपथप्रस्थापितसम्यग्बोधमहारथरथिनान्येन तेनैव वा व्यवहारपथमास्थाय दर्शनज्ञानचारित्राण्यततीत्यात्मेत्यात्मपदस्याभिधेयं प्रतिपाद्यते तदा सद्य एवोद्यदमंदानंदान्तःसुन्दरबंधुरबोधतरंगस्तत्प्रतिपद्यत एव। एवं म्लेच्छस्थानीयत्वाज्जगतो व्यवहारनयोऽपि म्लेच्छभाषास्थानीयत्वेन परमार्थप्रतिपादकत्वादुपन्यसनीयोऽथ च ब्राह्मणो न म्लेच्छितव्य इति वचनाद्व्यवहारनयो नानुसर्तव्यः ॥८॥ कथं व्यवहारस्य प्रतिपादकत्वमिति चेत्।

जो हि सुदेणभिगच्छदि अप्पाणमिणं तु केवलं सुद्धं।
तं सुदकेवलिमिसिणो भणंति लोगप्पदीवयरा ॥९॥
जो सुदणाणं सव्वं जाणदि सुदकेवलिं तमाहु जिणा।
णाणं अप्पा सव्वं जम्हा सुदकेवली तम्हा ॥१०॥

यो हि श्रुतेनाभिगच्छति आत्मानमिमं तु केवलं शुद्धं।
तं श्रुतकेवलिनमृषयो भणंति लोकप्रदीपकराः ॥९॥
यः श्रुतज्ञानं सर्वं जानाति श्रुतकेवलिनं तमाहुर्जिनाः।
ज्ञानमात्मा सर्वं यस्माच्छ्रुतकेवली तस्मात् ॥१०॥

आत्मख्यातिः –[illegible] हि [illegible] श्रुतेन [illegible]
[illegible]
[illegible]
[illegible]

[illegible] । अथ जो सुदणाणमित्यादि-जो य कत्ता सुदणाणं द्वादशांगद्रव्यश्रुतं सव्वं सर्वं परिपूर्णं जाणदि जानाति सुदकेवलिं व्यवहारश्रुतकेवलिनं तमाहु जिणा तं पुरुषं आहुः ब्रुवंति के ते जिनाः सर्वज्ञाः । कस्मादिति चेत् जह्मा यस्मात्कारणात् सुदणाणं द्रव्यश्रुताधारेणोत्पन्नं भावश्रुतज्ञानं आदा आत्मा भवति यथाभूतं सव्वं आत्मसंवित्तिविषयं परसंवित्तिविषयं वा तह्मा तस्मात्कारणात् सुदकेवली द्रव्यश्रुतकेवली स भवतीति । अयमत्रार्थः यो भावश्रुतरूपेण स्वसंवेदनज्ञानेन शुद्धात्मानं जानाति स निश्चयश्रुतकेवली भवति । यस्तु स्वशुद्धात्मानं न संवेदयति न भावयति बहिर्विषयं द्रव्यश्रुतार्थं जानाति स व्यवहारश्रुतकेवली भवतीति । ननु तर्हि स्वसंवेदनज्ञानबलेनास्मिन् कालेपि श्रुतकेवली भवति तन्न यादृशं पूर्वपुरुषाणां शुक्लध्यानरूपं स्वसंवेदनज्ञानं तादृशमिदानीं नास्ति किंतु धर्मध्यानयोग्यमस्तीत्यर्थः । एवं निश्चयव्यवहारश्रुतकेवलिव्याख्यानरूपेण गाथाद्वयेन तृतीयस्थलं गतं ॥९ १०॥ अथ गाथायाः पूर्वार्द्धेन भेदरत्नत्रयभावनामुत्तरार्द्धेनाभेदरत्नत्रयभावनां च प्रतिपादयति—

आत्मख्यातिः—यः श्रुतेन केवलं शुद्धमात्मानं जानाति स श्रुतकेवलीति तावत्परमार्थो यः श्रुतज्ञानं सर्वं जानाति स श्रुतकेवलीति व्यवहारः । तदत्र सर्वमेव तावत् ज्ञानं निरूप्यमाणं किमात्मा किमनात्मा, न तावदनात्मा समस्तस्याप्यनात्मनश्चेतनेतरपदार्थपंचतयस्य ज्ञानतादात्म्यानुपपत्तेः । ततो गत्यंतराभावात् ज्ञानमात्मेत्यायात्यतः श्रुतज्ञानमप्यात्मैव स्यात् । एवं सति यः आत्मानं जानाति स श्रुतकेवलीत्यायाति स तु परमार्थ एव । एवं ज्ञानज्ञानिनो भेदेन व्यपदिशता व्यवहारेणापि परमार्थमात्रमेव प्रतिपाद्यते न किंचिदप्यतिरिक्तं अथ च यः श्रुतेन केवलं शुद्धमात्मानं जानाति स श्रुतकेवलीति परमार्थस्य प्रतिपादयितुमशक्यत्वात् यः श्रुतज्ञानं सर्वं जानाति स श्रुतकेवलीति व्यवहारः परमार्थप्रतिपादकत्वेनात्मानं प्रतिष्ठापयति ॥ ९-१० ॥ कुतो व्यवहारनयो नानुसर्तव्य इति चेत्—

णाणह्मि भावणा खलु कादव्वा दंसणे चरित्ते य ।
ते पुण तिण्णिवि आदा तह्मा कुण भावणं आदे ॥११॥

ज्ञाने भावना खलु कर्तव्या दर्शने चारित्रे च ।
तानि पुनः त्रीण्यपि आत्मा तस्मात् कुरु भावनां आत्मनि ॥११॥

तात्पर्यवृत्तिः—सम्यग्दर्शनज्ञानचारित्रत्रयभावना खलु स्फुटं कर्तव्या भवति । पुनस्त्रीण्यपि निश्चयेनात्मैव यतः कारणात् तस्मात् कुरु भावनां शुद्धात्मनीति ॥११॥ अथ भेदाभेदरत्नत्रयभावनाफलं दर्शयति—

जो आदभावणमिणं णिच्चुवजुत्तो मुणी समाचरदि ।
सो सव्वदुक्खमोक्खं पावदि अचिरेण कालेण ॥१२॥

य आत्मभावनामिमां नित्योद्यतः मुनिः समाचरति ।
स सर्वदुःखमोक्षं प्राप्नोत्यचिरेण कालेन ॥१२॥

तात्पर्यवृत्तिः—यः कर्ता आत्मभावनामिमां नित्योद्यतः सन् मुनिः तपोधनः समाचरति सम्यगाचरति भावयति स सर्वदुःखमोक्षं प्राप्नोत्यचिरेण स्तोककालेनलघु । इति निश्चयव्यवहाररत्नत्रयभावनाभावना-फलव्याख्यानरूपेण गाथाद्वयेन चतुर्थस्थलं गतं । अथ यथा कोपि ब्राह्मणादिविशिष्टजनो म्लेच्छप्रतिबोधनकाल एव म्लेच्छभाषां ब्रूते न च शेषकाले तथैव ज्ञानीपुरुषोप्यज्ञानिप्रतिबोधनकाले व्यवहारमाश्रयति न च शेषकाले ॥१२॥ यस्मादभूतार्थस्त्वादिति प्रकाशयति—

ववहारो भूदत्थो भूदत्थो देसिदो दु सुद्धणओ ।
भूदत्थमस्सिदो खलु सम्मादिट्ठी हवदि जीवो ॥१३॥

१—१ अयं पाठ आत्मख्यातिव्याख्यामध्यस्थः ।

व्यवहारोऽभूतार्थो भूतार्थो दर्शितस्तु शुद्धनयः ।
भूतार्थमाश्रितः खलु सम्यग्दृष्टिर्भवति जीवः ॥१३॥

तात्पर्यवृत्तिः-ववहारो व्यवहारनयः अभूदत्थो अभूतार्थः असत्यार्थो भवति । भूदत्थो भूतार्थः सत्यार्थः देसिदो देशितः कथितः दु पुनः सेसो सुद्धणओ शुद्धनयः निश्चयनयः । तर्हि कन नयेन सम्यग्दृष्टिर्भवतीति चेत् भूदत्थ भूतार्थं सत्यार्थं निश्चयनयं अस्सिदो आश्रितो गतः स्थितः । खलु स्फुटं सम्मादिट्ठी हवदि जीवो सम्यग्दृष्टिर्भवति जीवः इति टीकाव्याख्यानं । द्वितीयव्याख्यानेन पुनः ववहारो अभूदत्थो व्यवहारोऽभूतार्थो भूदत्थो भूतार्थश्च देसिदो देशितः कथितः । न केवलं व्यवहारो देशितः सुद्धणओ शुद्धनिश्चयनयोपि दु शब्दादयं शुद्धनिश्चयनयोपीति व्याख्यानेन भूताभूतार्थभेदेन व्यवहारोपि द्विधा शुद्धनिश्चयाशुद्धनिश्चयभेदेन निश्चयनयोपि द्विधा इति नयचतुष्टयं । इदमत्र तात्पर्यं यथा कोपि ग्राम्यजनः सकर्दमं नीरं पिबति नागरिकः पुनः विवेकीजनः कतकफलं निक्षिप्य निर्मलोदकं पिबति । तथा स्वसंवेदनरूपभेदभावनाशून्यजनो मिथ्यात्वरागादिविभावपरिणामसहितमात्मानमनुभवति सद्दृष्टिजनः पुनरभेदरत्नत्रयलक्षणनिर्विकल्पसमाधिबलेन कतकफलस्थानीयं निश्चयनयमाश्रित्य शुद्धात्मानमनुभवतीत्यर्थः ॥१३॥ अथ पूर्वगाथायां भणितं भूतार्थनयाश्रितो जीवः सम्यग्दृष्टिर्भवति । अत्र तु न केवलं भूतार्थो निश्चयनयो निर्विकल्पसमाधिरतानां प्रयोजनवान् भवति । किंतु निर्विकल्पसमाधिरहितानां पुनः षोडशवर्णिकासुवर्णलाभाभावे अधस्तनवर्णिकासुवर्णलाभवत्केषांचित् प्राथमिकानां कदाचित् सविकल्पावस्थायां मिथ्यात्वविषयकषायदुर्ध्यानवंचनार्थं व्यवहारनयोपि प्रयोजनवान् भवतीति प्रतिपादयति-

आत्मख्यातिः—व्यवहारनयो हि सर्व एवाभूतार्थत्वादभूतमर्थं प्रद्योतयति । तथा हि यथा प्रबलपंकसंवलनतिरोहितसहजैकार्थभावस्य पयसोनुभवितारः पुरुषाः पंकपयसोर्विवेकमकुर्वंतो बहवोनच्छमेव तदनुभवंति । केचित्तु स्वकरविकीर्णकतकनिपातमात्रोपजनितपंकपयोविवेकतया स्वपुरुषाकाराविर्भावितसहजैकार्थभावत्वादच्छमेव तदनुभवंति । तथा प्रबलकर्मसंवलनतिरोहितसहजैकज्ञायकभावस्यात्मनोऽनुभवितारः पुरुषा आत्मकर्मणोर्विवेकमकुर्वंतो व्यवहारविमोहितहृदयाः प्रद्योतमानभाववैश्वरूप्यं तमनुभवंति । भूतार्थदर्शिनस्तु स्वमतिनिपातितशुद्धनयानुबोधमात्रोपजनितात्मकर्मविवेकतया स्वपुरुषाकाराविर्भावितसहजैकज्ञायकस्वभावत्वात् प्रद्योतमानैकज्ञायकभावं तमनुभवंति । तदत्र ये भूतार्थमाश्रयंति त एव सम्यक् पश्यंतः सम्यग्दृष्टयो भवंति न पुनरन्ये कतकस्थानीयत्वात् शुद्धनयस्यातः प्रत्यगात्मदर्शिभिर्व्यवहारनयो नानुसर्तव्यः ॥१३॥ अथ च केषांचित्कदाचित्सोपि प्रयोजनवान् । यतः—

सुद्धोसुद्धादेसो णादव्वो परमभावदरिसीहिं ।
ववहारदेसिदो पुण जे दु अपरमे ट्ठिदा भावे ॥१४॥

शुद्धः शुद्धादेशो ज्ञातव्यः परमभावदर्शिभिः ।
व्यवहारदेशितः पुनर्ये त्वपरमे स्थिता भावे ॥१४॥

तात्पर्यवृत्तिः-सुद्धो शुद्धनयः निश्चयनयः कथंभूतः सुद्धादेसो शुद्धद्रव्यस्यादेशः कथनं यत्र स भवति शुद्धादेशः । णादव्वो ज्ञातव्यः भावयितव्यः कैः परमभावदरसीहिं शुद्धात्मभावदर्शिभिः । कस्मादिति चेत् यतः षोडशवर्णिकासुवर्णलाभवदभेदरत्नत्रयस्वरूपसमाधिकाले सप्रयोजनो भवति । निःप्रयोजनो न भवतीत्यर्थः । ववहारदेसिदो व्यवहारेण विकल्पेन भेदेन पर्यायेण दर्शितः कथित इति व्यवहारदर्शितो व्यवहारनयः पुण पुनः अधस्तनवर्णिकसुवर्णलाभवत्प्रयोजनवान् भवति । केषां जे ये पुरुषा दु पुनः अपरमे अशुद्धे असंयतसम्यग्दृष्ट्यपेक्षया श्रावकापेक्षया वा सरागसम्यग्दृष्टिलक्षणे शुभोपयोगे प्रमत्ताप्रमत्तसंयतापेक्षया च भेदरत्नत्रयलक्षणे वा ट्ठिदा स्थिताः कस्मिन् स्थिताः भावे जीव

पदार्थे तेषामिति भावार्थः ॥ एवं निश्चयव्यवहारनयव्याख्यानप्रतिपादनरूपेण गाथाद्वयेन पञ्चमं स्थलं गतम् ॥

इति चतुर्दशगाथाभिः स्थलपञ्चकेन पीठिका समाप्ता ॥

अथ कश्चिदासन्नभव्यः पीठिकाव्याख्यानमात्रेणैव हेयोपादेयतत्त्वं परिज्ञाय विशुद्धज्ञानदर्शनस्वभावं निजस्वरूपं भावयति । विस्तररुचिः पुनर्नवभिरधिकारैः समयसारं ज्ञात्वा पश्चाद्भावनां करोति तद्यथा— विस्तररुचिशिष्यं प्रति जीवादिनवपदार्थाधिकारैः समयसारव्याख्यानं क्रियते । तत्रादौ नवपदार्थाधिकारगाथाया आर्तरौद्रपरित्यागलक्षणनिर्विकल्पसामायिकस्थितानां यच्छुद्धात्मरूपस्य दर्शनमनुभवनमवलोकनमुपलब्धिः संवित्तिः प्रतीतिः ख्यातिरनुभूतिस्तदेव निश्चयनयेन निश्चयचारित्राविनाभावि निश्चयसम्यक्त्वं वीतरागसम्यक्त्वं भण्यते । तदेव च गुणगुणिनोरभेदरूपनिश्चयनयेन शुद्धात्मस्वरूपं भवतीत्येका पातनिका । अथवा नवपदार्था भूतार्थेन ज्ञाताः सन्तस्त एव अभेदोपचारेण सम्यक्त्वविषयत्वाद्व्यवहारसम्यक्त्वनिमित्तं भवन्ति निश्चयनयेन तु स्वकीयशुद्धपरिणाम एव सम्यक्त्वमिति द्वितीया चेति पातनिकाद्वयं मनसि धृत्वा सूत्रमिदं प्ररूपयति ।

आत्मख्यातिः—ये खलु पर्यन्तपाकोत्तीर्णजात्यकार्तस्वरस्थानीयं परमं भावमनुभवन्ति तेषां प्रथमद्वितीयाद्यनेकपाकपरंपरापच्यमानकार्तस्वरानुभवस्थानीयापरमभावानुभवनशून्यत्वाच्छुद्धद्रव्यादेशितया समुद्योतितास्खलितैकस्वभावैकभावः शुद्धनय एवोपरितनैकप्रतिवर्णिकास्थानीयत्वात्परिज्ञायमानः प्रयोजनवान् । अन्ये तु प्रथमद्वितीयाद्यनेकपाकपरंपरापच्यमानकार्तस्वरस्थानीयमपरमं भावमनुभवन्ति तेषां पर्यन्तपाकोत्तीर्णजात्यकार्तस्वरस्थानीयपरमभावानुभवनशून्यत्वादशुद्धद्रव्यादेशितयोपदर्शितप्रतिविशिष्टैकभावानेकभावो व्यवहारनयो विचित्रवर्णमालिकास्थानीयत्वात्परिज्ञायमानस्तदात्वे प्रयोजनवान् तीर्थतीर्थफलयोरित्थमेव व्यवस्थितत्वात् । उक्तं च "जइ जिणमयं पवज्जह ता मा ववहारणिच्छए मुयह । एक्केण विणा छिज्जइ तित्थं अण्णेण उण तच्चं ।"

> उभयनयविरोधध्वंसिनि स्यात्पदाङ्के जिनवचसि रमन्ते ये स्वयं वान्तमोहाः ।
> सपदि समयसारं ते परं ज्योतिरुच्चैरनवमनयपक्षाक्षुण्णमीक्षन्त एव ॥४॥
> व्यवहरणनयः स्याद्यद्यपि प्राक्पदव्यामिह निहितपदानां हन्त हस्तावलम्बः ।
> तदपि परममर्थं चिच्चमत्कारमात्रं परविरहितमन्तः पश्यतां नैष किंचित् ॥५॥
> एकत्वे नियतस्य शुद्धनयतो व्याप्तुर्यदस्यात्मनः पूर्णज्ञानघनस्य दर्शनमिह द्रव्यान्तरेभ्यः पृथक् ।
> सम्यग्दर्शनमेतदेव नियमादात्मा च तावानयं तन्मुक्त्वा नवतत्त्वसन्ततिमिमामात्मायमेकोऽस्तु नः ॥६॥
> अतः शुद्धनयायत्तं प्रत्यग्ज्योतिश्चकास्ति तत् ।
> नवतत्त्वगतत्वेऽपि यदेकत्वं न मुञ्चति ॥७॥

भूदत्थेणाभिगदा जीवाजीवा य पुण्णपावं च ।
आसवसंवरणिज्जरबंधो मोक्खो य सम्मत्तं ॥१५॥

भूतार्थेनाभिगता जीवाजीवौ च पुण्यपापं च ।
आस्रवसंवरनिर्जरा बन्धो मोक्षश्च सम्यक्त्वं ॥१३॥

तात्पर्यवृत्तिः—भूदत्थेण भूतार्थेन निश्चयनयेन शुद्धनयेन अभिगदा अभिगता निर्णीता निश्चिता ज्ञाताः सन्तः के ते जीवाजीवा य पुण्णपावं च आसवसंवरणिज्जरबंधो मोक्खो य जीवाजीवपुण्यपापास्रवसंवरनिर्जराबन्धमोक्षस्वरूपा नव पदार्थाः सम्मत्तं सम्यक्त्वविषयत्वात्कारणत्वाच्च व्यवहारेण सम्यक्त्वं भवन्ति । निश्चयेन परिणाम एव सम्यक्त्वमिति । नव पदार्था भूतार्थेन ज्ञाताः सन्तः सम्यक्त्वं भवन्तीत्युक्तं भवद्भिस्तत्कीदृशं भूतार्थपरिज्ञानमिति पृष्टे प्रत्युत्तरमाह । यद्यपि नव पदार्थाः तीर्थवर्तनानिमित्तं प्राथमिकशिष्यापेक्षया भूतार्था भण्यन्ते तथाप्यभेदरत्नत्रयलक्षणनिर्विकल्पसमाधिकाले अभूतार्था—

२

चिरमिति नवतत्त्वच्छन्नमुन्नीयमान कनकमिव निमग्न वर्णमालाकलापे ।
अथ सततविविक्त दृश्यतामेकरूप प्रतिपदमिदमात्मज्योतिरुद्योतमान ॥८॥

अथैवमेकत्वेन द्योतमानस्यात्मनोऽधिगमोपायाः प्रमाणनयनिक्षेपा ये ते खल्वभूतार्थास्तेष्वप्ययमेक एव भूतार्थः । प्रमाण तावत्परोक्ष प्रत्यक्ष च तत्रोपात्तानुपात्तपरद्वारेण प्रवर्तमान परोक्ष केवलात्मप्रतिनियतत्वेन वर्तमान प्रत्यक्ष च तदुभयमपि प्रमातृप्रमाणप्रमेयभेदस्यानुभूयमानतायां भूतार्थमथ च व्युदस्तसमस्तभेदैकजीवस्वभावस्यानुभूयमानतायामभूतार्थ । नयस्तु द्रव्यार्थिकश्च पर्यायार्थिकश्च तत्र द्रव्यपर्यायात्मके वस्तुनि द्रव्य मुख्यतयानुभावयतीति द्रव्यार्थिक पर्यायमुख्यतयानुभावयतीति पर्यायार्थिक तदुभयमपि द्रव्यपर्याययोः पर्यायेणानुभूयमानतायां भूतार्थ । अथ च द्रव्यपर्यायानालीढशुद्धवस्तुमात्रजीवस्वभावस्यानुभूयमानतायामभूतार्थ । निक्षेपस्तु नाम स्थापना द्रव्य भावश्च । तत्रातद्गुणे वस्तुनि सज्ञाकरण नाम । सोऽयमित्यन्यत्र प्रतिनिधिव्यवस्थापन स्थापना । वर्तमानतत्पर्यायादन्यद्द्रव्य, वर्तमानतत्पर्यायो-भावस्तच्चतुष्टय स्वस्वलक्षणवैलक्षण्येनानुभूयमानतायां भूतार्थ । अथ च निर्विलक्षणस्वलक्षणैकजीवस्वभावस्यानुभूयमानतायामभूतार्थ अथैवममीषु प्रमाणनयनिक्षेपेषु भूतार्थत्वेनैको जीव एव प्रद्योतत ।

उदयति न नयश्रीरस्तमेति प्रमाण क्वचिदपि च न विद्मो याति निक्षेपचक्र ।
किमपरमभिदध्मो धाम्नि सर्वंकषेऽस्मिन्ननुभवमुपयाते भाति न द्वैतमेव ॥ ९ ॥

आत्मस्वभाव परभावभिन्नमापूर्णमाद्यन्तविमुक्तमेक ।
विलीनसकल्पविकल्पजाल प्रकाशयन् शुद्धनयोऽभ्युदेति ॥१०॥

जो पस्सदि अप्पाण अवद्धपुट्ठ अणण्णय णियद ।
अविसेसमसजुत्त त सुद्धणय वियाणीहि ॥१६॥

य पश्यति आत्मान अवद्धस्पृष्टमनन्यक नियत ।
अविशेषमसयुक्त त शुद्धनय विजानीहि ॥१६॥

तात्पर्यवृत्ति — **जो पस्सदि** य कर्ता पश्यति जानाति क **अप्पाण** शुद्धात्मान कथभूत **अवद्धपुट्ठ** द्रव्यकर्मनोकर्मभ्यामसस्पृष्ट जले विसिनीपत्रवत् । **अणण्णय** अनन्यक नरनारकादिपर्यायेषु द्रव्यरूपेण तमेव स्थासकोशकुशूलघटादिपर्यायेषु मृत्तिकाद्रव्यवत् **णियद** नियतमवस्थित निस्तरगोत्तरगावस्थासु समुद्रवत् **अविसेस** अविशेषमभिन्न ज्ञानदर्शनादिभेदरहित गुरुत्वस्निग्धत्वपीतत्वादिधर्मेषु सुवर्णवत् **असजुत्त** असयुक्तमसबद्ध रागादिविकल्परूपभावकर्मरहित निश्चयनयेनोष्णरहितजलवदिति **त सुद्धणय वियाणीहि** त पुरुषमेवाभेदनयेन शुद्धनयविषयत्वात् शुद्धात्मसाधकत्वात् शुद्धाभिप्रायपरिणतत्वाच्च शुद्ध विजानीहीति भावार्थ । अथ द्वितीयगाथायां या पूर्व भणिता शुद्धात्मानुभूति सा चैव निर्विकारस्वसवेदनज्ञानानुभूतिरिति प्रतिपादयति ।

आत्मख्याति —या खल्वबद्धस्पृष्टस्यानन्यस्य नियतस्याविशेषस्यासयुक्तस्य चात्मनोऽनुभूति स शुद्धनय सा त्वनुभूतिरात्मैवेत्यात्मैक एव प्रद्योतते कथ यथोदितस्यात्मनोऽनुभूतिरिति चेद्बद्धस्पृष्टत्वादीनाम भूतार्थत्वात्तथाहि—यथा खलु बिसिनीपत्रस्य सलिलनिमग्नस्य सलिलस्पृष्टत्वपर्यायेणानुभूयमानतायां सलिलस्पृष्टत्व भूतार्थमप्येकान्ततः सलिलास्पृश्य बिसिनीपत्रस्वभावमुपेत्यानुभूयमानतायामभूतार्थ । तथात्मनोऽनादिबद्धस्पृष्टत्वपर्यायेणानुभूयमानतायां बद्धस्पृष्टत्व भूतार्थमप्येकान्तत पुद्गलास्पृश्यमात्मस्वभावमुपेत्यानुभूयमानतायामभूतार्थ । यथा च मृत्तिकाया करककरीरकर्करीकपालादिपर्यायेणानुभूयमानतायामन्यत्व भूतार्थमपि सर्वतोऽप्यस्खलन्तमेक मृत्तिकास्वभावमुपेत्यानुभूयमानतायामभूतार्थ तथात्मनो नारकादिपर्यायेणानुभूयमानतायामन्यत्व भूतार्थमपि सर्वतोऽप्यस्खलन्तमेकमात्मस्वभावमुपेत्यानुभूयमानतायामभूतार्थ । तथा च

परिधेर्वृद्धिहानिपर्यायेणानुभूयमानतायामनियतत्वं भूतार्थमपि नित्यव्यवस्थितं वारिधिस्वभावमुपेत्यानुभूयमानतायामभूतार्थं तथात्मनो वृद्धिहानिपर्यायेणानुभूयमानतायामनियतत्वं भूतार्थमपि नित्यव्यवस्थितमात्मस्वभावमुपेत्यानुभूयमानतायामभूतार्थं। यथा च कांचनस्य स्निग्धपीतगुरुत्वादिपर्यायेणानुभूयमानतायां विशेषत्वं भूतार्थमपि प्रत्यस्तमितसमस्तविशेषकांचनस्वभावमुपेत्यानुभूयमानतायामभूतार्थं तथात्मनो ज्ञानदर्शनादिपर्यायेणानुभूयमानतायां विशेषत्वं भूतार्थमपि प्रत्यस्तमितसमस्तविशेषमात्मस्वभावमुपेत्यानुभूयमानतायामभूतार्थं। यथा चापां सप्तार्चिःप्रत्ययौष्ण्यसमाहितत्वपर्यायेणानुभूयमानतायां संयुक्तत्वं भूतार्थमप्येकांततः शीतस्वभावमुपेत्यानुभूयमानतायामभूतार्थं तथात्मनः कर्मप्रत्ययमोहसमाहितत्वपर्यायेणानुभूयमानतायां संयुक्तत्वं भूतार्थमप्येकांततः स्वयंबोधबीजस्वभावमुपेत्यानुभूयमानतायामभूतार्थं।

न हि विदधति बद्धस्पृष्टभावादयोऽमी स्फुटमुपरितरंतोऽप्येत्य यत्र प्रतिष्ठां।
अनुभवतु तमेव द्योतमानं समंतात् जगदपगतमोहीभूय सम्यक्स्वभावं ॥ ११ ॥
भूतं भांतमभूतमेव रभसान्निर्भिद्य बंधं सुधीर्यद्यंतः किल कोऽप्यहो कलयति व्याहत्य मोहं हठात्।
आत्मात्मानुभवैकगम्यमहिमा व्यक्तोऽयमास्ते ध्रुवं नित्यं कर्मकलंकपंकविकलो देवः स्वयं शाश्वतः ॥१२॥

आत्मानुभूतिरिति शुद्धनयात्मिका या ज्ञानानुभूतिरियमेव किलेति बुद्ध्वा।
आत्मानमात्मनि निवेश्य सुनिष्प्रकंपमेकोऽस्ति नित्यमवबोधघनः समंतात् ॥ १३ ॥

जो पस्सदि अप्पाणं अबद्धपुट्ठं अणण्णमविसेसं।
अपदेससुत्तमज्झं पस्सदि जिणसासणं सव्वं ॥१५॥

यः पश्यति आत्मानं अबद्धस्पृष्टमनन्यमविशेषं।
अपदेशसूत्रमध्यं पश्यति जिनशासनं सर्वं ॥१५॥

तात्पर्यवृत्तिः — **जो पस्सदि** यः कर्ता पश्यति जानात्यनुभवति कं **अप्पाणं** शुद्धात्मानं किंविशिष्टं **अबद्धपुट्ठं** अबद्धस्पृष्टं। अत्र बंधशब्देन संश्लेषरूपबंधो ग्राह्यः। स्पृष्टशब्देन तु संयोगमात्रमिति। द्रव्यकर्मनोकर्मभ्यामस्पृष्टं जले बिसिनीपत्रवत्। **अणण्णं** अनन्यं मृत्तिकाद्रव्यवत्। **अविसेसं** अविशेषमभिन्नं सुवर्णवत्। नियतमवस्थितं समुद्रवत्। असंयुक्तं परद्रव्यसंयोगरहितं निश्चयनयेनोष्णरहितजलवदिति। नियतमसंयुक्तविशेषणद्वयं सूत्रे नास्ति। कथं लभ्यत इति चेत् सामर्थ्यात् तदपि कथं सूत्रप्रकृतमात्मस्वरूपं हि भवति सूत्रार्थं इति वचनात्। स पुरुषः **पस्सदि** पश्यति जानाति किं तत् **जिणसासणं** जिनशासनं जिनमतं **सव्वं** सर्वं द्वादशांगपरिपूर्णं कथंभूतं **अपदेससुत्तमज्झं** अपदेशसूत्रमध्यं अपदिश्यतेऽर्थो येन स भवत्यपदेशः शब्दो द्रव्यश्रुतमिति यावत् सूत्रपरिच्छित्तिरूपं भावश्रुतं ज्ञानसमय इति तेन शब्दसमयेन वाच्यं ज्ञानसमयेन परिच्छेद्यमपदेशसूत्रमध्यं भण्यते इति। अयमत्र भावः यथा लवणखिल्य एकरसोऽपि [illegible] व्यंजनसंयोगेन भिन्नभिन्नास्वादः प्रतिभात्यज्ञानिनां। ज्ञानिनां पुनरेकरस एव तथात्मापि अखंडज्ञानस्वभावोऽपि [illegible] स्पर्शरसगंधशब्दनीलपीतादिविषयज्ञेयपदार्थविषयभेदेनाज्ञानिनां [illegible] भिन्नभिन्नज्ञानरूपः प्रतिभाति ज्ञानिनां पुनरखंडकेवलज्ञानस्वरूप एव इति हेतोः [illegible] शुद्धात्मनि ज्ञाते सति सर्वं जिनशासनं ज्ञातं भवतीति मत्वा समस्तमिथ्यात्वरागादिपरिहारेण [illegible] शुद्धात्मा भावना कर्तव्येति। किं च निश्चयशब्देन [illegible] [illegible] [illegible] इति [illegible]। अत्र सूत्रे [illegible] सम्यग्दर्शनमिति [illegible] शुद्धात्मभावनमेव लभ्यत इति निष्कर्षः।

आत्मख्यातिः — [illegible] अबद्धस्पृष्टस्यानन्यस्य नियतस्याविशेषस्यासंयुक्तस्य चात्मनोऽनुभूतिः सा खल्वखिलस्य जिनशासनस्यानुभूतिः श्रुतज्ञानस्य स्वयमात्मत्वात्। ततो ज्ञानानुभूतिरेवात्मानुभूतिः। किंतु तदानीं सामान्यविशेषाविर्भावतिरोभावाभ्यामनुभूयमानमपि ज्ञानमबुद्धलुब्धानां न स्वदते। तथाहि—यथा

देव संजनमत्रोदेशनामनन्यविशेषैर्भिन्नविभागाभ्यामनुभूयमानं स्वभा लोकानामबुद्धानां
मनुभूयमानं स्वभावं न पुनरन्यसंयोगाद्धव्यनामज्ञानामन्यविशेषैरविर्भावितिराभावाभ्यां । अथ च
च भिन्नविम तेनानुभूयमानं स्वभा सदैव समन्तादविर्भावेनापि तथा विचित्रज्ञेयाकारकरंवितत्वोप
नामन्यविशेषैराभावाविर्भावाभ्यामनुभूयमानं ज्ञानमबुद्धानां ज्ञेयलुब्धानां स्वदते न पुनरन्यसंयोग-
शून्यतायामन्यविशेषैराभावाविर्भावाभ्यां । अथ च यदैव विशेषाविर्भावेनानुभूयमानं ज्ञानं तदैव
सामान्याविर्भावेनानुभूयमानं यथा सैन्धवखिल्यमन्यद्रव्यसंयोगव्यवच्छेदेन केवल एवानुभूयमानं सर्व
तोऽप्येकलवणरसत्वाल्लवणत्वेन स्वदते तथात्मापि परद्रव्यसंयोगव्यवच्छेदेन केवलएवानुभूयमानः सर्वतोप्येक-
विज्ञानघनत्वात् ज्ञानत्वेन स्वदते ।

अखंडितमनाकुलं ज्वलदनंतमंतर्बहिर्महः परममस्तु नः सहजमुद्विलासं सदा ।
चिदुच्छलननिर्भरं सकलकालमालंबते यदेकरसमुल्लसल्लवणखिल्यलीलायितं ॥ १४ ॥
एष ज्ञानघनो नित्यमात्मा सिद्धिमभीप्सुभिः ।
साध्यसाधकभावेन द्विधैकः समुपास्यतां ॥ १५ ॥

आदा खु मज्झ णाणे आदा मे दसणे चरित्ते य ।
आदा पचक्खाणे आदा मे सवरे जोगे ॥१८॥

आत्मा स्फुटं मम ज्ञाने आत्मा मे दर्शने चरित्रे च ।
आत्मा प्रत्याख्याने आत्मा मे संवरे योगे ॥१८॥

तात्पर्यवृत्ति –आदा शुद्धात्मा खु स्फुटं मज्झ मम भवति क्व विषये णाणे आदा मे दसणे
चरित्ते य आदा पच्चक्खाणे आदा मे सवरे जोगे सम्यग्ज्ञानदर्शनचारित्रप्रत्याख्यानसंवरयोगभावना
विषये । योगशब्देनात्र निर्विकल्पसमाधौ परमसामायिके परमध्याने चैकार्थो भावः ज्ञेयस्तस्मिन् ज्ञानदर्शन-
चारित्रादिपरिणते शुद्धात्मनि ध्याते सति सर्वे सम्यग्ज्ञानादिकं सम्भवति इत्यर्थः एवं शुद्धनयव्याख्या-
नमुख्यत्वेन प्रथमस्थले गाथाष्टकं गतं । इत ऊर्ध्वं भेदाभेदरत्नत्रयमुख्यत्वेन गाथात्रयं कथ्यते–तद्यथा–प्रथम
गाथायां पूर्वार्द्धेन भेदरत्नत्रयभावनामुत्तरार्द्धेन चाभेदरत्नत्रयभावनां कथयति–

दसणणाणचरित्ताणि सेविदव्वाणि साहुणा णिच्च ।
ताणि पुण जाण तिण्णिवि अप्पाणं चेव णिच्छयदो ॥१९॥

दर्शनज्ञानचारित्राणि सेवितव्यानि साधुना नित्यं ।
तानि पुनर्जानीहि त्रीण्यप्यात्मानमेव निश्चयतः ॥१९॥

तात्पर्यवृत्ति –दसणणाणचरित्ताणि सेविदव्वाणि साहुणा णिच्च सम्यग्दर्शनज्ञानचारि-
त्राणि सेवितव्यानि साधुना व्यवहारनयेन नित्यं सर्वकालं ताणि पुण जाण तिण्णिवि तानि पुनर्जानी
हि त्रीण्यपि अप्पाणं चेव शुद्धात्मानं चैव णिच्छयदो निश्चयतः शुद्धनिश्चयतः । अयमत्रार्थः–पंचेंद्रिय-
विषयाभिलाषादिरहितनिर्विकल्पसमाधिमध्ये सम्यग्दर्शनज्ञानचारित्रत्रयमस्तीति । अथ गाथाद्वयेन तमेव
अभेदरत्नत्रयभावनां दृष्टांतदार्ष्टांताभ्यां समर्थयति ।

आत्मख्याति –येनैव हि भावेनात्मा साध्यः साधनं च स्यात्तेनैवायं नित्यमुपास्य इति स्वयमा
कूय परेषां व्यवहारेण साधुना दर्शनज्ञानचारित्राणि नित्यमुपास्यानीति प्रतिपाद्यते । तानि पुनस्त्रीण्यपि
परमार्थेनात्मैक एव वस्त्वंतराभावात् यथा देवदत्तस्य कस्यचित् ज्ञानं श्रद्धानमनुचरणं च देवदत्तस्य स्वभा
वानतिक्रमाद्देवदत्त एव न वस्त्वंतरं तथात्मन्यप्यात्मनो ज्ञानं श्रद्धानमनुचरणं चात्मस्वभावानतिक्रमादात्मैव
न वस्त्वंतरं तत आत्मा एक एवोपास्य इति स्वयमेव प्रद्योतते स किल–

यदि स पुद्गलद्रव्यीभूतो जीवत्वमागतमितरत्।
तच्छक्तो वक्तुं यन्ममेदं पुद्गलं द्रव्यं ॥२०॥

तात्पर्यवृत्तिः-अण्णाणेत्यादिव्याख्यानं क्रियते अण्णाणमोहिदमदी अज्ञानमोहितमतिः **मज्झमिणं भणदि पुग्गलं दव्वं** ममेदं भणति पुद्गलं द्रव्यं । कथं भूतं **बद्धमबद्धं च** बद्धं सम्बन्धरूपं अबद्धं च असम्बन्धं देहाद्भिन्नं पुत्रकलत्रादि **तहा** तथा **जीवे** जीवद्रव्ये **बहुभावसंजुत्ते** मिथ्यात्वरागादि बहुभावसंयुक्ते । अज्ञानी जीवो देहपुत्रकलत्रादिकं परद्रव्यं ममेदं भणतीत्यर्थः । इति प्रथमगाथा गता । अथास्य बहिरात्मनः संबोधनं क्रियते रे दुरात्मन् **सव्वण्हु** इत्यादि **सव्वण्हुणाणदिट्ठो** सर्वज्ञज्ञानदृष्टः **जीवो** जीवपदार्थः कथंभूतो दृष्टः **उवओगलक्खणो** केवलज्ञानदर्शनोपयोगलक्षणः **णिच्चं** नित्यं सर्वकालं । **कह** कथं **सो** स जीवः **पुग्गलदव्वीभूदो** पुद्गलद्रव्यं जातः न कथमपि **जं** येन कारणेन **भणसि** भणसि त्वं **मज्झमिणं** ममेदं पुद्गलद्रव्यं । इति द्वितीया गाथा गता । **जदि** इत्यादि-**जदि** यदि चेत् **सो** स जीवः **पुग्गलदव्वीभूदो** पुद्गलद्रव्यं जातः **जीवो** जीवः **जीवत्तं** जीवत्वं **आगदं** आगतं प्राप्तं **इदरं** इतरत् शरीरपुद्गलद्रव्यं **तो सक्का वुत्तुं** तत् शक्यं वक्तुं **जे** अहो अथवा यस्मात्कारणात् **मज्झमिणं पुग्गलं दव्वं** ममेदं पुद्गलद्रव्यमिति । नचैवं यथा वर्षासु लवणमुदकी भवति जलं लवणीभवति । तथा यदि चैतन्यं विहाय जीवद्रव्यं पुद्गलद्रव्यस्वरूपेण परिणमति पुद्गलद्रव्यं च मूर्तत्वमचेतनत्वं विहाय चिद्रूपं चामूर्तत्वं च भवति तदा भवदीयवचनं सत्यं भवति । रे दुरात्मन् न च तथा, प्रत्यक्षविरोधात् । ततो जीवद्रव्यं देहाद्भिन्नममूर्त्तं शुद्धबुद्धैकस्वभावं सिद्धमिति । एवं देहात्मनोर्भेदज्ञानं ज्ञात्वा मोहोदयोत्पन्नसमस्तविकल्पजालं त्यक्त्वा निर्विकारचैतन्यचमत्कारमात्रे निजपरमात्मतत्त्वे भावना कर्तव्येति तात्पर्यं । इत्यप्रतिबुद्धसंबोधनार्थं पंचमस्थले गाथात्रयं गतं ।

अथ पूर्वपक्षपरिहाररूपेण गाथाष्टकं कथ्यते तत्रैकगाथायां पूर्वपक्षः गाथाचतुष्टये निश्चयव्यवहारसमर्थनरूपेण परिहारः । गाथात्रये निश्चयस्तुतिरूपेण परिहार इति षष्ठस्थले समुदायपातनिका । तद्यथा-अप्रतिबुद्धः कश्चिदाह यदि जीवशरीरयोरेकत्वं न भवति तदा तीर्थकराचार्यस्तुतिर्वृथा भवतीत्यप्रतिबुद्धशिष्यः पूर्वपक्षं करोति—

आत्मख्यातिः—युगपदनेकविधस्य बन्धनोपाधेः सन्निधानेन प्रधावितानामस्वभावभावानां संयोगवशाद्विचित्राश्रयोपरक्तः स्फटिकोपल इवात्यन्ततिरोहितस्वभावभावतया अस्तमितसमस्तविवेकज्योतिर्महता स्वयमज्ञानेन विमोहितहृदयो भेदमकृत्वा तानेवास्वभावभावान् स्वीकुर्वाणः पुद्गलद्रव्यं ममेदमित्यनुभवति किलाप्रतिबुद्धो जीवः । अथायमेव प्रतिबोध्यते रे दुरात्मन् आत्मपंसन् जहीहि जहीहि परमाविवेकघस्मरसतृणाभ्यवहारित्वं । दूरनिरस्तसमस्तसंदेहविपर्यासानध्यवसायेन विश्वैकज्योतिषा सर्वज्ञज्ञानेन स्फुटीकृतं किल नित्योपयोगलक्षणं जीवद्रव्यं । तत्कथं पुद्गलद्रव्यीभूतं येन पुद्गलद्रव्यं ममेदमित्यनुभवसि । यतो यदि कथंचनापि जीवद्रव्यं पुद्गलद्रव्यीभूतं स्यात् । पुद्गलद्रव्यं च जीवद्रव्यीभूतं स्यात् तदैव लवणस्योदकमिव ममेदं पुद्गलद्रव्यमित्यनुभूतिः किल घटेत तत्तु न कथंचनापि स्यात् तथा हि—यथा क्षारत्वलक्षणं लवणमुदकीभवत् द्रवत्वलक्षणमुदकं च लवणीभवत् क्षारत्वद्रवत्वसहवृत्त्यविरोधादनुभूयते न तथा नित्योपयोगलक्षणं जीवद्रव्यं पुद्गलद्रव्यीभवत् नित्यानुपयोगलक्षणं पुद्गलद्रव्यं च जीवद्रव्यीभवत् उपयोगानुपयोगयोः प्रकाशतमसोरिव सहवृत्तिविरोधादनुभूयते । तत्सर्वथा प्रसीद विबुध्यस्व स्वद्रव्यं ममेदमित्यनुभव ।

अयि कथमपि मृत्वा तत्त्वकौतूहली सन् अनुभव भवमूर्तेः पार्श्ववर्ती मुहूर्तं ।
पृथगथ विलसन्तं स्वं समालोक्य येन त्यजसि झगिति मूर्त्या साकमेकत्वमोहं ॥२३॥

अथाप्रतिबुद्धः —

---

१ [illegible]।

जदि जीवो ण सरीरं तित्थयरायरियसथुदी चेव ।
सव्वावि हवदि मिच्छा तेण दु आदा हवदि देहो ॥३१॥

यदि जीवो न शरीरं तीर्थकराचार्यसंस्तुतिश्चैव ।
सर्वापि भवति मिथ्या तेन तु आत्मा भवति देहः ॥३१॥

तात्पर्यवृत्तिः —जदि जीवो ण सरीरं हे भगवन् ! यदि जीवः शरीरं न भवति तित्थयरायरियसथुदी चेव तर्हि "द्वौ कुन्देन्दुतुषारहारधवलौ द्वाविन्द्रनीलप्रभौ" इति तीर्थकरस्तुतिः "देसकुलजाइसुद्धा" इत्याचार्यस्तुतिश्च सव्वावि हवदि मिच्छा सर्वापि भवति मिथ्या तेण दु आदा हवदि देहो तेन त्वात्मा भवति देहः । इति पूर्वपक्षरूपेण गाथा गता । हे शिष्य यदुक्तं त्वया तन्न घटते यतो निश्चयव्यवहारनययोः परस्परसाध्यसाधकभावं न जानासि त्वमिति ।

आत्मख्यातिः —यदि य एवात्मा तदेव शरीरं पुद्गलद्रव्यं न भवेत्तदा ।

कान्त्यैव स्नपयन्ति ये दशदिशो धाम्ना निरुन्धन्ति ये धामोद्दाममहस्विनां जनमनो मुष्णन्ति रूपेण ये ।
दिव्येन ध्वनिना सुखं श्रवणयोः साक्षात्क्षरन्तोऽमृतं वन्द्यास्तेऽष्टसहस्रलक्षणधरास्तीर्थेश्वराः सूरयः ॥२४॥

इत्यादिका तीर्थकराचार्यस्तुतिः समस्तापि मिथ्या स्यात् ततो य एवात्मा तदेव शरीरं पुद्गलद्रव्यमिति ममैकान्तिकी प्रतिपत्तिः । नैवं नयविभागानभिज्ञोऽसि—

ववहारणयो भासदि जीवो देहो य हवदि खलु इक्को ।
ण दु णिच्छयस्स जीवो देहो य कदावि एकट्ठो ॥३२॥

व्यवहारनयो भाषते जीवो देहश्च भवति खल्वेकः ।
न तु निश्चयस्य जीवो देहश्च कदाप्येकार्थः ॥३२॥

तात्पर्यवृत्तिः —ववहारणयो भासदि व्यवहारनयो भाषते ब्रूते किं ब्रूते जीवो देहो य हवदि खलु इक्को जीवो देहश्च भवति खल्वेकः ण दु णिच्छयस्स जीवो देहो य कदावि एकट्ठो न तु निश्चयस्याभिप्रायेण जीवो देहश्च कदाचिदप्येकार्थ एको भवति । यथा कनककलधौतयोः समावर्तितावस्थायां व्यवहारेणैकत्वेऽपि निश्चयेन भिन्नत्वं तथा जीवदेहयोरिति भावार्थः । ततः कारणात् व्यवहारनयेन देहस्तवनेनात्मस्तवनं युक्तं भवतीति नास्ति दोषः । तथाहि—

आत्मख्यातिः —इह खलु परस्परावगाढावस्थायामात्मशरीरयोः समवर्तितावस्थायां कनककलधौतयोरेकस्कन्धव्यवहारवद्व्यवहारमात्रेणैवैकत्वं न पुनर्निश्चयतः । निश्चयतो ह्यात्मशरीरयोरुपयोगानुपयोगस्वभावयोः कनककलधौतयोः पीतपाण्डुरत्वादिस्वभावयोरिवात्यन्तव्यतिरिक्तत्वेनैकार्थत्वानुपपत्तेः नानात्वमेव हि निश्चयनयविभागः । ततो व्यवहारनयेनैव शरीरस्तवनेनात्मस्तवनमुपपन्नम् । तथाहि—

इणमण्णं जीवादो देहं पुग्गलमयं थुणित्तु मुणी ।
मण्णदि हु संथुदो वंदिदो मए केवली भयवं ॥३३॥

इदमन्यत् जीवाद्देहं पुद्गलमयं स्तुत्वा मुनिः ।
मन्यते खलु संस्तुतो वंदितो मया केवली भगवान् ॥३३॥

तात्पर्यवृत्तिः —इणमण्णं जीवादो देहं पुग्गलमयं थुणित्तु मुणी इदमन्यद्भिन्नं जीवाद्देहं पुद्गलमयं स्तुत्वा मुनिः । मण्णदि हु संथुदो वंदिदो मए केवली भयवं पश्चाद्व्यवहारेण मन्यते संस्तुतो वंदितो मया केवली भगवानिति । यथा सुवर्णरजतैकत्वे सति शुद्धं सुवर्णमिति व्यवहारो न निश्चयः

चिन्मात्रतया सामान्यविशेषोपयोगात्मकतानतिक्रमणान्नरनारकादिजीवविशेषाजीव... स्वपि स्पर्शादिरूपेण स्वयमपरिणमनात्परमार्थतः सदैवारूपीति प्रत्यगयं स्वरूपं संचेतयमानः प्रतपामि। एवं प्रत्यगतश्च मम बहिर्विचित्रस्वरूपसंपदा विश्वे परिस्फुरत्यपि न किंचनाप्यन्यत्परमाणुमात्रमप्यात्मीयत्वेन प्रतिभाति। यद्भावकत्वेन ज्ञेयत्वेन चैकीभूय भूयो मोहमुद्भावयति स्वरसत एवापुनःप्रादुर्भावाय समूलं मोहमुन्मूल्य महतो ज्ञानोद्योतस्य प्रस्फुरितत्वात्।

मज्जतु निर्भरममी सममव लोका आलोकमुच्छलति शान्तरसे समस्ता।
आप्लाव्य विभ्रमतिरस्करिणीं भरेण प्रोन्मग्न एष भगवानवबोधसिन्धु ॥ ३२ ॥

इति श्रीसमयसारव्याख्यायामात्मख्यातौ पूर्वरंगः समाप्तः।

तात्पर्यवृत्ति —अथानंतरं शृंगारसहितपात्रवज्जीवाजीवावेकीभूतौ प्रविशतः। तत्र स्वच्छन्दं त्रिंशतगाथापर्यंतमजीवाधिकारः कथ्यते। तेषु प्रथमस्थले शुद्धनयेन देहरागादिपरद्रव्यं जीवस्वरूपं न भवतीति निषेधमुख्यत्वेन अप्पाणमयाणंता इत्यादिगाथामादिं कृत्वा पाठक्रमेण गाथादशकपर्यन्तं व्याख्यानं करोति। तत्र गाथादशकमध्ये परद्रव्यात्मवादे पूर्वपक्षमुख्यत्वेन गाथापंचकं तदनंतरं परिहारमुख्यत्वेन सूत्रमेकं। अथाष्टविधकर्मपुद्गलद्रव्यं भवतीति कथनमुख्यत्वेन सूत्रमेकं। ततश्च व्यवहारनयसमर्थनद्वारेण गाथात्रयं कथ्यत इति समुदायपातनिका। तद्यथा। अथ देहरागादिपरद्रव्यं निश्चयेन जीवो भवतीति पूर्वपक्षं करोति।

आत्मख्याति —

जीवाजीवविवेकपुष्कलदृशा प्रत्याययत्पार्षदानासंसारनिबद्धबंधनविधिध्वंसाद्विशुद्धं स्फुटत्।
आत्माराममनंतधाम महसाध्यक्षेण नित्योदितं धीरोदात्तमनाकुलं विलसति ज्ञानं मनो ह्लादयत् ॥३३॥

अप्पाणमयाणंता मूढा दु परप्पवादिणो केई।
जीवं अज्झवसाणं कम्मं च तहा परूविंति ॥४४॥
अवरे अज्झवसाणे सुतिव्वमंदाणुभावगं जीवं।
मण्णंति तहा अवरे णोकम्मं चावि जीवोत्ति ॥४५॥
कम्मस्सुदयं जीवं अवरे कम्माणुभागमिच्छंति।
तिव्वत्तणमंदत्तण गुणेहिं जो सो हवदि जीवो वा ॥४६॥
जीवो कम्मं उहयं दोण्णिवि खलु केवि जीवमिच्छंति।
अवरे संजोगेण दु कम्माणं जीवमिच्छंति ॥४७॥
एवंविहा बहुविहा परमप्पाणं वदंति दुम्मेहा।
ते ण दु परप्पवादी णिच्छयवादीहिं णिद्दिट्ठा ॥४८॥

आत्मानमजानंतो मूढास्तु परात्मवादिनः केचित्।
जीवमध्यवसानं कर्म च तथा प्ररूपयंति ॥४४॥
अपरेऽध्यवसानेषु तीव्रमंदानुभागगं जीवं।
मन्यते तथाऽपरे नोकर्म चापि जीव इति ॥४५॥
कर्मण उदयं जीवमपरे कर्मानुभागमिच्छंति।
तीव्रत्वमंदत्वगुणाभ्यां यः स भवति जीवः ॥४६॥

जीवकर्मोभय द्वे अपि खलु केचिज्जीवमिच्छन्ति ।
अपरे संयोगेन तु कर्मणां जीवमिच्छन्ति ॥४७॥
एवंविधा बहुविधा परमात्मानं वदन्ति दुर्मेधसः ।
ते न परात्मवादिन निश्चयवादिभिर्निर्दिष्टाः ॥४८॥

तात्पर्यवृत्ति —अप्पाणमयाणंता मूढा दु परप्पवादिणो केई [illegible] परद्रव्यमात्मानं वदन्तीत्येवंभूताः केचन परात्मवादिनः जीवं अज्झवसाणं कम्मं च तहा परूविंति पर्यायान्तरात् कार्ष्ण्यं भिन्नं नास्ति तथा रागादिभ्यो भिन्नो जीवो नास्तीति रागाद्यध्यवसानं [illegible] जीव वदन्तीति । अथ अवरे अज्झवसाणे सुतिव्वमंदाणुभावगं जीवं मण्णंति अपरे [illegible] रागाद्यध्यवसानेषु तीव्रमन्दतारतम्यानुभावस्वरूप [illegible] [illegible]। तहा अवरे णोकम्मं चावि जीवात्ति तथैवापरे [illegible] [illegible] भूत्वा शरीरादिनोकर्म चापि जीवं मन्यन्ते । अथ—कम्मस्सुदयं जीवं अवरे अपरे [illegible] मिच्छन्ति कम्माणुभागमिच्छन्ति अपरे च कर्मानुभागं [illegible] । [illegible] तिव्वत्तणमंदत्तणगुणेहिं जो सो हवदि जीवो [illegible] भवतीति । अथ—जीवोकम्मं उहयं दोण्णिवि खलु केवि जीवमिच्छंति [illegible] कर्माणि शिखरिणीवत् खलु स्फुटं जीवमिच्छन्ति । अवरे संयोगेण दु कम्माणं जीवमिच्छंति । अपरे पुनः [illegible] संयोगमपि जीवमिच्छन्ति । [illegible] जीवत्वमनुमन्ते । अथ एवंविहा बहुविहा परमप्पाणं वदंति दुम्मेहा [illegible] देहरागादिपरद्रव्यमात्मानं वदन्ति दुर्मेधसः दुर्बुद्धयः तेण दु परप्पवादी णिच्छयवादीहिं णिद्दिट्ठा [illegible] कारणात् तु पुनः देहरागादिकं परद्रव्यमात्मानं [illegible] निर्दिष्टा इति पञ्चगाथाभिः पूर्वपक्षः कृतः । अथ परिहारं वदति ।

आत्मख्याति —इह खलु [illegible] समजानन्तो बहवो बहुधा परमप्यात्मानमिति प्रलपन्ति । [illegible] [illegible] [illegible] [illegible] [illegible] केचित् । तीव्रमन्दानुभवभिद्यमानदुरन्तरागरसनिर्भराध्यवसान [illegible] [illegible] केचित् । नवपुराणावस्थादिभावेन प्रवर्तमानं [illegible] [illegible] केचित् । विश्वमपि पुण्यपाप[illegible] [illegible] केचित् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] केचित् । [illegible] इति निर्दिष्टं । कुतः —

एदे सव्वे भावा पुग्गलदव्वपरिणामणिप्पण्णा ।
केवलिजिणेहिं भणिदा कह ते जीवो त्ति वुच्चंति ॥४९॥

एते सर्वे भावाः पुद्गलद्रव्यपरिणामनिष्पन्नाः ।

राजा खलु निर्गत इत्येष बलसमुदयस्यादेशः ।
व्यवहारेण तूच्यते तत्रैको निर्गतो राजा ॥ ५२ ॥
एवमेव च व्यवहारोऽध्यवसानाद्यन्यभावानां ।
जीव इति कृतः सूत्रे तत्रैको निश्चितो जीवः ॥५३॥

तात्पर्यवृत्ति —राया हु णिग्गदो त्तिय एसो बलसमुदयस्स आदेसो राजा हु स्फुटं नि गत एव बलसमुदयस्यादेशः कथनं ववहारेण दु उच्चदि तत्थेको णिग्गदो राया बलसमूह दृष्टांत । पंच योजनानि व्याप्य राजा निर्गत इति व्यवहारेणोच्यते । निश्चयनयेन तु तत्रैको राजा निर्गत इति दृष्टान्तो गतः । इदानीं दार्ष्टांतमाह—एमेवयववहारो अज्झवसाणादि अण्णभावाण एमेव राजदृष्टांत प्रकारेणैव व्यवहारः । केषां अध्यवसानादीनां जीवाद्भिन्नभावादीनां रागादिपर्यायाणां जीवो त्ति कदो सुत्ते कथंभूतो व्यवहारः रागाद्यो भावा व्यवहारेण जीव इति कृत भणित सूत्रे परमागमे तत्थेको णिच्छिदो जीवो तत्र तेषु रागादिपरिणामेषु मध्ये निश्चितो ज्ञातव्य कोसौ जीवः कथंभूत शुद्धनिश्चयनयेनैव भावकर्मद्रव्यकर्मनोकर्मरहितशुद्धबुद्धैकस्वभावो जीवपदार्थः । इति व्यवहारनयसमर्थनरूपेण गाथात्रयं गतं । एवमजीवाधिकारमध्ये शुद्धनिश्चयनयेन देहरागादिपरद्रव्यं जीवस्वरूपं न भवतीति कथनमुख्यतया गाथा-दशकेन प्रथमोत्तराधिकारो व्याख्यातः ।

अथानंतरं वर्णरसादिपुद्गलस्वरूपरहितोऽनंतज्ञानादिगुणस्वरूपश्च शुद्धजीव एव उपादेय इति कथनमुख्यतया द्वादशगाथापर्यंतं व्याख्यानं करोति । तत्र द्वादशगाथासु मध्ये परमसामायिकभावना-परिणतभेदरत्नत्रयलक्षणनिर्विकल्पसमाधिसमुत्पन्नपरमानंदसुखसमरसीभावपरिणतशुद्धजीव एवोपादेय इति कथनेन अरसमरूव इत्यादिसूत्रगाथैका । अथाभ्यंतरे रागादयो बहिरंगे वर्णादयश्च शुद्धजीवस्वरूपं न भवंतीति तस्यैव गाथासूत्रस्य विशेषविवरणार्थं जीवस्स णत्थि वण्णो इत्यादिसूत्रषट्कं । तत परतः एते राग-[illegible] व्यवहारेण संति शुद्धनिश्चयनयेन न संतीति परस्परसापेक्षनयद्वयविवरणार्थं ववहारेण [illegible] सूत्रमेकं । तदनंतरमेतेषां रागादीनां व्यवहारनयेनैव जीवेन सह क्षीरनीरवत्संबंधो न च निश्च[illegible] [illegible] एदेहि य संबंधो इत्यादि सूत्रमेकं । ततश्च तस्यैव व्यवहारनयस्य पुनरपि [illegible] [illegible] पंथे मुस्संतं इत्यादि गाथात्रयं । इति द्वितीयस्थले समुदायपातनिका । तद्यथा-[illegible] निश्चय[illegible] जीवो न भवति तर्हि कथंभूत शुद्धजीव उपादेयस्वरूप इत्याह ।

आत्मख्याति —[illegible] राजा पंच योजनान्यभिव्याप्य निष्क्रामतीत्येकस्य पंचयोजनान्यभिव्या-[illegible] गच्छति व्यवहार । परमार्थतस्त्वेक एव राजा । तथैव जीव समग्रं [illegible] समग्रं रागग्रामममभिव्याप्य प्रवर्तमान[illegible] [illegible] । परमार्थतस्त्वेक एव जीव । यद्येवं तर्हि [illegible] [illegible] —

अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं ।
जाण अलिंगग्गहणं जीवमणिद्दिट्ठसंठाणं ॥५४॥

अरसमरूपमगंधमव्यक्तं चेतनागुणमशब्दं ।
जानीहि अलिंगग्रहणं जीवमनिर्दिष्टसंस्थानं ॥५४॥

तात्पर्यवृत्ति —अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं [illegible]
[illegible]
[illegible]

य समस्तपुद्गलादिद्रव्यसंस्थानरहित च य पदार्थ तमेव गुणविशिष्ट शुद्धजीवमुपादेयमिति हे शिष्य जानीहि । इदमत्र तात्पर्यं । शुद्धनिश्चयनयेन सर्वपुद्गलद्रव्यसंबंधिवर्णादिगुणशब्दादिपर्यायरहित सर्वद्रव्येन्द्रियभावेन्द्रियमनोगतरागादिविकल्पाविषयो धर्माधर्माकाशकालद्रव्येभ्यो जीवान्तरेभ्यो भिन्नोऽनन्तज्ञानदर्शनसुखवीर्यश्च य स एव शुद्धात्मा समस्तपरद्रव्यै सर्वदेशसर्वकालब्राह्मणक्षत्रियादिनानावर्णभेदभिन्नजनसमस्तमनोवचनकायव्यापारेषु दुर्लभ स एवाद्य सर्वतोपादेय इति मत्वा निर्विकल्पनिर्मोहनिरंजननिजशुद्धात्मसमाधिसंजातसुखामृतरसानुभूतिलक्षणे गिरिगुहागह्वरे स्थित्वा सर्वतात्पर्येण ध्यातव्य इति । एव सूत्रगाथा गता । अथ वर्णादयो रागादिपर्यन्ता भावा पौद्गलिका शुद्धनिश्चयेन जीवस्वरूप न भवन्तीति प्रतिपादयति ।

आत्मख्याति —य खलु पुद्गलद्रव्यादन्यत्वेनाविद्यमानरसगुणत्वात् पुद्गलद्रव्यगुणेभ्यो भिन्नत्वेन स्वयमरसगुणत्वात् परमार्थत पुद्गलद्रव्यस्वामित्वाभावात् द्रव्येन्द्रियावष्टम्भेनारसनात् स्वभावत क्षायोपशमिकभावाभावाद्भावेन्द्रियावलम्बेनारसनात्, सकलसाधारणैकसंवेदनपरिणामस्वभावत्वात्केवलरसवेदनापरिणामापन्नत्वेनारसनात्, सकलज्ञेयज्ञायकतादात्म्यस्य निषेधाद्रसपरिच्छेदपरिणतत्वेपि स्वयरसरूपेणापरिणमनाच्चारस । तथा पुद्गलद्रव्यादन्यत्वेनाविद्यमानरूपगुणत्वात् पुद्गलद्रव्यगुणेभ्यो भिन्नत्वेन स्वयमरूपगुणत्वात् परमार्थत पुद्गलद्रव्यस्वामित्वाभावात् द्रव्येन्द्रियावष्टम्भेनारूपणात्, स्वभावत क्षायोपशमिकभावाभावाद्भावेन्द्रियावलम्बेनारूपणात् सकलसाधारणैकसंवेदनपरिणामस्वभावत्वात्केवलरूपवेदनापरिणामापन्नत्वेनारूपणात्, सकलज्ञेयज्ञायकतादात्म्यस्य निषेधाद्रूपपरिच्छेदपरिणतत्वेपि स्वय रूपरूपेणापरिणमनाच्चारूप । तथा पुद्गलद्रव्यादन्यत्वेनाविद्यमानगन्धगुणत्वात् पुद्गलद्रव्यगुणेभ्यो भिन्नत्वेन स्वयमगन्धगुणत्वात् परमार्थत पुद्गलद्रव्यस्वामित्वाभावाद्द्रव्येन्द्रियावष्टम्भेनागन्धनात्, स्वभावत क्षायोपशमिकभावाभावाद्भावेन्द्रियावलम्बेनागन्धनात् सकलसाधारणैकसंवेदनपरिणामस्वभावत्वात्केवलगन्धवेदनापरिणामापन्नत्वेनागन्धनात् सकलज्ञेयज्ञायकतादात्म्यस्य निषेधाद्गन्धपरिच्छेदपरिणतत्वेपि स्वय गन्धरूपेणापरिणमनाच्चागन्ध । तथा पुद्गलद्रव्यादन्यत्वेनाविद्यमानस्पर्शगुणत्वात् पुद्गलद्रव्यगुणेभ्यो भिन्नत्वेन स्वयमस्पर्शगुणत्वात् परमार्थत पुद्गलद्रव्यस्वामित्वाभावाद्द्रव्येन्द्रियावष्टम्भेनास्पर्शनात् स्वभावत क्षायोपशमिकभावाभावात् भावेन्द्रियावलम्बेनास्पर्शनात् सकलसाधारणैकसंवेदनपरिणामस्वभावत्वात् केवलस्पर्शवेदनापरिणामापन्नत्वेनास्पर्शनात् सकलज्ञेयज्ञायकतादात्म्यस्य निषेधात् स्पर्शपरिच्छेदपरिणतत्वेपि स्वय स्पर्शरूपेणापरिणमनाच्चास्पर्श । तथा पुद्गलद्रव्यादन्यत्वेनाविद्यमानशब्दपर्यायत्वात् पुद्गलद्रव्यपर्यायेभ्यो भिन्नत्वेन स्वयमशब्दपर्यायत्वात् परमार्थत पुद्गलद्रव्यस्वामित्वाभावात् द्रव्येन्द्रियावष्टम्भेन शब्दाश्रवणात् स्वभावत क्षायोपशमिकभावाभावाद्भावेन्द्रियावलम्बेन शब्दाश्रवणात् सकलसाधारणैकसंवेदनपरिणामस्वभावत्वात् केवलशब्दवेदनापरिणामापन्नत्वेन शब्दाश्रवणात् सकलज्ञेयज्ञायकतादात्म्यस्य निषेधाच्छब्दपरिच्छेदपरिणतत्वेपि स्वय शब्दरूपेणापरिणमनाच्चाशब्द । द्रव्यान्तरारब्धशरीरसंस्थानेनैव संस्थान इति निर्देष्टुमशक्यत्वात् नियतस्वभावेनानियतसंस्थानानन्तशरीरवर्तित्वात्संस्थाननामकर्मविपाकस्य पुद्गलेषु निर्दिश्यमानत्वात् प्रतिविशिष्टसंस्थानपरिणतसमस्तवस्तुतत्त्वसंवलितसहजसंवेदनशक्तित्वेपि स्वयमखिललोकसंवलनशून्योपजायमाननिर्मलानुभूतितयात्यन्तमसंस्थानत्वाच्चानिर्दिष्टसंस्थान । षड्द्रव्यात्मकलोकाज्ज्ञेयाद्व्यक्तादन्यत्वात्कषायचक्राद्भावकाद्व्यक्तादन्यत्वाच्चित्सामान्यनिमग्नसमस्तव्यक्तित्वात् क्षणिकव्यक्तिमात्राभावात् व्यक्ताव्यक्तविमिश्रप्रतिभासेपि व्यक्तास्पर्शत्वात् स्वयमेव हि बहिरन्त स्फुटमनुभूयमानत्वेपि व्यक्तोपेक्षणेन प्रद्योतमानत्वाच्चाव्यक्त । रसरूपगन्धस्पर्शशब्दसंस्थानव्यक्तत्वाभावेपि स्वसंवेदनबलेन नित्यमात्मप्रत्यक्षत्वे सत्यनुमेयमात्रत्वाभावादलिंगग्रहण । समस्तविप्रतिपत्तिप्रमाथिना विवेचकजनसमर्पितसर्वस्वेन सकलमपि लोकालोक कवलीकृत्यात्यन्तसौहित्यमन्थरेणेव सकलकालमेव मनागप्यविचलितानन्यसाधारणतया स्वभावभूतेन स्वयमनुभूयमानेन चेतनागुणेन नित्यमेवान्त प्रकाशमानत्वात् चेतनागुणश्च स खलु भगवानमलालोक इहैकटंकोत्कीर्ण प्रत्यग्ज्योतिर्जीव ।

सकलमपि विहायाह्नाय चिच्छक्तिरिक्त स्फुटतरमवगाह्य स्व च चिच्छक्तिमात्र ।
इममुपरि चरत चारु विश्वस्य साक्षात् कलयतु परमात्मात्मानमात्मन्यनन्त ॥३५॥

चिच्छक्तिव्याप्तसर्वस्वसारो जीव इयानयं। अतोऽतिरिक्ताः सर्वेऽपि भावाः पौद्गलिका अमी॥३

जीवस्स णत्थि वण्णो णवि गंधो णवि रसो णवि य फासो।
णवि रूवं ण सरीरं ण वि संठाणं ण संहणणं ॥५५॥
जीवस्स णत्थि रागो णवि दोसो णेव विज्जदे मोहो।
णो पच्चया ण कम्मं णोकम्मं चावि से णत्थि ॥५६॥
जीवस्स णत्थि वग्गो ण वग्गणा णेव फड्ढया केई।
णो अज्झप्पट्ठाणा णेव य अणुभायठाणाणि ॥५७॥
जीवस्स णत्थि केई जोयट्ठाणा ण बंधठाणा वा।
णो व य उदयट्ठाणा ण मग्गणट्ठाणया केई ॥५८॥
णो ठिदिबंधट्ठाणा जीवस्स ण संकिलेसठाणा वा।
णेव विसोहिट्ठाणा णो संजमलद्धिठाणा वा ॥५९॥
णेव य जीवट्ठाणा ण गुणट्ठाणा य अत्थि जीवस्स।
जेण दु एदे सव्वे पुग्गलदव्वस्स परिणामा ॥६०॥

जीवस्य नास्ति वर्णो नापि गंधो नापि रसो नापि च स्पर्शः।
नापि रूपं न शरीरं नापि संस्थानं न संहननं ॥५५॥
जीवस्य नास्ति रागो नापि द्वेषो नैव विद्यते मोहः।
नो प्रत्यया न कर्म नोकर्म चापि तस्य नास्ति ॥५६॥
जीवस्य नास्ति वर्गो न वर्गणा नैव स्पर्द्धकानि कानिचित्।
नो अध्यात्मस्थानानि नैव चानुभागस्थानानि ॥५७॥
जीवस्य न संति कानिचिद्योगस्थानानि न बंधस्थानानि वा।
नैव चोदयस्थानानि न मार्गणास्थानानि कानिचित् ॥५८॥
नो स्थितिबंधस्थानानि जीवस्य न संक्लेशस्थानानि वा।
नैव विशुद्धस्थानानि नो संयमलब्धिस्थानानि वा ॥५९॥
नैव च जीवस्थानानि न गुणस्थानानि वा संति जीवस्य।
येन त्वेते सर्वे पुद्गलद्रव्यस्य परिणामाः ॥६०॥

तात्पर्यवृत्ति —वर्णगंधरसस्पर्शास्तु रूपशब्दवाच्याः स्पर्शरसगंधवर्णवती मूर्तिश्च औदारि[क]
पंच शरीराणि समचतुरस्रादिषट्संस्थानानि वज्रर्षभनाराचादिषट्संहननानि चेति। एते वर्णादयो ध[र्मि]
शुद्धनिश्चयनयेन जीवस्य न संतीति साध्यो धर्मश्चेति धर्मधर्मिसमुदायलक्षणः पक्षः कस्मात् सर्वप्रति
यावत् पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वादिति हेतुः। एवमत्र व्याख्याने पक्षहेतुरूपे
गद्वयमनुमानं ज्ञातव्यं। अथ रागद्वेषमोहमिथ्यात्वाविरतिप्रमादकषाययोगरूपपंचप्रत्ययमूलोत्तरप्र
भेदभिन्नज्ञानावरणाद्यष्टविधकर्मौदारिकवैक्रियिकाहारकशरीरत्रयाहारादिषट्पर्याप्तिरूपनोकर्माणि इत्यस्य
वस्य शुद्धनिश्चयनयेन सर्वाण्येतानि न संति कस्मात् पुद्गलपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्न[त्वात्]
अथ परमाणोरविभागपरिच्छेदरूपशक्तिसमूहो वर्ग इत्युच्यते। वर्गाणां समूहो वर्गणा भण्यते। वर्गणाना

स्थानानि स्पर्द्धकानि च कानिचिन्न सन्ति। अथवा कर्मशक्तेः क्रमेण विशेषवृद्धिः स्पर्द्धकलक्षणं। तथा चोक्तं वर्गवर्गणास्पर्द्धकानां लक्षणं—

वग्गं सत्तिसमूहो अणूणं बहूणं वग्गणोदिता। वर्गणानां समूहस्तु स्पर्द्धकं स्पर्द्धकापहैः।

शुभाशुभरागादिविकल्परूपाण्यध्यवसानानि भण्यन्ते। तानि च सन्ति लतादार्वस्थिपाषाणशक्तिरूपाणि घातिकर्मचतुष्टयानुभागस्थानानि भण्यन्ते। गुडखंडशर्करामृतसमानानि शुभाघातिकर्मानुभागस्थानानि भण्यन्ते। निंबकांजीरविषहालाहलसदृशान्यशुभाघातिकर्मानुभागस्थानानि च तान्येतानि सर्वाण्यपि शुद्धनिश्चयनयेन जीवस्य न सन्ति। कस्मात् पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वात्। अथ वीर्यांतरायक्षयोपशमजनितमनोवचनकायवर्गणावलंबनकर्मादानहेतुभूतात्मप्रदेशपरिस्पंदलक्षणानि योगस्थानानि प्रकृतिस्थित्यनुभागप्रदेशरूपचतुर्विधबंधस्थानानि सुखदुःखानुभवरूपाण्युदयस्थानानि गत्यादिमार्गणास्थानानि च सर्वाण्यपि शुद्धनिश्चयनयेन जीवस्य न सन्ति कस्मात् पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वात्। अथ—जीवेन सह कालांतरावस्थानरूपाणि स्थितिबंधस्थानानि कषायोद्रेकरूपाणि संक्लेशस्थानानि कषायमंदोदयरूपाणि विशुद्धस्थानानि कषायक्रमहानिरूपाणि संयमलब्धिस्थानानि च सर्वाण्यपि शुद्धनिश्चयनयेन जीवस्य न सन्ति कस्मात् पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वात्। अथ—जीवस्य शुद्धनिश्चयनयेन "बादरसुहमेइंदी वितिचउरिंदी असण्णि सण्णीय। पज्जत्तापज्जत्ता एव ते चउदसा होंति" इति गाथाकथितक्रमेण बादरैकेंद्रियादिचतुर्दशजीवस्थानानि मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानानि सर्वाण्यपि न सन्ति पुद्गलद्रव्यपरिणाममयत्वे सति शुद्धात्मानुभूतेर्भिन्नत्वात्। कुत इति चेत् यत कारणादेते वर्णादिगुणस्थानांताः परिणामाः शुद्धनिश्चयनयेन पुद्गलद्रव्यस्य पर्याया इति। अयमत्र भावार्थः—सिद्धांतादिग्रंथे अशुद्धपर्यायार्थिकनयेनाभ्यंतरे रागादयो बहिरंगे शरीरवर्णापेक्षया वर्णादयोपि जीवा इत्युक्ता अत्र पुनरध्यात्मग्रंथे शुद्धनिश्चयनयेन निषिद्धा इत्युभयत्रापि नयविभागविवक्षया नास्ति विरोध इति व्याख्यानस्य विशेषव्याख्यानरूपेण सूत्रवृंदं गतं। अथ यदुक्तं पूर्वं सिद्धांतादौ जीवस्य वर्णादयो व्यवहारेण कथिता अत्र तु प्राभृतग्रंथे निश्चयनयेन निषिद्धा तमेवार्थं दृढयति।

आत्मख्यातिः — यः कृष्णो हरितः पीतो रक्तः श्वेतो वर्णः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यः सुरभिर्दुरभिर्वा गंधः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यः कटुकः कषायः तिक्तोऽम्लो मधुरो वा रसः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यः स्निग्धो रूक्षः शीतः उष्णो गुरुर्लघुर्मृदुः कठिनो वा स्पर्शः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यत्स्पर्शादिसामान्यपरिणाममात्रं रूपं तन्नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यदौदारिकं वैक्रियिकमाहारकं तैजसं कार्मणं वा शरीरं तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यत्समचतुरस्रं न्यग्रोधपरिमंडलं स्वाति कुब्जं वामनं हुंडं वा संस्थानं तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यद्वज्रर्षभनाराचं वज्रनाराचं नाराचमर्द्धनाराचं कीलिका असंप्राप्तासृपाटिका वा संहननं तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यः प्रीतिरूपो रागः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। योऽप्रीतिरूपो द्वेषः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यस्तत्त्वाप्रतिपत्तिरूपो मोहः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। ये मिथ्यात्वाविरतिकषाययोगलक्षणाः प्रत्ययास्ते सर्वेपि न सन्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यद् ज्ञानावरणीयदर्शनावरणीयवेदनीयमोहनीयायुर्नामगोत्रांतरायरूपं कर्म तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यत्षट्पर्याप्तित्रिशरीरयोग्यवस्तुरूपं नोकर्म तत्सर्वमपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। यः शक्तिसमूहलक्षणो वर्गः स सर्वोपि नास्ति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात्। या वर्गसमूहलक्षणा वर्गणा सा सर्वापि नास्ति जीवस्य पुद्गलद्रव्य

परिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि मंदतीव्ररसकर्मदलविशिष्टन्यासलक्षणानि स्पर्द्धक सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि स्वपरैकत्वाध्य विशुद्धचित्परिणामातिरिक्तत्वलक्षणान्यध्यात्मस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्र ममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि प्रतिविशिष्टप्रकृतिरसपरिणामलक्षणान्यनुभागस्थानानि ता ण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि कायवाङ्मनोवर्गण लक्षणानि योगस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भि यानि प्रतिविशिष्टप्रकृतिपरिणामलक्षणानि बंधस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्ग णाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि स्वफलसंपादनसमर्थकर्मावस्थालक्षणान्युदयस्थानानि ता ण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि गतींद्रियकाययोग ज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञाहारलक्षणानि मार्गणास्थानानि तानि सर्वाण्यपि न संति पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि प्रतिविशिष्टप्रकृतिकालांतरसहत्वलक्षणानि बंधस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि विपाकोद्रेकलक्षणानि संक्लेशस्थानानि तानि सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे स भिन्नत्वात् । यानि कषायविपाकानुद्रेकलक्षणानि विशुद्धस्थानानि तानि सर्वाण्यपि न संति जीवस्य पु परिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि चारित्रमोहविपाकक्रमनिवृत्तिलक्षणानि संयमलब्धिस्थानां सर्वाण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि पर्याप्तापर्याप्तबा केंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियसंज्ञ्यसंज्ञिपंचेंद्रियलक्षणानि जीवस्थानानि तानि सर्वाण्यपि न संति पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् । यानि मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्याद यतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयताप्रमत्तसंयतापूर्वकरणोपशमकक्षपकानिवृत्तिबादरसांपरायोपशमक क्ष्मसांपरायोपशमकक्षपकोपशांतकषायक्षीणकषायसयोगकेवल्ययोगकेवलिलक्षणानि गुणस्थानानि ता ण्यपि न संति जीवस्य पुद्गलद्रव्यपरिणाममयत्वे सत्यनुभूतेर्भिन्नत्वात् ।

वर्णाद्या वा रागमोहादयो वा भिन्ना भावाः सर्व एवास्य पुंसः ।
तेनैवांतस्तत्त्वतः पश्यतोऽमी नो दृष्टाः स्युर्दृष्टमेकं परं स्यात् ॥ ३७ ॥

ननु वर्णादयो यद्यमी न संति जीवस्य तदा तंत्रांतरे कथं संतीति प्रज्ञाप्यते इति चेत्-

ववहारेण दु एदे जीवस्स हवंति वण्णमादीया ।
गुणठाणंताभावा ण दु केई णिच्छयणयस्स ॥ ६१ ॥

व्यवहारेण त्वेते जीवस्य भवंति वर्णाद्याः ।
गुणस्थानांता भावा न तु केचिन्निश्चयनयस्य ॥ ६१ ॥

तात्पर्यवृत्तिः — व्यवहारनयेन एते जीवस्य भवंति वर्णाद्या गुणस्थानांता भावा पर्या केचिन्निश्चयनयेनेति । एवं निश्चयव्यवहारसमर्थनरूपेण गाथा गता । अथ कस्माज्जीवस्य निश्चये दया न संतीति पृष्टे प्रत्युत्तरं ददाति ।

आत्मख्यातिः — इह हि व्यवहारनयः किल पर्यायाश्रितत्वाज्जीवस्य पुद्गलसंयोगवशा सिद्धबंधपर्यायस्य कुसुंभरक्तस्य कार्पासिकवासस इवौपाधिकं भावमवलंब्योत्प्लवमानः परभावं पर धत्ते । निश्चयनयस्तु द्रव्याश्रितत्वात्केवलस्य जीवस्य स्वाभाविकं भावमवलंब्योत्प्लवमानः परमा स्वमेव प्रतिषेधयति । ततो व्यवहारेण वर्णाद्या गुणस्थानांता भावा जीवस्य संति निश्चयेन तु न दुक्तं प्रज्ञप्ति । युक्ता जीवस्य वर्णाद्या निश्चयेन न संतीति चेत् ।

एदेहि य संबंधो जहेव खीरोदयं मुणेदव्वो ।

णय हुंति तस्स ताणि दु उवओगगुणाधिगो जम्हा ॥६२॥

एतैश्च संबंधो यथैव क्षीरोदकं ज्ञातव्यः ।

न च भवति तस्य तानि तूपयोगगुणाधिको यस्मात् ॥ ६२ ॥

तात्पर्यवृत्तिः —एदेहिं य संबंधो जहेव खीरोदयं मुणेदव्वो एतैः वर्णादिगुणस्थानैः पूर्वोक्तरागादिभिः सह संबंधो यथा क्षीरनीरसंश्लेषस्तथा मन्तव्यः । न चाग्न्युष्णत्वयोरिव तादात्म्यसंबंधः । कुत इति चेत् ण य हुंति तस्स ताणि दु नच भवति तस्य जीवस्य ते तु वर्णादिगुणस्थानांता भावाः पर्यायाः कस्मात् उवओगगुणाधिगो जम्हा यस्मादुष्णगुणेनाग्निरिव केवलज्ञानदर्शनगुणेनाधिकः परिपूर्ण इति । ननु वर्णादयो बहिरंगास्तत्र व्यवहारेण क्षीरनीरसंश्लेषसंबंधो भवतु नचाभ्यन्तराणां रागादीनां तत्राशुद्धनिश्चयेन भवितव्यमिति । नैवं द्रव्यकर्मबंधापेक्षया योऽसौ असद्भूतव्यवहारस्तदपेक्षया तारतम्यज्ञापनार्थं रागादीनामशुद्धनिश्चयो भण्यते । वस्तुतस्तु शुद्धनिश्चयापेक्षया पुनरशुद्धनिश्चयोपि व्यवहार एवेति भावार्थः । अथ तर्हि कृष्णवर्णोयं धवलवर्णोयं पुरुष इति व्यवहारो विरोधं प्राप्नोतीत्येवं पूर्वपक्षे कृते सति व्यवहाराविरोधदर्शनार्थं पातनिका । द्वितीया तु तस्यैव पूर्वोक्तव्यवहारस्य विरोधं लोकप्रसिद्धदृष्टांतद्वारेण परिहरन्ति ।

आत्मख्यातिः—यथा खलु सलिलमिश्रितस्य क्षीरस्य सलिलेन सह परस्परावगाहलक्षणे संबंधे सत्यपि स्वलक्षणभूतक्षीरत्वगुणव्याप्यतया सलिलादधिकत्वेन प्रतीयमानत्वादग्नेरुष्णगुणेनेव सह तादात्म्यलक्षणसंबंधाभावान्न निश्चयेन सलिलमस्ति । तथा वर्णादिपुद्गलद्रव्यपरिणाममिश्रितस्यास्यात्मनः पुद्गलद्रव्येण सह परस्परावगाहलक्षणे संबंधे सत्यपि स्वलक्षणभूतोपयोगगुणव्याप्यतया सर्वद्रव्येभ्योऽधिकत्वेन प्रतीयमानत्वात् अग्नेरुष्णगुणेनेव सह तादात्म्यलक्षणसंबंधाभावान्न निश्चयेन वर्णादिपुद्गलपरिणामाः सन्ति । कथं तर्हि व्यवहारो विरोधक इति चेत् ।

पंथे मुस्संतं पस्सिदूण लोगा भणंति ववहारी ।
मुस्सदि एसो पंथो णय पंथो मुस्सदे कोई ॥ ६३ ॥
तह जीवे कम्माणं णोकम्माणं च पस्सिदुं वण्णं ।
जीवस्स एस वण्णो जिणेहिं ववहारदो उत्तो ॥ ६४ ॥
एवं रसगंधफासा संठाणादीय जे समुद्दिट्ठा ।
सव्वे ववहारस्स य णिच्छयदण्हू ववदिसंति ॥ ६५ ॥

पथि मुष्यमाणं दृष्ट्वा लोका भणंति व्यवहारिणः ।
मुष्यते एष पंथा न च पंथा मुष्यते कश्चित् ॥ ६३ ॥
तथा जीवे कर्मणां नोकर्मणां च दृष्ट्वा वर्णं ।
जीवस्यैष वर्णो जिनैर्व्यवहारत उक्तः ॥ ६४ ॥
एवं गंधरसस्पर्शरूपाणि देहः संस्थानादयो ये च ।
सर्वे व्यवहारस्य च निश्चयद्रष्टारो व्यपदिशंति ॥ ६५ ॥

तात्पर्यवृत्तिः —पंथे मुस्संतं पस्सिदूण लोगा भणंति ववहारी पथि मार्गे मुष्यमाणं [illegible] दृष्ट्वा व्यवहारिलोका भणंति किं भणंति मुस्सदि एसो पंथो मुष्यते [illegible] णय पंथो मुस्सदे कोई नच [illegible]

१ [illegible]

तदाधेयभूता जना मुष्यत इति दृष्टांतगाथा गता। **तह जीवे कम्माण णोकम्माण च पस्सिदुं वण्ण** तथा तेन पथि सार्थदृष्टांतेन जीवेधिकरणभूते कर्मनोकर्मणां शुक्लादिवर्णं दृष्ट्वा **जीवस्स एस वण्णो जिणेहिं ववहारदो उत्तो** जीवस्य एष वर्णो जिनैर्व्यवहारतो भणित इति दार्ष्टांतगाथा गता। एवं **रसगंधफासा संठाणादीय जे समुद्दिट्ठा** एवमनेनैव दृष्टांतदार्ष्टांतन्यायेन रसगंधस्पर्शसंस्थानसंहननरागद्वेषमोहादयो ये पूर्वगाथाषट्केन समुद्दिष्टाः **सव्वे ववहारस्स य णिच्छयदण्हू ववदिसंति** ते सर्वे व्यवहारनयस्याभिप्रायेण निश्चयज्ञा व्यपदिशंति कथयंतीति नास्ति व्यवहारविरोधः। इति दृष्टांतदार्ष्टांताभ्यां व्यवहारनयसमर्थनरूपेण गाथात्रयं गतं। एवं शुद्धजीव एवोपादेय इति प्रतिपादनमुख्यत्वेन द्वादशगाथाभिः द्वितीयांतराधिकारो व्याख्यातः।

अत परं जीवस्य निश्चयेन वर्णादितादात्म्यसंबंधो नास्तीति पुनरपि दृढीकरणार्थं गाथाष्टकपर्यंतं व्याख्यानं करोति। तत्रादौ संसारिजीवस्य व्यवहारेण वर्णादितादात्म्यं भवति मुक्तावस्थायां नास्तीति ज्ञापनार्थं **तत्थभवे** इत्यादिसूत्रमेकं। तत परं जीवस्य वर्णादितादात्म्यमस्तीति दुरभिनिवेशे सति जीवाभावो दूषणं प्राप्नोतीति कथनमुख्यत्वेन **जीवो चेवहि** इत्यादिगाथात्रयं। तदनंतरमेकेंद्रियादिचतुर्दशजीवसमासानां जीवेन सह शुद्धनिश्चयनयेन तादात्म्यं नास्तीति कथनार्थं तथैव वर्णादितादात्म्यनिषेधार्थं च **एकं च दोण्णि** इत्यादिगाथात्रयं। ततश्च मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानानामपि जीवेन सह शुद्धनिश्चयनयेन तादात्म्यनिराकरणार्थं तथैवाभ्यंतरे रागादितादात्म्यनिषेधार्थं च **मोहणकम्म** इत्यादिसूत्रमेकं। एवं मष्टगाथाभिस्तृतीयस्थले समुदायपातनिका। तद्यथा—अथ कथं जीवस्य वर्णादिभिः सह तादात्म्यलक्षणसंबंधो नास्तीति पृष्टे प्रत्युत्तरं ददाति।

आत्मख्याति—यथा पथि प्रस्थितं कंचित्सार्थं मुष्यमाणमवलोक्य तात्स्थ्यात्तदुपचारेण मुष्यत एष पंथा इति व्यवहारिणा व्यपदेशेपि न निश्चयतो विशिष्टाकाशदेशलक्षणः कश्चिदपि पंथा मुष्येत। तथा जीवे बंधपर्यायेणावस्थितकर्मणो नोकर्मणो वा वर्णमुत्प्रेक्ष्य तात्स्थ्यात्तदुपचारेण जीवस्यैष वर्ण इति व्यवहारतोर्हद्देवानां प्रज्ञापनेपि न निश्चयतो नित्यमेवामूर्तस्वभावस्योपयोगगुणाधिकस्य जीवस्य कश्चिदपि वर्णोस्ति। एवं गंधरसस्पर्शरूपशरीरसंस्थानसंहननरागद्वेषमोहप्रत्ययकर्मनोकर्मवर्गवर्गणास्पर्द्धकाध्यात्मस्थानानुभागस्थानयोगस्थानबंधस्थानोदयस्थानमार्गणास्थानस्थितिबंधस्थानसंक्लेशस्थानविशुद्धिस्थानसंयमलब्धिस्थानजीवस्थानगुणस्थानान्यपि व्यवहारतोर्हद्देवानां प्रज्ञापनेपि निश्चयतो नित्यमेवामूर्तस्वभावस्योपयोगगुणेनाधिकस्य जीवस्य सर्वाण्यपि न संति तादात्म्यलक्षणसंबंधाभावात्। कुतो जीवस्य वर्णादिभिः सह तादात्म्यलक्षणः संबंधो नास्तीति चेत्।

तत्थभवे जीवाणं संसारत्थाण होंति वण्णादी।
संसारपमुक्काणं णत्थि दु वण्णादओ केई ॥ ६६॥

तत्र भवे जीवानां संसारस्थानां भवंति वर्णादयः।
संसारप्रमुक्तानां न संति खलु वर्णादयः केचित् ॥ ६६ ॥

तात्पर्यवृत्तिः—**तत्थभवे जीवाणं संसारत्थाण होंति वण्णादी** तत्र विवक्षिताविवक्षितभवे संसारस्थानां जीवानामशुद्धनयेन वर्णादयो भवंति **संसारपमुक्काणं** संसारप्रमुक्तानां **णत्थि दु वण्णादओ केई** पुद्गलस्य वर्णादितादात्म्यवत्तादात्म्यसंबंधाभावात् केवलज्ञानादिगुणसिद्धत्वादिपर्यायैः सह यथा तादात्म्यसंबंधोस्ति तथा वा तादात्म्यसंबंधाभावादशुद्धनयेनापि न संति पुनर्वर्णादयः केपि। इति वर्णादितादात्म्यनिषेधरूपेण गाथा गता। अथ जीवस्य वर्णादितादात्म्यदुराग्रहे सति दोषं दर्शयति।

आत्मख्याति—यत्किल सर्वास्वप्यवस्थासु यदात्मकत्वेन व्याप्तं भवति तदात्मकत्वव्याप्तिशून्य

न भवति तस्य तैः सह तादात्म्यलक्षणः संबंधः स्यात्। ततः सर्वास्वप्यवस्थासु वर्णाद्यात्मकत्वव्याप्तस्य भवतो वर्णाद्यात्मकत्वव्याप्तिशून्यस्याभवतश्च पुद्गलस्य वर्णादिभिः सह तादात्म्यलक्षणः संबंधः स्यात्। संसारावस्थायां कथंचिद्वर्णाद्यात्मकत्वव्याप्तस्य भवतो वर्णाद्यात्मकत्वव्याप्तिशून्यस्याभवतश्चापि मोक्षावस्थायां सर्वथा वर्णाद्यात्मकत्वव्याप्तिशून्यस्य भवतो वर्णाद्यात्मकत्वव्याप्तस्याभवतश्च जीवस्य वर्णादिभिः सह तादात्म्यलक्षणः संबंधो न कथंचनापि स्यात्। जीवस्य वर्णादितादात्म्यदुरभिनिवेशे दोषश्चाय ।

जीवो चेव हि एदे सव्वे भावत्ति मण्णसे जदि हि ।
जीवस्साजीवस्स य णत्थि विसेसो हि दे कोई ॥६७॥

जीवश्चैव ह्येते सर्वे भावा इति मन्यसे यदि हि ।
जीवस्याजीवस्य च नास्ति विशेषस्तु ते कश्चित् ॥ ६७ ॥

तात्पर्यवृत्तिः—जीवो चेव हि एदे सव्वे भावात्ति मण्णसे जदि हि यथानन्तज्ञानाव्याबाधसुखादिगुणा एव जीवो भवति वर्णादिगुणा एव पुद्गलस्तथा जीव एव हि स्फुटमेते वर्णादयः सर्वे भावा मनसि मन्यसे यदि चेत् जीवस्साजीवस्स य णत्थि विसेसो हि दे कोई तदा किं दूषणं विशुद्धज्ञानदर्शनस्वभावजीवस्य जडत्वादिलक्षणाजीवस्य च तव मते कोपि विशेषो भेदो नास्ति। ततश्च जीवाभावदूषणं प्राप्नोतीति सूत्रार्थः । अथ संसारावस्थायामेव जीवस्य वर्णादितादात्म्यसंबंधोस्तीति दुरभिनिवेशेपि जीवाभाव एव दोष इत्युपदिशति ।

आत्मख्यातिः—यथा वर्णादयो भावा क्रमेण भाविताविर्भावतिरोभावाभिस्ताभिस्ताभिर्व्यक्तिभिः पुद्गलद्रव्यमनुगच्छन्तः पुद्गलस्य वर्णादितादात्म्यं प्रथयन्ति । तथा वर्णादयो भावाः क्रमेण भाविताविर्भावतिरोभावाभिस्ताभिस्ताभिर्व्यक्तिभिर्जीवमनुगच्छन्तो जीवस्य वर्णादितादात्म्यं प्रथयन्तीति यस्याभिनिवेशः तस्य शेषद्रव्यासाधारणस्य वर्णाद्यात्मकत्वस्य पुद्गललक्षणस्य जीवेन स्वीकरणाज्जीवपुद्गलयोरविशेषप्रसक्तौ सत्यां पुद्गलेभ्यो भिन्नस्य जीवद्रव्यस्याभावाद्भवत्येव जीवाभावः । संसारावस्थायामेव जीवस्य वर्णादितादात्म्यमित्यभिनिवेशेऽप्ययमेव दोषः ।

जदि संसारत्थाणं जीवाणं तुज्झ होंति वण्णादी ।
तम्हा संसारत्था जीवा रूवित्तमावण्णा ॥ ६८ ॥
एवं पुग्गलदव्वं जीवो तह लक्खणेण मूढमदी ।
णिव्वाणमुवगदो वि य जीवत्तं पुग्गलो पत्तो ॥ ६९ ॥

अथ संसारस्थानां जीवानां तव भवंति वर्णादयः ।
तस्मात्संसारस्था जीवा रूपित्वमापन्नाः ॥ ६८ ॥
एवं पुद्गलद्रव्यं जीवस्तथालक्षणेन मूढमते ।
निर्वाणमुपगतोपि च जीवत्वं पुद्गलः प्राप्तः ॥ ६९ ॥

तात्पर्यवृत्तिः—जदि संसारत्थाणं जीवाणं तुज्झ होंति वण्णादी यदि चेत्संसारस्थजीवानां पुद्गलस्येव वर्णादयो गुणास्तव मते न तवाभिप्रायेणैकांतेन भवतीति तम्हा संसारत्था जीवा रूवित्तमावण्णा ततः किं दूषणं संसारस्थजीवा अमूर्तानंतज्ञानादिचतुष्टयस्वभावलक्षणं त्यक्त्वा पुद्गलस्यादिलक्षणं रूपित्वमापन्ना भवति । अथ—एवं पुग्गलदव्वं जीवो तह लक्खणेण मूढमदी एवं पूर्वोक्तप्रकारेण जीवस्य रूपित्वे सति पुद्गलद्रव्यमेव जीवः नान्यः कोपि विशुद्धचैतन्यचमत्कारमात्रसत्वलक्षणेन त्वदभिप्रायेण हे मूढमते न केवलं संसारावस्थायां पुद्गलो एव जीवत्वं प्राप्तः णिव्वाणमुवगदो वि य

जइया इमेण जीवेण अप्पणो आसवाण य तहेव ।
णादं होदि विसेसंतरं तु तइया ण बंधो से ॥७६॥

यदानेन जीवेनात्मन आस्रवाणां च तथैव ।
ज्ञातं भवति विशेषान्तरं तु तदा न बंधस्तस्य ॥७६॥

तात्पर्यवृत्तिः—जइया यदा काले इमेण जीवेण अनेन जीवेन अप्पणो आसवाण य तहेव णादं होदि विसेसंतरं तु यदा शुद्धात्मनः कामक्रोधाद्यास्रवाणां च ज्ञातं भवति विशेषान्तरं भेदज्ञानं तइया तदा काले सम्यग्ज्ञानी भवति । सम्यग्ज्ञानी सन् किं करोति अहं कर्ता क्रोधादिरूपश्चेतनकर्मणस्तस्य कर्तृकर्मप्रवृत्तिं मुञ्चति । तां कर्तृकर्मप्रवृत्तिनिवृत्तौ सत्यां निर्विकल्पसमाधौ सति ण बंधो न बंधो भवति से तस्य जीवस्येति । अथ कथं ज्ञानमात्रादेव बंधनिरोध इति पूर्वपक्षे कृते परिहारं ददाति ।

आत्मख्यातिः—इह किल स्वभावमात्रं वस्तु, स्वस्य भवनं तु स्वभावः । तेन ज्ञानस्य भवनं खल्वात्मा । क्रोधादेर्भवनं क्रोधादि । अथ ज्ञानस्य यद्भवनं तन्न क्रोधादेरपि भवनं यतो यथा ज्ञानभवने ज्ञानं भवद्विभाव्यते न तथा क्रोधादिरपि । यत्तु क्रोधादेर्भवनं तन्न ज्ञानस्यापि भवनं यतो क्रोधादिभवने क्रोधादयो भवन्तो विभाव्यन्ते न तथा ज्ञानमपि इत्यात्मनः क्रोधादीनां च न खल्वेकवस्तुत्वं इत्येवमात्मात्मास्रवयोर्विशेषदर्शनेन यदा भेदं जानाति तदास्यानादिरप्यज्ञानजा कर्तृकर्मप्रवृत्तिर्निवर्तते तन्निवृत्तावज्ञाननिमित्तं पुद्गलद्रव्यकर्मबंधोपि निवर्तते । तथा सति ज्ञानमात्रादेव बंधनिरोधः सिद्ध्येत् । कथं ज्ञानमात्रादेव बंधनिरोध इति चेत् ।

णादूण आसवाणं असुचित्तं च विवरीयभावं च ।
दुक्खस्स कारणं ति य तदो णियत्तिं कुणदि जीवो ॥७७॥

ज्ञात्वा आस्रवाणामशुचित्वं च विपरीतभावं च ।
दुःखस्य कारणानीति च ततो निवृत्तिं करोति जीवः ॥७७॥

तात्पर्यवृत्तिः—क्रोधाद्यास्रवाणां संबंधि कालुष्यरूपमशुचित्वं जडस्वरूपं विपरीतभावं आकुलत्वोत्पादकं दुःखकारणत्वं च ज्ञात्वा तथैव निजात्मनः संबंधि निर्मलात्मानुभूतिरूपं शुचित्वं सहजशुद्धकेवलज्ञानरूपं ज्ञातृत्वमनाकुलत्वलक्षणानन्तसुखत्वं च ज्ञात्वा ततश्च स्वसंवेदनज्ञानानन्तरं सम्यग्दर्शनज्ञानचारित्रैकाग्र्यपरिणतिरूपे परमसामायिके स्थित्वा क्रोधाद्यास्रवाणां निवृत्तिं करोति जीवः । इति ज्ञानमात्रादेव बंधनिरोधो भवति नास्ति सांख्यादिमतप्रवेशः । किं च यद्यात्मास्रवयोः संबंधि भेदज्ञानं तद्रागादिभ्यो निवृत्तं न वेति पृष्टे चेत्तर्हि तस्य भेदज्ञानस्य मध्ये पानकवदभेदनयेन वीतरागचारित्रं वीतरागसम्यक्त्वं च लभ्यत इति सम्यग्ज्ञानादेव बंधनिरोधसिद्धिः । यदि रागादिभ्यो निवृत्तं न भवति तदा तत्सम्यग्भेदज्ञानमेव न भवतीति भावार्थः । अथ केन प्रकारेणायमात्मा क्रोधाद्यास्रवेभ्यो निवर्तते इति चेत् ।

आत्मख्यातिः—जले जंबालवत्कलुषत्वेनोपलभ्यमानत्वादशुचयः खल्वास्रवाः भगवानात्मा तु नित्यमेवातिनिर्मलचिन्मात्रत्वेनोपलंभकत्वादत्यंतं शुचिरेव । जडस्वभावत्वे सति परचेत्यत्वादन्यस्वभावाः खल्वास्रवाः भगवानात्मा तु नित्यमेव विज्ञानघनस्वभावत्वे सति स्वयं चेतकत्वादनन्यस्वभाव एव । आकुलत्वोत्पादकत्वाद् दुःखस्य कारणानि खल्वास्रवाः भगवानात्मा तु नित्यमेवानाकुलत्वस्वभावेनाकार्यकारणत्वाद् दुःखस्याकारणमेव । इत्येवं विशेषदर्शनेन यदैवायमात्मास्रवयोर्भेदं जानाति तदैव क्रोधादिभ्य आस्रवेभ्यो निवर्तते तेभ्योऽनिवर्तमानस्य पारमार्थिकतद्भेदज्ञानासिद्धेः । ततः क्रोधाद्यास्रवनिवृत्त्यविनाभाविनो ज्ञानमात्रादेवाज्ञानजस्य पौद्गलिकस्य कर्मणो बंधनिरोधः सिद्ध्येत् । किंच यदिदमात्मास्रवयोर्भेदज्ञानं तत्किमज्ञानं किं वा ज्ञानं ? यद्यज्ञानं तदा तदभेदज्ञानान्न तस्य विशेषः । ज्ञानं चेत् किमास्रवेषु प्रवृत्तं किं वास्रवेभ्यो निवृत्तं ? आस्रवेषु प्रवृत्तं चेत्तदापि तदभेदज्ञानान्न तस्य विशेषः । आस्रवेभ्यो निवृत्तं चेत्तर्हि कथं न ज्ञानादेव बंधनिरोधः ? इति निरस्तोऽज्ञानांशः क्रियानयः । यत्त्वात्मास्रवयोर्भेदज्ञानमपि नास्रवेभ्यो निवृत्तं भवति तज्ज्ञानमेव न भवतीति ज्ञानांशो ज्ञाननयोऽपि निरस्तः ।

वा इति ? यद्यज्ञानं तदा तदभेदज्ञानान्न तस्य विशेषः । ज्ञानं चेत् किमास्रवेषु प्रवृत्तं किंवास्रवेभ्यो निवृत्तं । आस्रवेषु प्रवृत्तं चेत्तदापि तदभेदज्ञानान्न तस्य विशेषः । आस्रवेभ्यो निवृत्तं चेत्तर्हि कथं न ज्ञानादेव बंधनिरोध इति निरस्तोऽज्ञानांशः क्रियानयः । यत्त्वात्मास्रवयोर्भेदज्ञानमपि नास्रवेभ्यो निवृत्तं भवति तज्ज्ञानमेव न भवतीति ज्ञानांशो ज्ञाननयोऽपि निरस्तः ।

परपरिणतिमुज्झत् खंडयद्भेदवादानिदमुदितमखंडं ज्ञानमुच्चंडमुच्चैः ।
ननु कथमवकाशः कर्तृकर्मप्रवृत्तेरिह भवति कथं वा पौद्गलः कर्मबंधः ॥४७॥

येन विधिनास्रवेभ्यो निवर्तत इति चेत् ।

अहमिक्को खलु सुद्धो य णिम्ममो णाणदंसणसमग्गो ।
तह्मि ठिदो तच्चित्तो सव्वे एदे खयं णेमि ॥७८॥

अहमेकः खलु शुद्धश्च निर्ममतः ज्ञानदर्शनसमग्रः ।
तस्मिन् स्थितस्तच्चित्तः सर्वानेतान् क्षयं नयामि ॥७८॥

तात्पर्यवृत्तिः —अहं निश्चयनयेन स्वसंवेदनज्ञानप्रत्यक्षः शुद्धचिन्मात्रज्योतिरहं इक्को अनाद्यनंतटंकोत्कीर्णज्ञायकैकस्वभावत्वादेकः खलु स्फुटं सुद्धो य—कर्तृकर्मकरणसंप्रदानापादानाधिकरणषट्कारकविकल्पचक्ररहितत्वाच्छुद्धश्च णिम्ममो निर्मोहशुद्धात्मतत्त्वविलक्षणमोहोदयजनितक्रोधादिकषायचक्रस्वामित्वाभावात् ममत्वरहितः । णाणदंसणसमग्गो प्रत्यक्षप्रतिभासमयविशुद्धज्ञानदर्शनाभ्यां समग्रः परिपूर्ण एव गुणविशिष्टश्चाभेदनयेनास्मि भवामि । तह्मि ठिदो तस्मिन् शुद्धात्मलक्षणे शुद्धात्मस्वरूपे स्थितः । तच्चित्तो तच्चित्तः सहजानंदैकलक्षणसुखसमरसीभावेन तन्मयो भूत्वा सव्वे एदे खयं णेमि सर्वानेतान्क्रोधाद्यास्रवान् परमात्मद्रव्यात्पृथग्भूतान् कामक्रोधाद्यास्रवान् क्षयं विनाशं नयामि प्रापयामीत्यर्थः । अथ यस्मिन्नेव काले स्वसंवेदनज्ञानं तस्मिन्नेव काले रागाद्यास्रवनिवृत्तिरिति समानकालत्वं दर्शयति ।

आत्मख्यातिः —अहमयमात्मा प्रत्यक्षमक्षुण्णमनंतं चिन्मात्रं ज्योतिरनाद्यनंतनित्योदितविज्ञानघनस्वभावभावत्वादेकः । सकलकारकचक्रप्रक्रियोत्तीर्णनिर्मलानुभूतिमात्रत्वाच्छुद्धः । पुद्गलस्वामिकस्य क्रोधादिभाववैश्वरूप्यस्य स्वस्य स्वामित्वेन नित्यमेवापरिणमनान्निर्ममतः । चिन्मात्रस्य महसो वस्तुस्वभावत एव सामान्यविशेषाभ्यां सकलत्वाद् ज्ञानदर्शनसमग्रः । गगनादिवत्पारमार्थिको वस्तुविशेषोऽस्मि तदहमधुनास्मिन्नेवात्मनि निखिलपरद्रव्यप्रवृत्तिनिवृत्त्या निश्चलमवतिष्ठमानः सकलपरद्रव्यनिमित्तकविशेषचेतनचंचलकल्लोलनिरोधेनेममेव चेतयमानः स्वाज्ञानेनात्मन्युत्प्लवमानानेतान् भावानखिलानेव क्षपयामीत्यात्मनि निश्चित्य चिरसंगृहीतमुक्तपोतपात्रः समुद्रावर्त इव झगित्येवोद्वांतसमस्तविकल्पोऽकल्पितमचलितममलमात्मानमालंबमानो विज्ञानघनभूतः खल्वयमात्मास्रवेभ्यो निवर्तते । कथं ज्ञानास्रवनिवृत्त्योः समकालत्वमिति चेत् —

जीवणिबद्धा एदे अधुव अणिच्चा तहा असरणा य ।
दुक्खा दुक्खफलाणि य णादूण णिवत्तदे तेसु ॥७९॥

जीवनिबद्धा एते अध्रुवा अनित्यास्तथा अशरणाश्च ।
दुःखानि दुःखफलानि च ज्ञात्वा निवर्तते तेभ्यः ॥७९॥

तात्पर्यवृत्तिः — एदे जीवणिबद्धा एते आस्रवाः जीवेन सह निबद्धाः संबद्धा औपाधिकाः । न पुनर्निरुपाधिस्फटिकवच्छुद्धजीवस्वभावाः । अधुवा विद्युच्चमत्कारवदध्रुवा अतीवक्षणिकाः । ध्रुवः शुद्धजीव एव । अणिच्चा शीतोष्णज्वरावेशवदध्रुवापेक्षया क्रमेण स्थिरत्वं न गच्छंतीत्यनित्या विनश्वराः नित्यश्चिच्चमत्कारमात्रशुद्धजीव एव । तहा असरणा य तथा तेनैव प्रकारेण तीव्रकामोद्रेकवत् त्रातुं धर्तुं रक्षितुं न शक्यंत इत्यशरणाः शरणं निर्विकारबोधस्वरूपः शुद्धजीव एव । दुक्खा आकुलत्वोत्पादकत्वाद्

जइया इमेण जीवेण अप्पणो आसवाण य तहेव ।
णादं होदि विसेसंतरं तु तइया ण बंधो से ॥७१॥

यदानेन जीवेनात्मनः आस्रवाणां च तथैव ।
ज्ञातं भवति विशेषांतरं तु तदा न बंधस्तस्य ॥७१॥

तात्पर्यवृत्तिः—**जइया** यदा श्रीधर्मलब्धिकाले **इमेण जीवेण** अनेन प्रत्यक्षीभूतेन जीवेन **अप्पणो आसवाण य तहेव णादं होदि विसेसंतरं तु** यथा शुद्धात्मनस्तथैव कामक्रोधाद्यास्रवाणां च ज्ञातं भवति विशेषांतरं भेदज्ञानं **तइया** तदा काले सम्यग्ज्ञानी भवति । सम्यग्ज्ञानी सन् किं करोति अहं क भावक्रोधादिरूपमंतरंग मम कर्मेत्यज्ञानजां कर्तृकर्मप्रवृत्तिं मुंचति । ततः कर्तृकर्मप्रवृत्तेर्निवृत्तौ स निर्विकल्पसमाधौ सति **ण बंधो** न बंधो भवति **से** तस्य जीवस्येति । अथ कथं ज्ञानमात्रादेव बंधनिरोध इति पूर्वपक्षे कृते परिहारं ददाति ।

आत्मख्यातिः—इह किल स्वभावमात्रं वस्तु, स्वस्य भवनं तु स्वभावः । तेन ज्ञानस्य भवनं खल्वात्मा । क्रोधादेर्भवनं क्रोधादिः । अथ ज्ञानस्य यद्भवनं तन्न क्रोधादेरपि भवनं यतो यथा ज्ञानभवने ज्ञानं भवद्विभाव्यते न तथा क्रोधादिरपि । यत्तु क्रोधादेर्भवनं तन्न ज्ञानस्यापि भवनं यतो क्रोधादिभवने क्रोधादयो भवंतो विभाव्यंते न तथा ज्ञानमपि इत्यात्मनः क्रोधादीनां च न खल्वेकवस्तुत्वं इत्येवमात्मात्मास्रवयो-र्विशेषदर्शनेन यदा भेदं जानाति तदास्यानादिरप्यज्ञानजा कर्तृकर्मप्रवृत्तिर्निवर्तते तन्निवृत्तावज्ञाननिमित्तं पुद्गलद्रव्यकर्मबंधोपि निवर्तते । तथा सति ज्ञानमात्रादेव बंधनिरोधः सिद्ध्येत् । कथं ज्ञानमात्रादेव बंध-निरोध इति चेत् ।

णादूण आसवाणं असुचित्तं च विवरीयभावं च ।
दुक्खस्स कारणं ति य तदो णियत्तिं कुणदि जीवो ॥७२॥

ज्ञात्वा आस्रवाणामशुचित्वं च विपरीतभावं च ।
दुःखस्य कारणानीति च ततो निवृत्तिं करोति जीवः ॥७२॥

तात्पर्यवृत्तिः—क्रोधाद्यास्रवाणां संबंधि कालुष्यरूपमशुचित्वं जडत्वरूपं विपरीतभावं व्याकुलत्व-लक्षणं दुःखकारणत्वं च ज्ञात्वा तथैव निजात्मनः संबंधि निर्मलात्मानुभूतिरूपं शुचित्वं सहजशुद्धाखंडै-कज्ञानरूपं ज्ञातृत्वमनाकुलत्वलक्षणानंतसुखत्वं च ज्ञात्वा ततश्च स्वसंवेदनज्ञानानंतरं सम्यग्दर्शनज्ञान-चारित्रैकाग्र्यपरिणतिरूपे परमसामायिके स्थित्वा क्रोधाद्यास्रवाणां निवृत्तिं करोति जीवः । इति ज्ञानमात्रेण बंधनिरोधो भवति नास्ति सांख्यादिमतप्रवेशः । किं च यदात्मास्रवयोः संबंधि भेदज्ञानं तद्रागाद्यास्रवेभ्यो निवृत्तं न भवति वृत्तं चेत्तर्हि तस्य भेदज्ञानस्य मध्ये पानकवदभेदनयेन वीतरागचारित्रं वीतरागसम्यक्त्वं च लभ्यत इति सम्यग्ज्ञानादेव बंधनिरोधसिद्धिः । यदि रागादिभ्यो निवृत्तं न भवति तदा तत्सम्यग्भेदज्ञानमेव न भवतीति भावार्थः । अथ केन भावनाप्रकारेणायमात्मात्मास्रवेभ्यो निवर्तते इति चेत् ।

आत्मख्यातिः—जले जंबालवत्कलुषत्वेनोपलभ्यमानत्वादशुचयः खल्वास्रवाः भगवानात्मा तु नित्य-मेवातिनिर्मलचिन्मात्रत्वेनोपलंभकत्वादत्यंतं शुचिरेव । जडस्वभावत्वे सति परचेत्यत्वादन्यस्वभावाः खल्वा-स्रवाः भगवानात्मा तु नित्यमेव विज्ञानघनस्वभावत्वे सति स्वयं चेतकत्वादनन्यस्वभाव एव । आकुलत्वोत्पा-दकत्वाद् दुःखस्य कारणानि खल्वास्रवाः भगवानात्मा तु नित्यमेवानाकुलत्वस्वभावेनाकार्यकारणत्वाद् दुःख-स्याकारणमेव । इत्येवं विशेषदर्शनेन यदैवायमात्मास्रवयोर्भेदं जानाति तदैव क्रोधादिभ्य आस्रवेभ्यो निव-र्तते । तेभ्योऽनिवर्तमानस्य पारमार्थिकतद्भेदज्ञानासिद्धेः । ततः क्रोधाद्यास्रवनिवृत्त्यविनाभाविना ज्ञानमात्रा-देवाज्ञानजस्य पौद्गलिकस्य कर्मणो बंधनिरोधः सिद्ध्येत् । किं च यदिदमात्मास्रवयोर्भेदज्ञानं तत्किमज्ञानं कि-

पुद्गलपरिणामावस्थाया इव पुद्गलादिभिन्नत्वेनात्मनो नित्यमेवात्यंतभिन्नायास्तन्निमित्त तथाविधानुभवस्य चात्मनो भिन्नत्वेन पुद्गलान्नित्यमेवात्यंतभिन्नस्य ज्ञानात्परस्परविशेषनिर्ज्ञाने सति नानात्वविवेकाच्छीतोष्ण रूपेणात्मना परिणमितुमशक्येन रागद्वेषसुखदुःखादिरूपेणाज्ञानात्मना मनागप्यपरिणममानो ज्ञानस्य ज्ञानत्वं प्रकटीकुर्वन् स्वयं ज्ञानमयीभूतः एषोहं जानाम्येव, रज्यते तु पुद्गल इत्यादिविधिना समग्रस्यापि रागादेः कर्मणो ज्ञानविरुद्धस्याकर्ता प्रतिभाति। कथमज्ञानात्कर्म प्रभवतीति चेत्।

तिविहो एसुवओगो अस्सवियप्प करेदि कोधोहं।
कत्ता तस्सुवओगस्स होदि सो अत्तभावस्स ॥१०१॥

त्रिविध एष उपयोग आत्मविकल्पं करोति क्रोधोहं।
कर्ता तस्योपयोगस्य भवति स आत्मभावस्य ॥१०१॥

तात्पर्यवृत्ति — **तिविहो एसुवओगो** त्रिविधस्त्रिप्रकार एष प्रत्यक्षीभूत उपयोगलक्षणत्वादुपयोग आत्मा **असमवियप्प करेदि** सम्यग्भावस्याभावादसद्विकल्पं मिथ्याविकल्पं करोति। केन रूपेण **कोधोहं** क्रोधोहमित्यादि **कत्ता तस्सुवओगस्स होदि सो** स जीवः तस्य क्रोधाद्युपयोगस्य विकल्पस्य कर्ता भवति। कथंभूतस्य **अत्तभावस्स** आत्मभावस्याशुद्धनिश्चयेन जीवपरिणामस्येति। तथाहि—सामान्येनाज्ञानरूपेण [illegible] मिथ्यादर्शनज्ञानचारित्ररूपेण त्रिविधो भूत्वा एष उपयोग आत्मा क्रोधाद्यात्मनोर्भाव्यभावकभावापन्नयोः [illegible]। [illegible] कोर्थः? भाव्यः क्रोधादिपरिणत आत्मा, भावका रजक- [illegible]। [illegible] ज्ञानाभावाद्भेदमजानन् [illegible] भवन् सन् [illegible], तस्यैव क्रोधाद्युपयोगपरिणामस्याशुद्धनिश्चयेन कर्ता भवतीति भावार्थः। [illegible] मानमायालोभमोहरागद्वेषकर्मनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्श [illegible] अनेन [illegible] भावशुद्धात्मभावनाविलक्षणा [illegible] [illegible]। अथ—

आत्मख्याति —एष खलु सामान्येनाज्ञानरूपो मिथ्यादर्शनाज्ञानाविरतिरूपस्त्रिविधः सविकार [illegible] परात्मनोरविशेषदर्शनेनाविशेषज्ञानेनाविरत्या च समस्तं भेदमपह्नुत्य भाव्यभाव [illegible] सामानाधिकरण्येनानुभवनात्क्रोधोहमित्यात्मनो विकल्पमुत्पादयति। ततोयमात्मा [illegible] सविकारेण चैतन्यपरिणामेन परिणमन् [illegible] सविकारचैतन्यपरिणामरूपस्यात्मभावस्य कर्ता स्यात्। [illegible] च क्रोधपदपरिवर्तनेन मानमायालोभमोहरागद्वेषकर्मनोकर्ममनोवचनकायश्रोत्र [illegible] [illegible] अनया दिशान्यान्यप्यूह्यानि।

तिविहो एसुवओगो अस्सवियप्पं करेदि धम्मादि।
कत्ता तस्सुवओगस्स होदि सो अत्तभावस्स ॥१०२॥

त्रिविध एष उपयोग आत्मविकल्पं करोति धर्मादिकं।
कर्ता तस्योपयोगस्य भवति स आत्मभावस्य ॥१०२॥

तात्पर्यवृत्ति — **तिविहो एसुवओगो** [illegible] **असमवियप्प करेदि धम्मादि** [illegible] [illegible] [illegible]। **कत्ता तस्सुवओगस्स होदि सो अत्तभावस्स** [illegible] [illegible]। [illegible]

स्वरूप घटत इति अत्र परिहार । धर्मास्तिकायोयमिति योसौ परिच्छित्तिरूपविकल्पो मनसि वर्तते सोप्युपचारेण धर्मास्तिकायो भण्यते । यथा घटाकारविकल्पपरिणतिज्ञान घट इति । तेन तद्धर्मास्तिकायोयमिति [illegible] विकल्प यदा ज्ञेयतत्त्वविचारकाले करोति जीव तदा शुद्धात्मस्वरूप विस्मरति तस्मिन्विकल्पे कृते सति धर्मोहमिति विकल्प उपचारेण घटत इति भावार्थ । तत स्थित शुद्धात्मसवित्तिरभावरूपमज्ञान कर्मकर्तृत्वस्य कारण भवति ।

आत्मख्याति —एव खलु सामान्येनाज्ञानरूपो मिथ्यादर्शनाज्ञानाविरतिरूपस्त्रिविध सविकारश्चैतन्यपरिणाम परस्परमविशेषदर्शनेनाविशेषज्ञानेनाविशेषरत्या च समस्त भेदमपह्नुत्य ज्ञेयज्ञायकभावापन्नयो परात्मनो सामान्याधिकरण्येनानुभवनाद्धर्मोहमधर्मोहमाकाशमह कालोह पुद्गलोह जीवान्तरमहमित्यात्मनो विकल्पमुत्पादयति । ततोयमात्मा धर्मोहमधर्मोहमाकाशमह कालोह पुद्गलोह जीवान्तरमहमिति भ्रान्त्या सोपाधिना चैतन्यपरिणामेन परिणमन् तस्य सोपाधिचैतन्यपरिणामरूपस्यात्मभावस्य कर्ता स्यात् । तत स्थित कर्तृत्वमूलमज्ञान ।

एव पराणिदव्वाणि अप्पय कुणदि मदबुद्धीओ ।
अप्पाण अवि य पर करेदि अण्णाणभावेण ॥१०३॥

एव पराणि द्रव्याणि आत्मान करोति मदबुद्धिस्तु ।
आत्मानमपि च पर करोति अज्ञानभावेन ॥१०३॥

तात्पर्यवृत्ति —एव एव पूर्वोक्तगाथाद्वयकथितप्रकारेण पराणि दव्वाणि अप्पय कुणदि क्रोधोहमित्यादिवद्धर्मास्तिकायोहमित्यादिवच्च क्रोधादिपरद्रव्यपरिणामरूपाणि [illegible] ज्ञेय[illegible] रूपाणि च परद्रव्याणि आत्मान करोति । स क कर्ता मदबुद्धीओ मन्दबुद्धिर्निर्विकल्प[illegible] भेदविज्ञानरहित अप्पाण अवि य पर करेदि शुद्धबुद्धैकस्वभावमात्मानमपि च पर [illegible] करोति रागादिषु योजयतीत्यर्थ । केन अण्णाणभावेण अज्ञानभावेनेति । तत स्थित [illegible] [illegible]

[illegible]

सरागमपि स्वसंवेदनज्ञानमस्तीति ? अत्रोत्तरं । विषयसुखानुभवानन्दरूपं स्वसंवेदनज्ञानं सर्वजनप्रसिद्धं सरागमप्यस्ति । शुद्धात्मसुखादिभूतिरूपं स्वसंवेदनज्ञानं वीतरागमिति । इदं व्याख्यानं स्वसंवेदनज्ञानव्याख्यानकाले सर्वत्र ज्ञातव्यमिति भावार्थः । ततः स्थितमेतत् शुद्धात्मानुभूतिलक्षणमध्यात्मज्ञानान्नश्यति कर्मकर्तृत्वं ।

आत्मख्याति:—यत्किल क्रोधोऽहमित्यादिवद्धर्मोऽहमित्यादिवच्च परद्रव्याण्यात्मीकरोत्यात्मानमपि परद्रव्यीकरोत्येवमात्मा, तदयमशेषवस्तुसंबंधविधुरनिरवधिविशुद्धचैतन्यधातुमयोप्यज्ञानादेव सविकारसोपाधीकृतचैतन्यपरिणामतया तथाविधस्यात्मभावस्य कर्ता प्रतिभातीत्यात्मनो भूताविष्टध्यानाविष्टस्येव प्रतिष्ठितं कर्तृत्वमूलमज्ञानं । तथाहि—यथा खलु भूताविष्टोऽज्ञानाद्भूतात्मानावेकीकुर्वन्नमानुषोचितविशिष्टचेष्टावष्टंभनिर्भरभयंकरारंभगंभीरामानुषव्यवहारतया तथाविधस्य भावस्य कर्ता प्रतिभाति । तथायमात्माप्यज्ञानादेव भाव्यभावकौ परात्मानावेकीकुर्वन्नविकारानुभूतिमात्रभावकानुचितविचित्रभाव्यक्रोधादिविकारकरंबितचैतन्यपरिणामविकारतया तथाविधस्य भावस्य कर्ता प्रतिभाति । यथा वा परीक्षकाचार्यादेशेन मुग्धः कश्चिन्महिषध्यानाविष्टो ज्ञानात् महिषात्मानावेकीकुर्वन्नात्मन्यभ्रंकषविषाणमहामहिषत्वाध्यासात् प्रच्युतमानुषोचितापवरकद्वारविनिस्सरणतया तथाविधस्य भावस्य कर्ता प्रतिभाति । तथायमात्माप्यज्ञानाद् ज्ञेयज्ञायकौ परात्मानावेकीकुर्वन्नात्मनि परद्रव्याध्यासान्नोइंद्रियविषयीकृतधर्माधर्माकाशकालपुद्गलजीवांतरनिरुद्धचैतन्यधातुतया तथेंद्रियविषयीकृतरूपिपदार्थतिरोहितकेवलबोधतया मृतककलेवरमूर्च्छितपरमामृतविज्ञानघनतया च तथाविधस्य भावस्य कर्ता प्रतिभाति । ततः स्थितमेतद् ज्ञानान्नश्यति कर्तृत्वं ।

एदेण दु सो कत्ता आदा णिच्छयविदूहिं परिकहिदो ।
एवं खलु जो जाणदि सो मुंचदि सव्वकत्तित्तं ॥१०४॥

एतेन तु स कर्तात्मा निश्चयविद्भिः परिकथितः ।
एवं खलु यो जानाति स मुंचति सर्वकर्तृत्वं ॥१०४॥

तात्पर्यवृत्ति:—**एदेण दु सो कत्ता आदा णिच्छयविदूहिं परिकहिदो** एतेन पूर्वोक्तगाथात्रयव्याख्यानरूपेणाज्ञानभावेन स आत्मा कर्ता भणितः । कैर्निश्चयविद्भिर्निश्चयज्ञैः सर्वज्ञैः । तथाहि—वीतरागपरमसामायिकसंयमपरिणताभेदरत्नत्रयस्य प्रतिपक्षभूतेन पूर्वगाथात्रयव्याख्यानप्रकारेणाज्ञानभावेन यदात्मा परिणमति, तदा तस्यैव मिथ्यात्वरागादिरूपस्याज्ञानभावस्य कर्ता भवति । ततश्च द्रव्यकर्मबंधो भवति । यदा तु चिदानंदैकस्वभावशुद्धात्मानुभूतिपरिणामेन परिणमति, तदा सम्यग्ज्ञानी भूत्वा मिथ्यात्वरागादिभावकर्मरूपस्याज्ञानभावस्य कर्ता न भवति । तत्कर्तृत्वाभावेऽपि द्रव्यकर्मबंधोऽपि न भवति । **एवं खलु जो जाणदि सो मुंचदि सव्वकत्तित्तं** एवं गाथापूर्वार्द्धव्याख्यानप्रकारेण मनसि योऽसौ वस्तुस्वरूपं जानाति स सरागसम्यग्दृष्टिः सन्नशुभकर्मकर्तृत्वं मुंचति । निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा शुभाशुभसर्वकर्मकर्तृत्वं च मुंचति । एवमज्ञानात्कर्म प्रभवति सज्ज्ञानान्नश्यतीति स्थितं । इत्य ज्ञानिसज्ज्ञानिजीवप्रतिपादनमुख्यत्वेन द्वितीयस्थले गाथाषट्कं गतं । एवं द्विक्रियावादिनिराकरणविशेषव्याख्यानरूपेण द्वादशगाथा गताः । अथ पुनरप्युपसंहाररूपेणाष्टादशगाथापर्यंतं द्विक्रियावादिनिराकरणविषये विशेषव्याख्यानं करोति । तद्यथा—परभावानात्मा करोतीति यद्व्यवहारिणो वदंति स व्यामोह इत्युपदिशति ।

आत्मख्याति:—येनायमज्ञानात्परात्मनोरेकत्वविकल्पमात्मनः करोति तेनात्मा निश्चयतः कर्ता प्रतिभाति । यस्त्वेवं जानाति स समस्तं कर्तृत्वमुत्सृजति, ततः स खल्वकर्ता प्रतिभाति । तथाहि—इहायमात्मा किलाज्ञानी सन्नज्ञानादासंसारप्रसिद्धेन मिलितस्वादस्वादनेन मुद्रितभेदसंवेदनशक्तिरनादित एव स्यात् ततः परात्मानावेकत्वेन जानाति ततः क्रोधोऽहमित्यादिविकल्पमात्मनः करोति ततो निर्विकल्पादकृतकादेकविज्ञानघनात्प्रभ्रष्टो वारंवारमनेकविकल्पैः परिणमन् कर्ता प्रतिभाति । ज्ञानी तु सन् ज्ञाना

सदादिप्रसिद्धा प्रत्येकस्वादस्वादनेनो मुद्रितभेदसंवेदनशक्ति स्यात् । ततोऽनादिनियतानन्तरतरम्म[illegible] निरिऊरसांतरविविक्तान्य भधुरचैतन्यैकरसोयमात्मा भिन्नरसा कषायास्तै सह यदेकत्वविकल्पकरण [illegible] ज्ञानादित्येव नानात्वेन परात्मानौ जानाति । ततोऽकृतकमेकं ज्ञानमेवाहं न पुन कृतकोऽनेकः क्रोधा[illegible] दपीति क्रोधोहमित्यादिविकल्पमात्मनो मनागपि न करोति ततः समस्तमपि कर्तृत्वमपास्यति । ततो नि[illegible] मेवोदासीनावस्थो जानन् एवास्ते । ततो निर्विकल्पोऽकृतक एको विज्ञानघनो भूतोऽत्यन्तमकर्ता प्रतिभाति [illegible]

अज्ञानतस्तु सतृणाभ्यवहारकारी ज्ञानं स्वयं किल भवन्नपि रज्यते य ।
पीत्वा दधीक्षुमधुराम्लरसातिगृद्ध्या गां दोग्धि दुग्धमिव नूनमसौ रसालं ॥५७॥

अज्ञानान्मृगतृष्णिकां जलधिया धावंति पातुं मृगा अज्ञानात्तमसि द्रवंति भुजगाध्यासेन रज्जौ जना [illegible]
अज्ञानाच्च विकल्पचक्रकरणाद्वातोत्तरंगाब्धिवत् शुद्धज्ञानमया अपि स्वयममी कर्त्रीभवंत्याकुला ॥५[illegible]

ज्ञानाद्विवेचकतया तु परात्मनोर्यो जानाति हंस इव वा पयसोर्विशेषं ।
चैतन्यधातुमचलं स सदाधिरूढो जानीत एव हि करोति न किंचनापि ॥५९॥

ज्ञानादेव ज्वलनपयसोरौष्ण्यशैत्यव्यवस्था ज्ञानादेवोल्लसति लवणस्वादभेदव्युदास ।
ज्ञानादेव स्वरसविकसन्नित्यचैतन्यधातो क्रोधादेश्च प्रभवति भिदा भिन्दती कर्तृभावं ॥६०॥
अज्ञानं ज्ञानमप्येवं कुर्वन्नात्मानमंजसा । स्यात्कर्तात्मात्मभावस्य परभावस्य न क्वचित् ॥६१॥
आत्मा ज्ञानं स्वयं ज्ञानं ज्ञानादन्यत्करोति किं । परभावस्य कर्तात्मा मोहोऽयं व्यवहारिणां ॥६[illegible]

तथा हि—

ववहारेण दु एव करेदि घडपडरथाणि दव्वाणि ।
करणाणि य कम्माणि य णोकम्माणीह विविहाणि ॥१०[illegible]

व्यवहारेण त्वात्मा करोति घटपटरथान् द्रव्याणि ।
करणानि च कर्माणि च नोकर्माणीह विविधानि ॥१०८॥

तात्पर्यवृत्ति —**ववहारेण दु एवं करेदि घडपडरथाणि दव्वाणि** [illegible] व्यवहारेणैव तु पुन घटपटरथादिबहिर्द्रव्याणीहापूर्वेण करोत्यात्मा **करणाणि य कम्माणि य णोक-म्माणीह विविहाणि** तथाभ्यंतरपि करणानीन्द्रियाणि च नोकर्माणि इह जगति विविधानि [illegible] द्रव्यकर्माणीहापूर्वेणानिरूपेण करोतीति मन्यते, ततोस्ति व्यामोहो भूतो व्यवहारिणां । [illegible] सत्या न भवतीति कथयति ।

आत्मख्याति —व्यवहारिणां हि यतो यथायमात्मात्मविकल्पव्यापाराभ्यां [illegible] घटादिपरद्रव्यात्मकं बहिःकर्म कुर्वन् प्रतिभाति ततस्तथा क्रोधादिपरद्रव्यात्मकं च समस्तमन्तःकर्मापि करोत्य[illegible] व्यामोह । स न सन्—

जदि सो परदव्वाणि य करिज्ज णियमेण तम्मओ होज्ज ।
जह्मा ण तम्मओ तेण सो ण तेसिं हवदि कत्ता ॥१०९॥

यदि स परद्रव्याणि च कुर्यान्नियमेन तन्मयो भवेत् ।
यस्मान्न तन्मयस्तेन स न तेषां भवति कर्ता ॥१०९॥

तात्पर्यवृत्ति —**जदि सो परदव्वाणि य करिज्ज णियमेण तम्मओ होज्ज** यदि स [illegible] परद्रव्याणि नियमेनैकान्तेन करोति तेन तन्मय स्यात् **जह्मा ण तम्मओ तेण सो ण तेसिं हवदि कत्ता** यस्मात्सहजशुद्धस्वाभाविकज्ञानगुणाविच्छिन्न स्वरूप परद्रव्येण सह तन्मयो न भवति । [illegible]

---

१ अत्र अन्यत्र इत्यपि पाठ. ।

आत्मा तेषां परद्रव्याणामुपादानरूपेण कर्ता न भवतीत्यभिप्रायः । अथ न केवलमुपादानरूपेण कर्ता न भवति किंतु निमित्तरूपेणापीत्युपदिशति ।

आत्मख्याति —यदि खल्वयमात्मा परद्रव्यात्मकं कर्म कुर्यात् तदा परिणामपरिणामिभावान्यथानुपपत्तेर्नियमेन तन्मयः स्यात् न च द्रव्यांतरमयत्वे द्रव्योच्छेदापत्तेस्तन्मयोऽस्ति । ततो व्याप्यव्यापकभावेन न तस्य कर्तास्ति । निमित्तनैमित्तिकभावेनापि न कर्तास्ति ।

जीवो ण करेदि घडं णेव पडं णेव सेसगे दव्वे ।
जोगुवओगा उप्पादगा य सो तेसिं हवदि कत्ता ॥१०७॥

जीवो न करोति घटं नैव पटं नैव शेषकानि द्रव्याणि ।
योगोपयोगावुत्पादकौ च तयोर्भवति कर्ता ॥१०७॥

तात्पर्यवृत्ति —**जीवो ण करेदि घडं णेव पडं णेव सेसगे दव्वे** न केवलमुपादानरूपेण निमित्तरूपेणापि जीवो न करोति घटं न पटं नैव शेषद्रव्याणि । कुत इति चेत् ? नित्यं सर्वकालं कर्मकर्तृत्वानुषंगात् । कस्तर्हि करोति **जोगुवओगा उप्पादगा य** आत्मनो विकल्पव्यापाररूपौ विनश्वरौ योगोपयोगावेव तत्रोत्पादकौ भवतः । **सो तेसिं हवदि कत्ता** सुखदुःखजीवितमरणादिसमताभावनापरिणताभेदरत्नत्रयलक्षणभेदविज्ञानाभावाद्यदा काले शुद्धबुद्धैकस्वभावात्परमात्मस्वरूपाद्भ्रष्टो भवति तदा स जीवस्तयोर्योगोपयोगयोः कदाचित्कर्ता भवति । न सर्वदा । अत्र योगशब्देन बहिरंगहस्तादिव्यापारः उपयोगशब्देन चांतरंगविकल्पो गृह्यते । *इति परंपरया निमित्तरूपेण घटादिविषये जीवस्य कर्तृत्वं स्यात् यदि पुनः* मुख्यवृत्त्या निमित्तकर्तृत्वं भवति तर्हि जीवस्य नित्यत्वात् सर्वदैव कर्मकर्तृत्वप्रसंगात् मोक्षाभावः । इति व्यवहारव्याख्यानमुख्यत्वेन गाथात्रयं गतं । अथ वीतरागस्वसंवेदनज्ञानी ज्ञानस्यैव कर्ता न च परभावस्येति कथयति ।

आत्मख्याति —यत्किल घटादि क्रोधादि वा परद्रव्यात्मकं कर्म तदयमात्मा तन्मयत्वानुषंगाद् व्याप्यव्यापकभावेन तावन्न करोति नित्यकर्तृत्वानुषंगान्निमित्तनैमित्तिकभावेनापि न तत्कुर्यात् । अनित्यौ योगोपयोगावेव तत्र निमित्तत्वेन कर्तारौ योगोपयोगयोस्त्वात्मविकल्पव्यापारयोः कदाचिदज्ञानेन करणादात्मापि *कर्तास्तु तथापि न परद्रव्यात्मककर्मकर्ता स्यात् । ज्ञानी ज्ञानस्यैव कर्ता स्यात् ।*

जे पुग्गलदव्वाणं परिणामा होंति णाणआवरणा ।
ण करेदि ताणि आदा जो जाणदि सो हवदि णाणी ॥१०८॥

ये पुद्गलद्रव्याणां परिणामा भवंति ज्ञानावरणानि ।
न करोति तान्यात्मा यो जानाति स भवति ज्ञानी ॥१०८॥

तात्पर्यवृत्ति. —**जे पुग्गलदव्वाणं परिणामा होंति णाणआवरणा** ये कर्मवर्गणायोग्यपुद्गलपरिणामाः पर्याया ज्ञानावरणादिद्रव्यकर्मरूपा भवंति **ण करेदि ताणि आदा** तान् पर्यायान् व्याप्यव्यापकभावेन मृत्तिकाकलशमिवात्मा न करोति गोरसाध्यक्षवत् **जो जाणदि सो हवदि णाणी** इति यो जानाति मिथ्यात्वविषयकषायपरित्यागं कृत्वा निर्विकल्पसमाधौ स्थितः सन् स ज्ञानी भवति । न च परिज्ञानमात्रेण । इदमत्र तात्पर्यं । वीतरागस्वसंवेदनज्ञानी जीवः शुद्धनयेन शुद्धोपादानरूपेण शुद्धज्ञानस्यैव कर्ता । स्थितिमिति चेत् । पीतत्वादिगुणानां सुवर्णवत् उष्णत्वादिगुणानामग्निवत् अनंतज्ञानादिगुणानां सिद्धपरमेष्ठिवदिति । न च मिथ्यात्वरागादिरूपस्याज्ञानभावस्य कर्तेति शुद्धोपादानरूपेण शुद्धज्ञानादिभावानामशुद्धोपादानरूपेण

...नुभवन्तीति । एवमेव च ज्ञानावरणपदपरिवर्तनेन दर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायसप्तसूत्राणि ... क्रोधमानमायालोभनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि ... । अत्र प्रकारेण शुद्धात्मानुभूतिविलक्षणा असंख्येयलोकमात्रप्रमिता अन्येऽपि विभाव ... । अथाज्ञानी यदि रागादिविभावस्याज्ञानभावस्य कर्ता न च ज्ञानावरणादिपरद्रव्य कर्तेति निरूपयति ।

आत्मख्याति —ये खलु पुद्गलद्रव्याणां परिणामा गोरसव्याप्तदधिदुग्धमधुराम्लपरिणामवत्पुद्गल द्रव्यव्याप्तत्वेन भवन्तो ज्ञानावरणानि भवन्ति तानि तटस्थगोरसाध्यक्ष इव न नाम करोति ज्ञानी किंतु यथा स गोरसाध्यक्षस्तद्दर्शनमात्मव्याप्तत्वेन प्रभवद्व्याप्य पश्यत्येव तथा पुद्गलद्रव्यपरिणामनिमित्तं ज्ञानमात्मव्याप्यत्वेन प्रभवद्व्याप्य जानात्येव ज्ञानी ज्ञानस्यैव कर्ता स्यात् । एवमेव च ज्ञानावरणपदपरिवर्तनेन कर्मसूत्रस्य विभागेनोपन्यासाद्दर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायसूत्रैः सप्तभिः सह मोहरागद्वेषक्रोधमानमाया लोभनोकर्ममनोवचनकायश्रोत्रचक्षुर्घ्राणरसनस्पर्शनसूत्राणि षोडश व्याख्येयानि । अनयादिशान्यान्यप्यूह्यानि । अज्ञानी चापि परभावस्य न कर्ता स्यात् ।

जं भावं सुहमसुहं करेदि आदा स तस्स खलु कत्ता ।
तं तस्स होदि कम्मं सो तस्स दु वेदगो अप्पा ॥१०९॥

यं भावं शुभमशुभं करोत्यात्मा स तस्य खलु कर्ता ।
तत्तस्य भवति कर्म स तस्य तु वेदक आत्मा ॥१०९॥

तात्पर्यवृत्ति —**जं भावं सुहमसुहं करेदि आदा स तस्स खलु कत्ता** सातासातोदयावस्थाभ्यां तीव्रमन्दस्वादाभ्यां सुखदुःखरूपाभ्यां वा चिदानंदैकस्वभावेनैकस्याप्यात्मनो द्विधाभेदं कुर्वाणः सन् यं भावं शुभमशुभं वा करोत्यात्मा स्वतंत्ररूपेण व्यापकत्वात्स तस्य भावस्य खलु स्फुटं कर्ता भवति **तं तस्स होदि कम्मं** तदेव तस्य शुभाशुभरूपं भावकर्म भवति । तेनात्मना क्रियमाणत्वात् **सो तस्स दु वेदगो अप्पा** स आत्मा तस्य तु शुभाशुभरूपस्य भावकर्मणो वेदको भोक्ता भवति स्वतंत्ररूपेण भोक्तृत्वात् न च द्रव्यकर्मणः । किं च विशेषः । अज्ञानी जीवः शुद्धनिश्चयनयेनाशुद्धोपादानरूपेण मिथ्यात्वरागादिभावानामेव कर्ता न च द्रव्यकर्मणः स चाशुद्धनिश्चयः । यद्यपि द्रव्यकर्मकर्तृत्वरूपासद्भूतव्यवहारापेक्षया निश्चयसंज्ञां लभते तथापि शुद्धनिश्चयापेक्षया व्यवहार एव । हे भगवन् रागादीनामशुद्धोपादानरूपेण कर्तृत्वं भणितं तदुपादानं शुद्धाशुद्धभेदेन कथं द्विधा भवतीति । तत्कथ्यते । औपाधिकमुपादानमशुद्धं तप्तायःपिंडवत्, निरुपाधिरूपमुपादानं शुद्धं पीतत्वादिगुणानां सुवर्णवत् अनंतज्ञानादिगुणानां सिद्धजीववत् उष्णत्वादिगुणानामग्निवत् । इदं व्याख्यानमुपादानकारणव्याख्यानकाले शुद्धाशुद्धोपादानरूपेण सर्वत्र स्मरणीयमिति भावार्थः । अथ न च परभावः केनाप्युपादानरूपेण कर्तुं शक्यते ।

आत्मख्याति —इह खल्वनादेरज्ञानात्परात्मनोरेकत्वाध्यासेन पुद्गलकर्मविपाकदशाभ्यां मंद तीव्रस्वादाभ्यामचलितविज्ञानघनैकस्वादस्याप्यात्मनः स्वादं भिंदानः शुभमशुभं वा योयं भावमज्ञानरूपमात्मा करोति स आत्मा तदा तन्मयत्वेन तस्य भावस्य व्यापकत्वाद्भवति कर्ता, स भावोपि च तदा तन्मयत्वेन तस्यात्मनो व्याप्यत्वात् भवति कर्म । एवमज्ञानी चापि परभावस्य न कर्ता स्यात् । न च परभावः केनापि कर्तुं पार्येत ।

जो जह्मि गुणो दव्वे सो अण्णह्मि दु ण संकमदि दव्वे ।
सो अण्णमसंकंतो कह तं परिणामए दव्वं ॥११०॥

यो यस्मिन् गुणो द्रव्ये सोऽन्यस्मिंस्तु न संक्रामति द्रव्ये ।
सोऽन्यदसंक्रान्तः कथं तत्परिणामयति द्रव्यं ॥११०॥

तात्पर्यवृत्ति —जो जह्मि गुणो दव्वे सो अण्ण दु ण संकमदि दव्वे यो गुणश्चेतनमल-श्चेतनो वा यस्मिश्चेतनाचेतने द्रव्ये अनादिसंबंधेन स्वभावत एव स्वत एव प्रवृत्त सोऽन्यद्रव्ये तु न सक्रमत्येव सापि **सो अण्णमसंकतो कह त परिणामए दव्व** स चेतनोऽचेतनो वा गुण कर्ता अन्यद्विन द्रव्यांतरमसक्रांत सन् कथ द्रव्यातर परिणामयेत्तत्कथ कुर्यादुपादानरूपेण न कथमपि । तत स्थित आत्मा पुद्गलकर्मणामकर्तेति ।

आत्मख्याति'—इह किल यो यावान् कश्चिद्वस्तुविशेषो यस्मिन् यावति कस्मिंश्चिच्चिदात्मन्यचिदात्मनि वा द्रव्ये गुणे च स्वरसत एवानादित एव वृत्त स खल्वचलितस्य वस्तुस्थितिसीम्नो भेत्तुमशक्यत्वात्तस्मिन्नेव वर्तते न पुन द्रव्यातर गुणातर वा सक्रामेत । द्रव्यातर गुणातर वाऽसक्रामश्च कथ त्वन्य वस्तुविशेष परिणामयेत् । अत परभाव केनापि न कर्तुं पार्येत । अत स्थित खल्वात्मा पुद्गलकर्मणामकर्ता ।

दव्वगुणस्स य आदा ण कुणदि पुग्गलमयह्मि कम्मह्मि ।
त उभयमकुव्वंतो तह्मि कहं तस्स सो कत्ता ॥१११॥

द्रव्यगुणस्य चात्मा न करोति पुद्गलमये कर्मणि ।
तदुभयमकुर्वंस्तस्मिन्कथ तस्य स कर्ता ॥१११॥

तात्पर्यवृत्ति —दव्वगुणस्स य आदा ण कुणदि पुग्गलमयह्मि कम्मह्मि यथा कुभकार कर्ता मृन्मयकलशकर्मविषये मृत्तिकाद्रव्यस्य सबधि जडस्वरूप वर्णादिमृत्तिकाकलशमिव तन्मयत्वेन न करोति तथात्मापि पुद्गलमयद्रव्यकर्मविषये पुद्गलद्रव्यकर्मसबधिजडस्वरूप वर्णादिपुद्गलद्रव्यगुणसबधि स्वरूप वा तन्मयत्वेन न करोति **त उभयमकुव्वंतो तह्मि कह तस्स सो कत्ता** तदुभयमपि पुद्गलद्रव्यकर्मस्वरूप वर्णादितद्गुण वा तन्मयत्वेनाकुर्वाण सन् तत्र पुद्गलकर्मविषये स जीव कथ कर्ता भवति न कथमपि । चेतनाचेतनेन परस्वरूपेण न परिणमतीत्यर्थ । अनेन किमुक्त भवति यथा स्फटिको निर्मलोऽपि जपापुष्पादिपरोपाधिना परिणमति तथा कोऽपि सदाशिवनामा सदामुक्तोऽप्यमूर्तोऽपि परोपाधिना परिणम्य जगत् करोति त निरस्त । कस्मादिति चेत् । मूर्तस्फटिकस्य मूर्तेन सहोपाधिसबधो घटते तस्य पुन सदामुक्तस्यामूर्तस्य कथ मूर्तोपाधि ? न कथमपि सिद्धजीववत् । अनादिबधजीवस्य पुन शक्तिरूपेण शुद्धनिश्चयनयामूर्तस्यापि व्यक्तिरूपेण व्यवहारेण मूर्तस्य मूर्तोपाधिदृष्टांतो घटत इति भावार्थ । एव निश्चयनयमुख्यत्वेनगाथाचतुष्टय गत । अत कारणादात्मा द्रव्यकर्म करोतीति यदभिधीयते स उपचार ।

आत्मख्याति—यथा खलु मृन्मये कलशकर्मणि मृद्द्रव्यमृद्गुणयो स्वरसत एव वर्तमाने द्रव्यगुणातरसक्रमस्य वस्तुस्थित्यैव निषिद्धत्वादात्मानमात्मगुण वा नाधत्ते स कलशकार द्रव्यातरसक्रममतरेणान्यस्य वस्तुन परिणमयितुमशक्यत्वात् तदुभय तु तस्मिन्ननादधानो न तत्त्वतस्तस्य कर्ता प्रतिभाति । तथा पुद्गलमयज्ञानावरणादौ कर्मणि पुद्गलद्रव्यपुद्गलगुणयो स्वरसतएव वर्तमाने द्रव्यगुणातरसक्रमस्य विधातुमशक्यत्वादात्मद्रव्यमात्मगुण वात्मा न खल्वाधत्ते । द्रव्यातरसक्रममतरेणान्यस्य वस्तुन परिणमयितुमशक्यत्वात्तदुभय तु तस्मिन्ननादधान कथ नु तत्त्वतस्तस्य कर्ता प्रतिभायात् । तत स्थित खल्वात्मा पुद्गलकर्मणामकर्ता । अतोऽन्यस्तूपचार ।

जीवह्मि हेदुभूदे बधस्स दु पस्सिदूण परिणाम ।
जीवेण कद कम्म भण्णदि उवयारमत्तेण ॥११२॥

जीवे हेतुभूते बधस्य तु दृष्ट्वा परिणाम ।
जीवेन कृत कर्म भण्यते उपचारमात्रेण ॥११२॥

तात्पर्यवृत्ति —जीवम्हि हेदुभूदे बंधस्स दु पस्सिदूण परिणामं परमोपेक्षासंयमभावनापरिणताभेदरत्नत्रयलक्षणस्य भेदज्ञानस्याभावे मिथ्यात्वरागादिपरिणतिनिमित्तहेतुभूते जीवे सति मेघाडंबरचंद्रार्कपरिवेषादियोग्यकाले निमित्तभूते सति मेघेंद्रचापादिपरिणतपुद्गलानामिव कर्मवर्गणायोग्यपुद्गलानां ज्ञानावरणादिरूपेण द्रव्यकर्मबंधस्य परिणामं पर्यायं दृष्ट्वा जीवेण कदं कम्मं भण्णदि उवयारमत्तेण जीवेन कृतं कर्मेति भण्यते उपचारमात्रेणेति । अथ तदेवोपचारकर्मकर्तृत्वं दृष्टांतदार्ष्टांताभ्यां दृढयति ।

आत्मख्याति—इह खलु पौद्गलिककर्मणः स्वभावादनिमित्तभूतस्याप्यात्मनोऽनादेरज्ञानात्तन्निमित्तभूतेनाज्ञानभावेन परिणमनान्निमित्तीभूते सति संपद्यमानत्वात् पौद्गलिकं कर्मात्मना कृतमिति निर्विकल्पविज्ञानघनभ्रष्टानां विकल्पपराणां परेषामस्ति विकल्पः । स तूपचार एव न तु परमार्थः । कथं इति चेत् ।

जोधेहि कदे जुद्धे राएण कदंति जंपदे लोगो ।
तह ववहारेण कदं णाणावरणादि जीवेण ॥११३॥

योधैः कृते युद्धे राज्ञाकृतमिति जल्पते लोकः ।
व्यवहारेण तथा कृतं ज्ञानावरणादि जीवेन ॥११३॥

तात्पर्यवृत्ति—जोधेहि कदे जुद्धे राएण कदंति जंपदे लोगो यथा योधैः युद्धे कृते सति राज्ञा युद्धं कृतमिति जल्पति लोकः । तह ववहारेण कदं णाणावरणादि जीवेण तथा व्यवहारनयेन कृतं भण्यते ज्ञानावरणादिकर्म जीवेनेति । ततः स्थितमेतत् । यद्यपि शुद्धनिश्चयनयेन शुद्धबुद्धैकस्वभावत्वान्नोत्पादयति न करोति न बध्नाति न परिणमयति न गृह्णाति च तथापि ।

आत्मख्याति—यथा युद्धपरिणामेन स्वयं परिणममानैः योधैः कृते युद्धे युद्धपरिणामेन स्वयमपरिणममानस्य राज्ञो राज्ञा किल कृतं युद्धमित्युपचारो न परमार्थः । तथा ज्ञानावरणादिकर्मपरिणामेन स्वयं परिणममानेन पुद्गलद्रव्येण कृते ज्ञानावरणादिकर्मणि ज्ञानावरणादिकर्मपरिणामेन स्वयमपरिणममानस्यात्मनः किलात्मना कृतं ज्ञानावरणादिकर्मेत्युपचारो न परमार्थः । अत एतत्स्थितं ।

उप्पादेदि करेदि य बंधदि परिणामएदि गिण्हदि य ।
आदा पुग्गलदव्वं ववहारणयस्स वत्तव्वं ॥११४॥

उत्पादयति करोति च बध्नाति परिणमयति गृह्णाति च ।
आत्मा पुद्गलद्रव्यं व्यवहारनयस्य वक्तव्यं ॥११४॥

तात्पर्यवृत्ति —अनादिबंधपर्यायवशात् वीतरागस्वसंवेदनलक्षणभेदज्ञानाभावात् [illegible] स्निग्धः सन्नात्मा कर्मवर्गणायोग्यपुद्गलद्रव्यं कुंभकारो घटमिव द्रव्यकर्मरूपेणोत्पादयति करोति स्थितिबंधं बध्नात्यनुभागबंधं परिणमयति प्रदेशबंधं तप्तायःपिंडो जलवदात्मप्रदेशैर्गृह्णाति चेत्यभिप्रायः । अथ तस्य व्याख्यानं दृष्टांतदार्ष्टांताभ्यां समर्थयति ।

आत्मख्याति —अयं खल्वात्मा न गृह्णाति न परिणमयति नोत्पादयति न करोति न बध्नाति व्याप्यव्यापकभावाभावात् । प्राप्यं विकार्यं निर्वर्त्यं च पुद्गलद्रव्यात्मकं कर्म यत्तु व्याप्यव्यापकभावाभावेऽपि प्राप्यं विकार्यं निर्वर्त्यं च पुद्गलद्रव्यात्मकं कर्म गृह्णाति परिणमयत्युत्पादयति करोति बध्नाति चात्मेति विकल्पः स किलोपचारः । कथमिति चेत् ।

जह राया ववहारा दोसगुणुप्पादगोत्ति आलविदो ।
तह जीवो ववहारा दव्वगुणुप्पादगो भणिदो ॥११५॥

यथा राजा व्यवहाराद्दोषगुणोत्पादक इत्यालपितः ।
तथा जीवो व्यवहाराद्द्रव्यगुणोत्पादको भणितः ॥११५॥

तात्पर्यवृत्तिः—जह राया ववहारा दोसगुणुप्पादगोत्ति आलविदो यथा राजा क्वापि व्यवहारेण प्रजानां दोषगुणोत्पादको भणितः तह जीवो ववहारा दव्वगुणुप्पादगो भणिदो तथा जीवोऽपि व्यवहारेण पुद्गलद्रव्यस्य पुण्यपापगुणोत्पादको भणितः । इति व्यवहारमुख्यत्वेन सूत्रचतुष्टयं गतं । एवं द्विक्रियावादिनिराकरणोपसंहारव्याख्यानमुख्यत्वेनैकादशगाथा गताः ।

ननु निश्चयेन द्रव्यकर्म न करोत्यात्मा बहुधा व्याख्यातं तेनैव द्विक्रियावादिनिराकरणं सिद्धं पुनरपि किमर्थं [illegible] । नैव हेतुहेतुमद्भावव्याख्यानज्ञापनार्थमिति नास्ति दोषः । तथाहि—यस्माद्धेतोः निश्चयेन द्रव्यकर्म न करोति तस्माद्धेतोर्द्विक्रियावादिनिराकरणं सिद्धमिति हेतुमद्भावव्याख्यानं ज्ञातव्यं । इति पुण्य[illegible]पीठिकारूपे महाधिकारमध्ये पूर्वोक्तप्रकारेण जदि सो पुग्गलदव्वं करेदि [illegible] । अत ऊर्ध्वं द्वादशगाथाभिरग्रस्थैव [illegible] पुनरपि [illegible] समुदायेन पञ्चविंशतिगाथाभिः द्विक्रियावादिनिरा[illegible] ।

[illegible] सामण्णपच्चया इत्यादिगाथामादिं कृत्वा पाठक्रमेण सप्तगाथापर्यंतं [illegible] । तत्र सप्तकमध्ये जैनमते शुद्धनिश्चयेन शुद्धोपादानरूपेण जीव[illegible] । अथवा शुद्धनिश्चयेन [illegible] मिथ्यात्वानुगतिना सांख्येन दूषणं दत्तं । कथमिति चेत् । [illegible] दूषणं । अथवा [illegible] दूषणं । तदनंतरं शुद्धनिश्चयेन शुद्धोपादानरूपेण [illegible] । अथवा पूर्वोक्त [illegible] दूषणं । [illegible] दूषणं । [illegible] समुदायपातनिका । तद्यथा—निश्चयेन मिथ्यात्वादि[illegible] ।

[illegible]

[illegible] पुद्गलकर्म [illegible] ।
[illegible] ॥११॥

सामण्णपच्चया खलु चउरो भण्णंति बंधकत्तारो ।
मिच्छत्तं अविरमणं कसायजोगा य बोद्धव्वा ॥११६॥
तेसिं पुणोवि य इमो भणिदो भेदो दु तेरसवियप्पो ।
मिच्छादिट्ठीआदी जाव सजोगिस्स चरमंतं ॥११७॥
एदे अचेदणा खलु पुग्गलकम्मुदयसंभवा जम्हा ।
ते जदि करंति कम्मं णवि तेसिं वेदगो आदा ॥११८॥

गुणसण्णिदा दु एदे कम्मं कुव्वंति पच्चया जह्मा ।
तह्मा जीवो कत्ता गुणा य कुव्वंति कम्माणि ॥११९॥

सामान्यप्रत्ययाः खलु चत्वारो भण्यन्ते बंधकर्तारः ।
मिथ्यात्वमविरमणं कषाययोगौ च बोद्धव्याः ॥११६॥
तेषां पुनरपि चायं भणितो भेदस्तु त्रयोदशविकल्पः ।
मिथ्यादृष्ट्यादिर्यावत्सयोगिनश्चरमांतः ॥११७॥
एते अचेतनाः खलु पुद्गलकर्मोदयसंभवा यस्मात् ।
ते यदि कुर्वंति कर्म नापि तेषां वेदक आत्मा ॥११८॥
गुणसंज्ञितास्तु एते कर्म कुर्वंति प्रत्यया यस्मात् ।
तस्माज्जीवो कर्ता गुणाश्च कुर्वंति कर्माणि ॥११९॥

तात्पर्यवृत्तिः —**सामण्णपच्चया खलु चउरो भण्णंति बंधकत्तारो** निश्चयनयेनाभेदविवक्षायां पुद्गल एक एव कर्ता भेदविवक्षायां तु सामान्यप्रत्यया मूलप्रत्यया खलु स्फुटं चत्वारो बंधस्य कर्तारो भण्यन्ते सर्वज्ञैः उत्तरप्रत्ययाश्च पुनर्बहवो भवंति । सामान्यं कोऽर्थः । विवक्षाया अभावः सामान्यमिति सामान्यशब्दस्यार्थः सर्वत्र सामान्यव्याख्यानकाले ज्ञातव्य इति । **मिच्छत्तं अविरमणं कसायजोगा य बोद्धव्वा** ते च मिथ्यात्वाविरतिकषाययोगा बोद्धव्याः । अथ—**तेसिं पुणो वि य इमो भणिदो भेदो दु तेरसवियप्पो** तेषां प्रत्ययानां गुणस्थानभेदेन पुनरपि भणितो भेदस्त्रियोदशविकल्पः केन प्रकारेण **मिच्छादिट्ठी आदी जावसजोगिस्स चरमंतं** मिथ्यादृष्टिगुणस्थानादिसयोगिभट्टारकस्य चरमसमयं यावदिति । अथ **एदे अचेदणा खलु पुग्गलकम्मुदयसंभवा जह्मा** एते मिथ्यात्वादिभावप्रत्ययाः शुद्धनिश्चयेनाचेतनाः खलु स्फुटं । कस्मात् पुद्गलकर्मोदयसंभवा यस्मादिति । यथा स्त्रीपुरुषाभ्यां समुत्पन्नः पुत्रो विवक्षावशेन देवदत्तायाः पुत्रोऽयं केचन वदंति । देवदत्तस्य पुत्रोऽयमिति केचन वदंति दोषो नास्ति । तथा जीवपुद्गलसंयोगेनोत्पन्नाः मिथ्यात्वरागादिभावप्रत्यया अशुद्धनिश्चयेनाशुद्धोपादानरूपेण चेतना जीवसंबद्धाः शुद्धनिश्चयेन शुद्धोपादानरूपेणाचेतनाः पौद्गलिकाः परमार्थतः । पुनरेकांतेन न जीवरूपाः न च पुद्गलरूपाः सुधाहरिद्रयोः संयोगपरिणामवत् । वस्तुतस्तु सूक्ष्मशुद्धनिश्चयनयेन न संत्येवाज्ञानोद्भवाः कल्पिता इति । एतावता किमुक्तं भवति । ये केचन एकांतेन रागादयो जीवसंबंधिनः पुद्गलसंबंधिनो वा तदुभयमपि वचनं मिथ्या । कस्मादिति चेत् पूर्वोक्तस्त्रीपुरुषदृष्टांतेन संयोगोद्भवत्वात् । अथ मतं सूक्ष्मशुद्धनिश्चयनयेन कस्येति पृच्छामो वयं सूक्ष्मशुद्धनिश्चयेन तेषामस्तित्वमेव नास्ति पूर्वमेव भणितं तिष्ठति कथमुत्तरं प्रयच्छाम इति । **ते जदि करंति कम्मं** ते प्रत्यया यदि चेत् कुर्वंति कर्म तदा कुर्युरेव जीवस्य किमायातं शुद्धनिश्चयेन सम्मतमेव 'सव्वे सुद्धा हु सुद्धणया' इति वचनात् । अथमतं । जीवो मिथ्यात्वोदयेन मिथ्यादृष्टिर्भूत्वा मिथ्यात्वरागादिभावकर्म भुंक्ते यतस्ततः कर्तापि भवतीति । नैवं । **णवि तेसिं वेदगो आदा** यतः शुद्धनिश्चयेन वेदकोऽपि न हि तेषां कर्मणां । यदा वेदको न भवति तदा कर्तापि कथं भविष्यति न कथमपि इति शुद्धनिश्चयेन सम्मतमेव । अथवा ये पुनरेकांतेनाकर्तेति वदंति तान्प्रति दूषणं कथमिति चेत् ? यद्येकांतेनाकर्ता भवति तदा यथा शुद्धनिश्चयेनाकर्ता तथा व्यवहारेणाप्यकर्ता प्राप्नोति । ततश्च सर्वथैवाकर्तृत्वे सति संसाराभाव इत्येकं दूषणं । तेषां मते वेदकोऽपि न भवतीति द्वितीयं च दूषणं । अथ च वेदकमभ्युपगमन्यते सांख्यास्तेषां स्वमतव्याघातदूषणं प्राप्नोतीति । अथ—**गुणसण्णिदा दु एदे कम्मं कुव्वंति पच्चया जह्मा** ततः स्थितं गुणस्थानसंज्ञिताः प्रत्ययाः एते कर्म कुर्वंतीति यस्मादेव पूर्वसूत्रेण भणितं । **तह्मा जीवो कत्ता गुणा य कुव्वंति कम्माणि** तस्मात् शुद्धनिश्चयेन तेषां कर्मणां जीवः कर्ता न

भवति। गुणस्थानसंज्ञिताः प्रत्ययाः एव कर्म कुर्वन्तीति सम्बन्धः। एवं शुद्धनिश्चयेन प्रत्यया एव कर्म कुर्वन्तीति व्याख्यानरूपेण गाथाचतुष्टयं गतं। अथ न च जीवप्रत्यययोरेकत्वमिति कथयति।

आत्मख्यातिः — पुद्गलकर्मणः किल पुद्गलद्रव्यमेवैकं कर्तृ तद्विशेषाः मिथ्यात्वाविरतिकषाययोगा बंधस्य सामान्यहेतुतया चत्वारः कर्तारः तएव विकल्प्यमाना मिथ्यादृष्ट्यादिसयोगकेवल्यंतास्त्रयोदश कर्तारः। अथैते पुद्गलकर्मविपाकविकल्पत्वादत्यंतमचेतनाः सतस्त्रयोदश कर्तारः केवला एव यदि व्याप्यव्यापकभावेन किंचनापि पुद्गलकर्म कुर्युस्तदा कुर्युरेव किं जीवस्यात्रापतितं। अथायं तर्कः। पुद्गलमयमिथ्यात्वादीन् वेदयमानो जीवः स्वयमेव मिथ्यादृष्टिर्भूत्वा पुद्गलकर्म करोति स किलाविवेको यतो न खल्वात्मा भाव्यभावकभावाभावात्। पुद्गलद्रव्यमयमिथ्यात्वादिवेदकोपि कथं पुनः पुद्गलकर्मणः कर्ता नाम। अथैतदायातं यतः पुद्गलद्रव्यमयानां चतुर्णां सामान्यप्रत्ययानां विकल्पास्त्रयोदश विशेषप्रत्यया गुणशब्दवाच्याः केवला एव कुर्वंति कर्माणि। ततः पुद्गलकर्मणामकर्ता जीवो गुणा एव तत्कर्तारस्ते तु पुद्गलद्रव्यमेव। ततः स्थितं पुद्गलकर्मणः पुद्गलद्रव्यमेवैकं कर्तृ। न च जीवप्रत्यययोरेकत्वं।

> **जह जीवस्स अणण्णुवओगो कोघो वि तह जदि अणण्णो।**
> **जीवस्साजीवस्स य एवमणण्णत्तमावण्णं ॥ १२० ॥**
> **एवमिह जो दु जीवो सो चेव दु णियमदो तहाजीवो।**
> **अयमेयत्ते दोसो पच्चयणोकम्मकम्माणं ॥१२१॥**
> **अह पुण अण्णो कोहो अण्णुवओगप्पगो हवदि चेदा।**
> **जह कोहो तह पच्चय कम्म णोकम्ममवि अण्णं ॥१२२॥**

> यथा जीवस्यानन्य उपयोगः क्रोधोपि तथा यद्यनन्यः।
> जीवस्याजीवस्य चैवमनन्यत्वमापन्नं ॥१२०॥
> एवमिह यस्तु जीवः स चैव तु नियमतस्तथाजीवः।
> अयमेकत्वे दोषः प्रत्ययनोकर्मकर्मणां ॥१२१॥
> अथपुनरन्यः क्रोधोऽन्य उपयोगात्मको भवति चेतयिता।
> यथा क्रोधस्तथा प्रत्ययाः कर्म नोकर्माप्यन्यत् ॥१२२॥

तात्पर्यवृत्तिः—**जह जीवस्स अणण्णुवओगो** यथा जीवस्यानन्यस्तन्मयो ज्ञानदर्शनोपयोगः। कस्मात् अनन्यवेद्यत्वात् अशक्यविवेचनत्वात् चाग्नेरुष्णत्ववत् **कोहो वि तह जदि अणण्णो** तथा क्रोधोपि यद्यनन्यो भवत्येकांतेन तदा किं दूषणं **जीवस्साजीवस्स य एवमणण्णत्तमावण्णं** एवमभेदे सति सहजशुद्धाखंडैकज्ञानदर्शनोपयोगमयजीवस्याजीवस्य चैकत्वमापन्नमिति। अथ—**एवमिह जो दु जीवो सो चेव दु णियमदो तहाजीवो** एवं पूर्वोक्तसूत्रव्याख्यानक्रमेण य एव जीवः स एव तथैवाजीवो भवति नियमान्निश्चयात्। तथा सति जीवाभावाद् दूषणं प्राप्नोति। **अयमेयत्ते दोसो पच्चयणोकम्मकम्माणं** अयमेव च दोषो जीवाभावरूपः। कस्मिन् सति। एकांतेन निरंजननिजानंदैकलक्षणजीवेन सहैकत्वे सति। केषां। मिथ्यात्वादिप्रत्ययनोकर्मकर्मणामिति। अथ प्राकृतलक्षणबलेन प्रत्ययशब्दस्य ह्रस्वत्वमिति। **अह पुण अण्णो कोहो अण्णुवओगप्पगो हवदि चेदा** अथ पुनरभिप्रायो भवतां पूर्वोक्तजीवाभावदूषणभयात् अन्योभिन्नो जीवादन्यश्च विशुद्धज्ञानदर्शनमय आत्मा क्रोधात्सकाशात्। **जह कोहो तह पच्चय कम्म णोकम्म** माणि अथवा यथा जडः क्रोधो निश्चयेन स्वस्वभावजीवाद्भिन्नस्तथा प्रत्ययकर्म नोकर्माण्यपि भिन्नानि शुद्ध

निश्चयेन सम्मतएव । किंच शुद्धनिश्चयेन जीवस्याकर्तृत्वमभोक्तृत्व च क्रोधादिभ्यश्च भिन्नत्व च भवतीति [illegible] व्याख्याने कृते सति द्वितीयपक्षे व्यवहारेण कर्तृत्व भोक्तृत्व च क्रोधादिभ्यश्चाभिन्नत्व च लभ्यत एव [illegible] कस्मात् । निश्चयव्यवहारयो परस्परसापेक्षत्वात् । कथमिति चेत् । यथा दक्षिणेन चक्षुषा पश्यतीत्युक्ते [illegible] इत्युक्त वचनेन न पश्यतीत्यनुक्तसिद्धमिति । ये पुनरेव परस्परसापेक्षनयविभाग न मन्यते सांख्य[illegible] मतानुसारिणस्तेषा मते यथा शुद्धनिश्चयनयेन कर्ता न भवति क्रोधादिभ्यश्च भिन्नो भवति तथा व्यवहा[illegible] रेणापि । ततश्च क्रोधादिपरिणमनाभावे सति सिद्धानामिव कर्मबन्धाभाव । कर्मबन्धाभावे ससाराभाव [illegible] साभावे सर्वदा मुक्तत्व प्राप्नोति स च प्रत्यक्षविरोध ससारस्य प्रत्यक्षेण दृश्यमानत्वादिति । एव प्रकृत्यर्थ[illegible] येरेकत्वैकत्वनिराकरणमुख्यत्वेन गाथात्रय गत । अत्राह शिष्य । शुद्धनिश्चयनयेन व्यवहारेण कर्तृत्वं [illegible] बहुधा व्याख्यात तत्रैव सति यथा द्रव्यकर्मणा व्यवहारेण कर्तृत्व तथा रागादिभावकर्मणां च [illegible] भावकर्मणा रेकत्व प्राप्नोति । नैव । रागादिभावकर्मणां येयमशुद्धनिश्चयनयसङ्ज्ञा भवति [illegible] कर्मणां भावकर्मभि सह तारतम्यज्ञापनार्थ । कथ तारतम्यमिति चेत् । द्रव्यकर्माण्यचेतनानि भावकर्माणि [illegible] चेतनानि तथापि शुद्धनिश्चयापेक्षया अचेतनान्येव । यत कारणादशुद्धनिश्चयोऽपि शुद्धनिश्चयापेक्षया [illegible] हारएव । अयमत्र भावार्थ । द्रव्यकर्मणा कर्तृत्व भोक्तृत्व चानुपचरितासद्भूतव्यवहारेण रागादिभावकर्म[illegible] णामशुद्धनिश्चयेन । सचाशुद्धनिश्चय शुद्धनिश्चयापेक्षया व्यवहारएवेति । एव पुण्यपापादि[illegible] (?) [illegible] धिकारे समुदायेन चतुर्थोऽतराधिकार समाप्त । अत पर जीवेण सय बद्ध इत्यादि [illegible] गाथाष्टकपर्यंत सांख्यमतानुसारिशिष्यसबोधनार्थं जीवपुद्गलयोरेकातेन परिणामित्व निराकृत्य [illegible] चित् परिणामित्व स्थापयति । तत्र गाथात्रयमध्ये पुद्गलपरिणामित्व [illegible] । [illegible] जीवपरिणामित्वमुख्यत्वेन गाथापञ्चकमिति पञ्चमस्थले समुदायपातनिका । अथ [illegible] प्रति पुद्गलस्य कथचित्परिणामस्वभावत्व साधयति ।

आत्मख्याति —यदि यथा जीवस्य [illegible] [illegible] प्रतिनिशिताद्या चिद्रूपजडयोरन्यत्वमेवक्तव्यमेवसमत्रम [illegible] । [illegible] सत्वजीव इति द्रव्यान्तरत्वमेव । एव प्रत्यक्षानाच [illegible] एव । [illegible] तत्स्वभावस्य [illegible] जीवस्य एव जडस्वभाव [illegible] । [illegible] द्व्याजडस्वभाव कार्य तथा [illegible] [illegible] व । अथ पुद्गलद्रव्यस्य परिणामस्वभावत्व साधयति सांख्यमतानुसारिशिष्य प्रति ।

> जीवे ण सय बद्ध ण सय परिणमदि कम्मभावेण ।
> जदि पुग्गलदव्वमिण अप्परिणामी तदा होदि ॥१२१॥
> कम्मइयवग्गणादि य अपरिणमतीहि कम्मभावेण ।
> ससारस्स अभावो पसज्जदे सखसमओ वा ॥१२२॥
> जीवो परिणामयदे पुग्गलदव्वाणि कम्मभावेण ।
> त सयमपरिणमत कह तु परिणामयदि णाणी ॥१२३॥
> अह सयमेव हि परिणमदि कम्मभावेण पुग्गल दव्व ।
> जीवे परिणामयदे कम्म कम्मत्त मिदि मिच्छा ॥१२४॥
> णियमा कम्मपरिणद कम्म चि य होदि पुग्गल दव्व ।

[illegible]

तह तं णाणावरणाइ परिणद मुणसु त च्चेव ॥१२७॥

जीवे न स्वयं बद्धं न स्वयं परिणमते कर्मभावेन ।
यदि पुद्गलद्रव्यमिदमपरिणामि तदा भवति ॥१२३॥
कार्मणवर्गणासु चापरिणममाणासु कर्मभावेन ।
संसारस्याभावः प्रसजति सांख्यसमयो वा ॥१२४॥
जीवः परिणामयति पुद्गलद्रव्याणि कर्मभावेन ।
तानि स्वयमपरिणममानानि कथं नु परिणामयति चेतयिता ॥१२५॥
अथ स्वयमेव हि परिणमते कर्मभावेन पुद्गलद्रव्यं ।
जीवः परिणामयति कर्म कर्मत्वमिति मिथ्या ॥१२६॥
नियमात्कर्मपरिणतं कर्म चैव भवति पुद्गलद्रव्यं ।
तथा तद्ज्ञानावरणादिपरिणतं जानीत तच्चैव ॥१२७॥

तात्पर्यवृत्ति —जीवे ण सयं बद्धं जीवे अधिकरणभूते न स्वयं स्वभावेन पुद्गलद्रव्यकर्मबद्धं [illegible] । [illegible] ण सयं परिणमदि कम्मभावेण न च स्वयं स्वभावेन कर्म[illegible] । [illegible] । जदि पुग्गलदव्वमिणं [illegible] अपरिणामी तदा होदि [illegible] । अथ—कार्मणवर्गणा[illegible] [illegible] ॥ [illegible] कर्ता [illegible] ज्ञानावरणा[illegible] [illegible]

[illegible]

तावत्तत्स्वयमपरिणममानं परेण परिणमयितुं पार्येत । नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्येत । स्वयं परिणममानं तु न परं परिणमयितारमपेक्षेत । न हि वस्तुशक्तयः परमपेक्षंते । ततः पुद्गलद्रव्यं परिणामस्वभावं स्वयमेवास्तु । तथा सति कलशपरिणता मृत्तिका स्वयं कलश इव जडस्वभावज्ञानावरणादिकर्मपरिणतं तदेव स्वयं ज्ञानावरणादिकर्म स्यात् । इति सिद्धं पुद्गलद्रव्यस्य परिणामस्वभावत्वं ।

स्थितेत्यविघ्ना खलु पुद्गलस्य स्वभावभूता परिणामशक्तिः ।
तस्यां स्थितायां स करोति भावं यमात्मनस्तस्य स एव कर्ता ॥६४॥

जीवस्य परिणामित्वं साधयति ।

ण सयं वद्धो कम्मे ण सयं परिणमदि कोहमादीहिं ।
जदि एस तुज्झ जीवो अप्परिणामी तदा होदि ॥१२८॥
अपरिणमंते हि सयं जीवे कोहादिएहिं भावेहिं ।
संसारस्स अभावो पसज्जदे संखसमओ वा ॥१२९॥
पुग्गलकम्मं कोहो जीवं परिणामएदि कोहत्तं ।
तं सयमपरिणमंतं कहं परिणामएदि कोहत्तं ॥१३०॥
अह सयमप्पा परिणमदि कोहभावेण एस दे बुद्धी ।
कोहो परिणामयदे जीवस्स कोहमिदि मिच्छा ॥१३१॥
कोहुवजुत्तो कोहो माणुवजुत्तो य माणमेवादा ।
माउवजुत्तो माया लोहुवजुत्तो हवदि लोहो ॥१३२॥

न स्वयं बद्धः कर्मणि न स्वयं परिणमते क्रोधादिभिः ।
यद्येष तव जीवोऽपरिणामी तदा भवति ॥ १२८ ॥
अपरिणममाने स्वयं जीवे क्रोधादिभिः भावैः ।
संसारस्याभावः प्रसजति सांख्यसमयो वा ॥ १२९ ॥
पुद्गलकर्मक्रोधो जीवं परिणामयति क्रोधत्वं ।
तं स्वयमपरिणममानं कथं तु परिणामयति क्रोधः ॥ १३० ॥
अथ स्वयमात्मा परिणमते क्रोधभावेन एषा ते बुद्धिः ।
क्रोधः परिणामयति जीवं क्रोधत्वमिति मिथ्या ॥ १३१ ॥
क्रोधोपयुक्तः क्रोधः मानोपयुक्तः मान एवात्मा ।
मायोपयुक्तो माया लोभोपयुक्तो भवति लोभः ॥ १३२ ॥

तात्पर्यवृत्तिः —ण सयं वद्धो कम्मे [illegible] वद्धो [illegible] सत्त मुक्तस्थान । ण सयं परिणामदि कोहमादीहिं [illegible] भिः परिणमति । [illegible] जदि एस तुज्झ जीवो अप्परिणामी तदा होदि [illegible] यदि चैष जीवः प्रत्यक्षीभू [illegible]

यदि कोहत्त पुद्गलकर्मरूपो द्रव्यक्रोध उदयागत कर्ता जीव कर्मतापन्न हठात्परिणामयति भावक्रोधत्वमिति चेत् त **सयमपरिणमत कह परिणामयदि कोहत्त** अत्र किं स्वयमपरिणममान परिणममान वा परिणामयेत् ? न तावत्स्वयमपरिणममान परिणामयेत् । कस्मात् । नहि स्वतोऽसती शक्ति कर्तुमन्येन पार्यते । नहि जपापुष्पादय कर्तारो यथा स्फटिकादिषु जनयन्त्युपाधिं तथा काष्ठस्तम्भादिष्वपि । अथ स्वभावेन परिणममान वा तर्हि उदयागतद्रव्यक्रोधनिमित्तमन्तरेणापि भावक्रोधादिभि परिणमतु । कस्मादिति चेत् । नहि वस्तुशक्तय परमपेक्षन्ते । तथा च सति मुक्तात्मनामपि कर्मोदयनिमित्ताभावेऽपि भावक्रोधादय प्राप्नुवन्ति । न च तदिष्टमागमविरोधात् । अथ मत । **अह सयमप्पा परिणमदि कोहभावेण एस दे बुद्धी** अत्र पूर्व दूषणभयात्स्वयमेवात्मा द्रव्यकर्मोदयनिरपेक्षो भावक्रोधरूपेण परिणमत्येषा तव बुद्धि हे शिष्य ! **कोहो परिणामयदे जीव कोहत्तमिदि मिच्छा** तर्हि द्रव्यक्रोध कर्ता जीवस्य भावक्रोधत्व परिणामयति करोति यदुक्त पूर्वगाथाया तद्वचन मिथ्या प्राप्नोति । तत स्थित—घटाकारपरिणता मृत्पिण्डपुद्गलो घट इव अग्निपरिणतायःपिंडोऽग्निवत् तथात्मापि क्रोधोपयोगपरिणत क्रोधो भवति मानोपयोगपरिणतो मानो भवति मायोपयोगपरिणतो माया भवति लोभोपयोगपरिणतो लोभो भवतीति स्थिता सिद्धा जीवस्य स्वभावभूता परिणामशक्ति । तस्या परिणामशक्तौ स्थितायां स जीव कर्ता य परिणाममात्मन करोति तस्य स एवोपादानकर्ता द्रव्यकर्मोदयस्तु निमित्तमात्रमेव । तथैव च स एव जीवो निर्विकारचिच्चमत्कारशुद्धभावेन परिणत सन् सिद्धात्मापि भवति । किं च विशेष —**'जाव ण वेदिविसेसतर'** इत्याद्यज्ञानिज्ञानिजीवयो सक्षेपव्याख्यानरूपेण गाथाष्टकं यदुक्त पूर्वं पुण्यपापादिसप्तपदार्थजीवपुद्गलसयोगपरिणामनिर्वृत्तास्ते च जीवपुद्गलयो कथचित्परिणामित्वे सति घटते । तस्यैव कथचित्परिणामित्वस्य विशेषव्याख्यानमिद । अथवा **'सामण्णपच्चयाखलु चउरो'** इत्यादि गाथासप्तके यदुक्त पूर्वं सामान्यप्रत्यया एवम्शुद्धनिश्चयेन कर्म कुर्वन्तीति न जीव इति जैनमत । एकान्तेनाकर्तृत्वे सति साख्याना ससाराभावदूषण तस्यैव ससाराभावदूषणस्य विशेषदूषणमिद । कथमिति चेत् । तत्रैकान्तेन कर्तृत्वाभावे सति ससाराभावदूषण अत्र पुनरेकान्तेन परिणामित्वाभावे सति ससाराभावदूषण । यत कारणाद्धावकर्मपरिणामित्वमेव कर्तृत्व भोक्तृत्व च भण्यते । इति जीवपरिणामित्वे व्याख्यानमुख्यत्वेन गाथापचक गत । एव पुण्यपापादि सप्तपदार्थाना पीठिकारूपे महाधिकारे जीवपुद्गलपरिणामित्वव्याख्यानमुख्यत्वेनाष्टगाथाभि पचमान्तराधिकार समाप्त ।

आत्मख्याति —यदि कर्मणि स्वयमबद्ध सन् जीव क्रोधादिभावेन स्वयमेव न परिणमते तदा स किलापरिणाम्येव स्यात् । तथा सति ससाराभाव । अथ पुद्गलकर्मक्रोधादि जीव क्रोधादिभावेन परिणामयति ततो न ससाराभाव इति तर्क । किं स्वयमपरिणममान परिणममान वा पुद्गलकर्म क्रोधादि जीव क्रोधादिभावेन परिणामयेत् । न तावत्स्वयमपरिणममान परेण परिणमयितु पार्येत नहि स्वतोऽसती शक्ति कर्तुमन्येन पार्यते । स्वय परिणममानस्तु न पर परिणमयितारमपेक्षेत । नहि वस्तुशक्तय परमपेक्षन्ते । ततो जीव परिणामस्वभाव स्वयमेवास्तु तथा सति गरुडध्यानपरिणत साधक स्वय गरुड इवाज्ञानस्वभावक्रोधादि परिणतोपयोग स एव स्वय क्रोधादि स्यादिति सिद्ध जीवस्य परिणामस्वभावत्व ।

> स्थितेति जीवस्य निरतराया स्वभावभूता परिणामशक्ति ।
> तस्या स्थिताया स करोति भाव य स्वस्य तस्यैव भवेत्स कर्ता ॥६५॥

तथा हि—

अथ—जाव ण वेदि विसेस तर तु आदा सवाण दोण्हपि । अण्णाणी तावदु इत्यादि गाथाद्वये तावदज्ञानी जीवस्वरूप पूर्वं भणित स चाज्ञानी जीवो यदा विसयकसायपुग्गाढ इत्याद्यशुभोपयोगेन परिणमति तदा पापास्रवबन्धाना त्रयाणां कर्ता भवति । यदा तु मिथ्यात्वकषायाणां मदोदये सति भोगाकांक्षारूपनिदानबन्धादिरूपेण दानपूजादिनिदान परिणमति तदा पुण्यास्रव

र्थस्यापि कर्ता भवतीति पूर्वं सक्षेपेण सूचित जइया इमेण जीवेण आदा स वाण होइदि । णाद होदि विसेसतर तु इत्यादिगाथाचतुष्टये ज्ञानीजीवस्वरूप च सक्षेपेण सूचित स च ज्ञानी जीव शुद्धोपयोगभावपरिणतोऽभेदरत्नत्रयलक्षणेनाभेदज्ञानेन यदा परिणमति तदा निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा संवरनिर्जरमोक्षपदार्थानां त्रयाणां कर्ता भवतीत्यपि सक्षेपेण निरूपित पूर्वं निश्चयसम्यक्त्वस्याभावे यदा तु सरागसम्यक्त्वेन परिणमति तदा शुद्धात्मानमुपादेय कृत्वा परंपरया निर्वाणकारणस्य तीर्थकरप्रकृत्यादि पुण्यपदार्थस्यापि कर्ता भवतीत्यपि पूर्वं निरूपित तत्सर्वं जीवपुद्गलयो कथंचित्परिणामित्वे सति भवतीति तत्कथंचित्परिणामित्वमपि पुण्यपापादिसप्तपदार्थानां सक्षेपसूचनार्थं पूर्वमेव सक्षेपेण निरूपित । पुनश्च जीवपुद्गलपरिणामित्वव्याख्यानकाले विशेषेण कथित । तत्र कथंचित्परिणामित्वे सिद्धे सति अज्ञानिज्ञानिजीवयो गुणिनो पुण्यपापादिसप्तपदार्थानां सक्षेपसूचनार्थं सक्षेपव्याख्यान कृत । इदानीं पुनरज्ञानमयगुणज्ञानमयगुणयो मुख्यत्वेन व्याख्यान क्रियते । नच जीवाजीवगुणमुख्यत्वेनेति । किमर्थमिति चेत् ? त तेषामेव पुण्यपापादिसप्तपदार्थानां सक्षेपसूचनार्थमिति । तत्र जो सग तु मुइत्ता इत्यादिगाथामादिं कृत्वा पाठक्रमेण गाथानवकपर्यंत व्याख्यान करोति । तत्रादौ गाथात्रय ज्ञानभावमुख्यत्वेन तदनतर गाथाषट्क ज्ञानिजीवस्य ज्ञानमयो भावो भवत्यज्ञानिजीवस्याज्ञानमयो भावो भवतीति मुख्यत्वेन कथ्यत इति पञ्चांतराधिकारे समुदायपातनिका । तद्यथा—कथंचित्परिणामित्वे सिद्धे सति ज्ञानी जीवो ज्ञानमयस्य भावस्य कर्ता भवतीत्यभिप्राय मनसि सप्रधार्येद सूत्रत्रय प्रतिपादयति ।

जो सग तु मुइत्ता जाणदि उवओगमप्पग सुद्ध ।
त णिसग साहु परमट्ठवियाणया विंति ॥१३३॥

य सग तु मुक्त्वा जानाति उपयोगमयक शुद्ध ।
त निस्सग साधु परमार्थविज्ञायका विदति ॥१३३॥

तात्पर्यवृत्ति.—जो सग तु मुइत्ता जाणदि उवओग मप्पग सुद्ध य परमसाधु द्रव्य [illegible] सग परिग्रह मुक्त्वा वीतरागचारित्राविनाभूतभेदज्ञानेन जानात्यनुभवति । क कमतापन्न आत्मान । कथ भूत विशुद्धज्ञानदर्शनोपयोगस्वभावत्वादुपयोगलक्षणमुपयोग ज्ञानदर्शनोपयोगलक्षण । पुनरपि कथ भूत । शुद्ध भाव कर्म द्रव्यकर्म नोकर्मरहित । त णिस्सग साहु परमट्ठवियाणया विंति त साधु निःसग अपरिग्रह विदति जानति ब्रुवति कथयति वा । के ते परमार्थविज्ञायका गणधरदेवादय इति ।

जो मोह तु मुइत्ता णाणसहावाधिय मुणदि आद ।
त जिदमोह साहु परमट्ठवियाणया विंति ॥१३४॥

य मोह तु मुक्त्वा ज्ञानस्वभावाधिक मनुते आत्मान ।
त जितमोह साधु परमार्थविज्ञायका विदति ॥१३४॥

तात्पर्यवृत्ति —जो मोह तु मुइत्ता णाणसहावाधिय मुणदि आद य परमसाधु कर्ता समस्तचेतनाचेतनशुभाशुभपरद्रव्येषु मोह मुक्त्वा मनशुभाशुभमनोवचनकाय[illegible] तत्त्वज्ञानाभेदरत्नत्रयलक्षणेन भेदज्ञानेन मनुते जानाति क कमतापन्न आत्मान, कि विशिष्ट ? निर्विकारस्वसंवेदन ज्ञानेनाधिक परिपूर्ण परिपूर्ण । त जिदमोह साहु परमट्ठवियाणया विंति त साधु कमतापन्न जितमोह निर्मोह विदति जानति । क ते ? परमार्थविज्ञायका गणधरदेवादय इति । एव [illegible] रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकाय[illegible] विशति सूत्राणि व्याख्येयानि । तेनैव प्रकारेण निर्विकार[illegible] विभावपरिणामा ज्ञातव्या । अथ—

यदि कोहत्त पुद्गलकर्मरूपो द्रव्यक्रोधउदयागत कर्ता जीवं कर्मतापन्नं हठात्परिणामयति भावक्रोधत्वेनेति चेत् त **सयमपरिणमंत कह परिणामयदि कोहत्त** अथ किं स्वयमपरिणममानं परिणममानं वा परिणामयेत् ? न तावत्स्वयमपरिणममानं परिणामयेत् । कस्मात् । नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते । नहि जपापुष्पादयः कर्तारो यथा स्फटिकादिषु जनयन्त्युपाधिं तथा काष्ठस्तंभादिष्वपि । अथैकान्तेन परिणममानं वा तर्हि उदयागतद्रव्यक्रोधनिमित्तमन्तरेणापि भावक्रोधादिभिः परिणमतु । कस्मादिति चेत् । नहि वस्तुशक्तयः परमपेक्षन्ते । तथा च सति मुक्तात्मनामपि कर्मोदयनिमित्ताभावेपि भावक्रोधादयः प्राप्नुवन्ति । न च तदिष्टमागमविरोधात् । अथ मतं । **अह सयमप्पा परिणमदि कोहभावेण एस दे बुद्धी** अथ पूर्वदूषणभयात्स्वयमेवात्मा द्रव्यकर्मोदयनिरपेक्षो भावक्रोधरूपेण परिणमत्येषा तव बुद्धिः हे शिष्य ! **कोहो परिणामयदे जीवं कोहत्तमिदि मिच्छा** तर्हि द्रव्यक्रोधः कर्ता जीवस्य भावक्रोधत्वं परिणमयति करोति यदुक्तं पूर्वगाथायां तद्वचनं मिथ्या प्राप्नोति । ततः स्थितं—घटाकारपरिणता मृत्पिंडपुद्गला घटो भवति अग्निपरिणतायःपिंडोऽग्निवत् तथात्मापि क्रोधोपयोगपरिणतः क्रोधो भवति मानोपयोगपरिणतो मानो भवति मायोपयोगपरिणता माया भवति लोभोपयोगपरिणतो लोभो भवतीति स्थिता सिद्धा जीवस्य स्वभावभूता परिणामशक्तिः । तस्यां परिणामशक्तौ स्थितायां स जीवः कर्ता यं परिणाममात्मनः करोति तस्य स एवोपादानकर्ता द्रव्यकर्मोदयस्तु निमित्तमात्रमेव । तथैव च स एव जीवो निर्विकारचिच्चमत्कारशुद्धभावेन परिणतः सन् सिद्धोपि भवति । किं च विशेषः —'**जाव ण वेदि विसेसंतरं**' इत्याद्यज्ञानिज्ञानिजीवयोः संक्षेपव्याख्यानरूपगाथाष्टकं यदुक्तं पूर्वं पुण्यपापादिसप्तपदार्थजीवपुद्गलसंयोगपरिणामनिर्वृत्तास्तेषु च जीवपुद्गलयोः कथंचित्परिणामित्वे सति घटते । तस्यैव कथंचित्परिणामित्वस्य विशेषव्याख्यानमिदं । अथवा '**सामण्णपच्चया खलु चउरो**' इत्यादि गाथासप्तके यदुक्तं पूर्वं सामान्यप्रत्यया एव शुद्धनिश्चयेन कर्म कुर्वंतीति न जीव इति जैनमतं । एकांतेनाकर्तृत्वे सति सांख्यानां संसाराभावदूषणं तस्यैव संसाराभावदूषणस्य [illegible] मिदं । [illegible] धर्म् । तथैकांतेन कर्तृत्वाभावे सति संसाराभावदूषणं अत्र पुनरेकांतेन परिणामित्वाभावे सति संसाराभावदूषणं । एवं कारणान्तरनिरपेक्षपरिणामित्वमात्र कर्तृत्व भोक्तृत्व च भण्यते । इति जीवपरि[illegible] व्याख्यानमुख्यत्वेन गाथापंचकं गतं । एवं पुण्यपापादि सप्तपदार्थानां पीठिकारूपे महाधिकारे [illegible] नाष्टगाथाभिः परमतांतराधिकारः समाप्तः ।

आत्मख्यातिः —यदि कर्मणि स्वयमबद्धः सन् जीवः क्रोधादिभावेन स्वयमेव न परिणमते तदा स [illegible] स्यात् । तथा सति संसाराभावः । अथ पुद्गलकर्म क्रोधादि जीवं क्रोधादिभावेन परि[illegible] इति तर्कः । किं स्वयमपरिणममानं परिणममानं वा पुद्गलकर्म क्रोधादि जी[illegible] [illegible] । न तावत्स्वयमपरिणममानं परेण परिणमयितुं पार्येत नहि स्वतः [illegible] [illegible] । स्वयं परिणममानं तु न परं परिणमयितारमपेक्षेत । नहि वस्तुशक्तयः परमपेक्षन्ते । ततो जीवः [illegible] स्वयमेव तथा सति गरुडध्यानपरिणतः साधकः स्वयं गरुड इवाज्ञानस्वभावक्रोधादि[illegible] स एव स्यादिति सिद्धं जीवस्य परिणामस्वभावत्वं ।

[illegible] जीवस्य निरन्तराया स्वभावभूता परिणामशक्तिः ।
[illegible] म करोति [illegible] तस्य स एव भवेत्कर्ता ॥१३॥

[illegible] हि—

अथ—[illegible] बहि [illegible] । [illegible]
[illegible]

धेऽमानि कर्ता भवतीति पूर्वं संक्षेपेण सूचित जइया इमेण जीवेण आदा स वाण दोण्हपि । णादू होदि विसेसतर तु इत्यादिगाथाचतुष्टय ज्ञानीजीवस्वरूप च संक्षेपेण सूचित स च ज्ञानी जीव शुद्धात्मसम्यक्श्रद्धानपरिणतोऽभेदरत्नत्रयलक्षणेनाभेदज्ञानेन यदा परिणमति तदा निश्चयचारित्राविनाभाविवीतरागसम्यग्दृष्टिर्भूत्वा सवरनिर्जरामोक्षपदार्थानां प्रमाणां कर्ता भवतीत्यपि संक्षेपेण निरूपित पूर्वं निश्चयसम्यक्त्वस्याभावे यदा तु सरागसम्यक्त्वेन परिणमति तदा शुद्धात्मानमुपादेय कृत्वा परंपरया निर्वाणकारणस्य तीर्थकरप्रकृत्यादि पुण्यपदार्थस्यापि कर्ता भवतीत्यपि पूर्वं निरूपित तत्सर्व जीवपुद्गलयो कथंचित्परिणामित्वे सति भवतीति तत्कथंचित्परिणामित्वमपि पुण्यपापादिसप्तपदार्थानां संक्षेपसूचनार्थं पूर्वमेव संक्षेपेण निरूपित । पुनश्च जीवपुद्गलपरिणामित्वं व्याख्यानकाले विशेषेण कथित । तत्रैव कथंचित्परिणामित्वे सिद्धे सति अज्ञानिज्ञानिजीवयो गुणिनो पुण्यपापादिसप्तपदार्थानां संक्षेपसूचनार्थं संक्षेपव्याख्यान कृत । इदानीं पुनरज्ञानमय-ज्ञानमयगुणयो मुख्यत्वेन व्याख्यान क्रियते । नच जीवाजीवगुणमुख्यत्वेनेति । किमर्थमिति चेत् ? तेषामेव पुण्यपापादिसप्तपदार्थानां संक्षेपसूचनार्थमिति । तत्र जो संग तु मुइत्ता इत्यादिगाथामादिं कृत्वा पाठक्रमेण गाथानवकपर्यंत व्याख्यान करोति । तत्रादौ गाथात्रय ज्ञानभावमुख्यत्वेन तदनतर गाथाषट्क ज्ञानिजीवस्य ज्ञानमयो भावो भवत्यज्ञानिजीवस्याज्ञानमयो भावो भवतीति मुख्यत्वेन कथ्यत इति षष्ठान्तराधिकारे समुदायपातनिका । तद्यथा—कथंचित्परिणामित्वे सिद्धे सति ज्ञानी जीवो ज्ञानमयस्य भावस्य कर्ता भवतीत्यभिप्राय मनसि संप्रधार्येद सूत्रत्रय प्रतिपादयति ।

जो सग तु मुइत्ता जाणदि उवओगमप्पग सुद्ध ।
त णिसग साहु परमट्ठवियाणया विंति ॥१३३॥

य सग तु मुक्त्वा जानाति उपयोगमयक शुद्ध ।
त निस्सग साधु परमार्थविज्ञायका विदंति ॥१३३॥

तात्पर्यवृत्ति —जो सग तु मुइत्ता जाणदि उवओग मप्पय सुद्ध य परमसाधुर्बाह्याभ्यतरपरिग्रह मुक्त्वा वीतरागचारित्राविनाभूतभेदज्ञानेन जानात्यनुभवति । क कर्मतापन्न आत्मान । कथंभूत विशुद्धज्ञानदर्शनोपयोगस्वभावत्वादुपयोगस्तमुपयोग ज्ञानदर्शनोपयोगलक्षण । पुनरपि कथंभूत । शुद्ध भावकर्म द्रव्यकर्म नोकर्मरहित । त णिस्सग साहु परमट्ठवियाणया विंति त साधु निस्सग संगरहित विदंति जानंति ब्रुवंति कथयंति वा । के ते परमार्थविज्ञायका गणधरदेवादय इति ।

जो मोह तु मुइत्ता णाणसहावाधिय मुणदि आद ।
त जिदमोह साहु परमट्ठवियाणया विंति ॥१३४॥

य मोह तु मुक्त्वा ज्ञानस्वभावाधिक मनुते आत्मान ।
त जितमोह साधु परमार्थविज्ञायका विदंति ॥१३४॥

तात्पर्यवृत्ति —जो मोह तु मुइत्ता णाणसहावाधिय मुणदि आद य परमसाधु कर्ता समस्तचेतनाचेतनशुभाशुभपरद्रव्येषु मोह मुक्त्वा शुभाशुभमनोवचनकायव्यापाररूपयोगत्रयपरिहारपरिणताभेदरत्नत्रयलक्षणेन भेदज्ञानेन मनुते जानाति क कर्मतापन्न आत्मान, किंविशिष्ट ? निर्विकारस्वसवेदनज्ञानेनाधिक परिणत परिपूर्ण । त जिदमोह साहु परमट्ठवियाणया विंति त साधु कर्मतापन्न जितमोह निर्मोह विदंति जानंति । के ते ? परमार्थविज्ञायकास्तीर्थकरपरमदेवादय इति । एव मोहपदपरिवर्तनेन रागद्वेषक्रोधमानमायालोभकर्मनोकर्ममनोवचनकायबुद्ध्युदयशुभाशुभपरिणामश्रोत्रचक्षुर्घ्राणजिह्वास्पर्शनसंज्ञानि विंशति सूत्राणि व्याख्येयानि । तेनैव प्रकारेण निर्मलपरमचिज्ज्योति परिणतेर्विलक्षणासंख्येयलोकमात्रविभावपरिणामा ज्ञातव्या । अथ—

जो धम्मं तु मुइत्ता जाणदि उवओगमप्पगं सुद्धं ।
तं धम्मसंगमुक्कं परमट्ठवियाणया विंति ॥१३५॥
यः धर्मं तु मुक्त्वा जानाति उपयोगमयकं शुद्धं ।
तं धर्मसंगमुक्तं परमार्थविज्ञायका विदंति ॥१३५॥

तात्पर्यवृत्ति —जो धम्मं तु मुइत्ता जाणदि उवओगमप्पगं सुद्धं यः परमयोगींद्रः स्वसंवेदनज्ञाने स्थित्वा शुभोपयोगपरिणामरूपं धर्मं पुण्यसंगं त्यक्त्वा निजशुद्धात्मपरिणताभेदरत्नत्रयलक्षणेन भेदज्ञानेन जानात्यनुभवति । कं कर्मतापन्नं आत्मानं । कथंभूतं विशुद्धज्ञानदर्शनोपयोगपरिणतं । पुनरपि कथंभूतं । शुद्धं शुभाशुभसंकल्पविकल्परहितं । तं धम्मसंगमुक्कं परमट्ठवियाणया विंति । तं परमतपोधनं निर्विकारस्वसंवित्तिशुद्धात्मोपलंभरूपनिश्चयधर्मविलक्षणभोगाकांक्षास्वरूपनिदानबंधादिपुण्यपरिग्रहरूपव्यवहारधर्मरहितं विदंति जानंति । के ते* परमार्थविज्ञायकाः प्रत्यक्षज्ञानिन इति । किं च कथंचित्परिणामित्वे सति जीवः शुद्धोपयोगेन परिणमति पश्चान्मोक्षं साधयति परिणामित्वाभावे बद्धो बद्ध एव शुद्धोपयोगरूपपरिणामांतरस्वरूपं न घटते ततश्च मोक्षाभाव इत्यभिप्रायः । एवं शुद्धोपयोगरूपज्ञानमयपरिणामगुणव्याख्यानमुख्यत्वेन गाथात्रयं गतं । तदनंतरं यथा ज्ञानमयोऽज्ञानमयभावद्वयस्य कर्ता भवति तथा कथयति ।

जं कुणदि भावमादा कत्ता सो होदि तस्स भावस्स ।
णाणिस्स दु णाणमओ अण्णाणमओ अणाणिस्स ॥१३६॥
यं करोति भावमात्मा कर्ता स भवति तस्य कर्मणः ।
ज्ञानिनः स ज्ञानमयोऽज्ञानिमयोऽज्ञानिनः ॥१३६॥

तात्पर्यवृत्ति —जं कुणदि भावमादा कत्ता सो होदि तस्स भावस्स यं भावं परिणामं करोत्यात्मा स तस्य भावस्य कर्ता भवति णाणिस्स दु णाणमओ स च भावोऽनंतज्ञानादिचतुष्टयाभिव्यक्तिरूपकार्यसमयसारस्योपादानकारणभूतनिर्विकल्पसमाधिपरिणामपरिणतकारणसमयसारलक्षणेन भेदज्ञानेन सर्वारंभपरिग्रहरहितज्ञानिनो जीवस्य शुद्धात्मख्यातिप्रतीतिसंवित्त्युपलब्ध्यनुभूतिरूपेण ज्ञानमय एव भवति अण्णाणमओ अणाणिस्स अज्ञानिनस्तु पूर्वोक्तभेदज्ञानाभावात् शुद्धात्मानुभूतिस्वरूपाभावे सत्यज्ञानमय एव भवतीत्यर्थः । अथ ज्ञानमयभावात्किं भवति किमज्ञानमयाद्भवतीति प्रश्ने प्रत्युत्तरमाह ।

आत्मख्याति —एवमयमात्मा स्वयमेव परिणामस्वभावोऽपि यमेव भावमात्मनः करोति तस्यैव कर्मतामापद्यमानस्य कर्तृत्वमापद्येत । स तु ज्ञानिनः सम्यक्स्वपरविवेकेनात्यंतोदितविविक्तात्मख्यातित्वात् ज्ञानमय एव स्यात् अज्ञानिनस्तु सम्यक्स्वपरविवेकाभावेनात्यंतप्रत्यस्तमितविविक्तात्मख्यातित्वादज्ञानमय एव स्यात् । किं ज्ञानमयभावात्किमज्ञानमयाद्भवतीत्याह ।

अण्णाणमओ भावो अणाणिणो कुणदि तेण कम्माणि ।
णाणमओ णाणिस्स दु ण कुणदि तह्मा दु कम्माणि॥१३७॥
अज्ञानमयो भावोऽज्ञानिनः करोति तेन कर्माणि ।
ज्ञानमयो ज्ञानिनस्तु न करोति तस्मात्तु कर्माणि ॥१३७॥

तात्पर्यवृत्ति —अण्णाणमओ भावो अणाणिणो कुणदि तेण कम्माणि [illegible] [illegible] । [illegible] । [illegible] ।

---

* [illegible] ।

णाणमओ णाणिस्स दु ण कुणदि तह्मा दु कम्माणि ज्ञानिनस्तु निर्विकारस्वसंवेदनलक्षणो ज्ञानमयो भवति यस्मात् ज्ञानमयभावात् ज्ञानी जीवः कर्माणि न करोतीति । किं च यथा दवाग्निर्बहु तृणकाष्ठराशिं क्षणमात्रेण दहति । तथा त्रिगुप्तिसमाधिलक्षणो भेदज्ञानाग्निरन्तर्मुहूर्तेनापि बहुभव संचितकर्मराशिं दहतीति ज्ञात्वा सर्वतात्पर्येण तत्रैव परमसमाधौ भावना कर्तव्येति भावार्थः ।

अथ ज्ञानमय एव भावो भवति ज्ञानिनो जीवस्य न पुनरज्ञानमयः । अज्ञानमय एव भवत्यज्ञानिजीवस्य न पुनर्ज्ञानमय इति निरूपयति चेत् ।

आत्मख्याति —अज्ञानिनो हि सम्यक्स्वपरविवेकाभावेनात्यंतप्रत्यस्तमितविविक्तात्मख्यातित्वा यस्मादज्ञानमय एव भावः स्यात् तस्मिंस्तु सति स्वपरयोरेकत्वाध्यासेन ज्ञानमात्रात्स्वस्मात्प्रभ्रष्टः पराभ्यां रागद्वेषाभ्यां सममेकीभूय प्रवर्तिताहंकारः स्वयं किलैषोहं रज्ये रुष्यामीति रज्यते रुष्यति च तस्मादज्ञानमयभावादज्ञानी परौ रागद्वेषावात्मानं कुर्वन् करोति कर्माणि । ज्ञानिनस्तु सम्यक्स्वपरविवेकेनात्यंतोदितविविक्तात्मख्यातित्वा यस्मात् ज्ञानमय एव भावः स्यात् तस्मिंस्तु सति स्वपरयोर्नानात्वविज्ञानेन ज्ञानमात्रे स्वस्मिन्सुनिवि पराभ्यां रागद्वेषाभ्यां पृथग्भूततया स्वरसत एव निवृत्ताहंकारः स्वयं किल केवलं जानात्येव न रज्यते न च द्वेष्टि तस्मात् ज्ञानमयस्य भावस्य भावात् ज्ञानी परौ रागद्वेषावात्मानमकुर्वन्न करोति कर्माणि ।

ज्ञानमय एव भावः कुतो भवेद्ज्ञानिनो न पुनरन्यः । अज्ञानमयः सर्वः कुतोयमज्ञानिनो नान्यः ॥

णाणमया भावाओ णाणमओ चेव जायदे भावो ।
जम्हा तम्हा णाणिस्स सव्वे भावा दु णाणमया ॥१२८॥
अण्णाणमया भावा अण्णाणो चेव जायए भावो ।
जम्हा तम्हा भावा अण्णाणमया अणाणिस्स ॥१२९॥

ज्ञानमयाद्भावाद्ज्ञानमयश्चैव जायते भावः ।
यस्मात्तस्माज्ज्ञानिनः सर्वे भावाः खलु ज्ञानमयाः ॥१२८॥
अज्ञानमयाद्भावादज्ञानश्चैव जायते भावः ।
यस्मात्तस्माद्भावादज्ञानमया अज्ञानिनः ॥१२९॥

तात्पर्यवृत्ति —णाणमयाभावाओ णाणमओ चेव जायदे भावो जह्मा ज्ञानमया भाव निश्चयरत्नत्रयात्मकात्परिणामात् ज्ञानमय एव जायते भावः स्वशुद्धात्मावाप्तिलक्षणो भावपर्यायो यस्मात्कारणात् तह्मा णाणिस्स सव्वे भावा दु णाणमया तस्मात्कारणात्स्वसंवेदनलक्षणभेदज्ञानिनो जीवस्य स भावाः परिणामा ज्ञानमया ज्ञानेन निर्वृत्ता भवन्ति तदपि कस्मात् उपादानकारणसदृशं कार्यं भवतीति वच नात् नहि यवबीजाङ्कुरो ज शालि राजान शालिस्त भवतीति तथैव च—अण्णाणमया भावा अण्णाणो चेव जायए भावो अज्ञानमयाद्भावाज्जीवपरिणामात् अज्ञानमय एव जायते भावः पर्यायो यस्मात्कारणात् तह्मा सव्वे भावा अण्णाणमया अणाणिस्स यत एवं तस्मात्कारणात्सर्वे भावाः परिणामा अज्ञा नमया मिथ्यात्वरागादिरूपा भवन्ति । कस्य अज्ञानिनः शुद्धात्मोपलब्धिरहितस्य मिथ्यादृष्टिजीवस्येति । अथ तदेव व्याख्यानं दृष्टांतदार्ष्टांताभ्यां समर्थयति ।

आत्मख्याति —यतो ह्यज्ञानमयाद्भावाद्यः कश्चनापि भावो भवति स सर्वोप्यज्ञानमयत्वमनतिवर्त मानोऽज्ञानमय एव स्यात् ततः सर्वे एवाज्ञानमया अज्ञानिनो भावाः । यतश्च ज्ञानमयाद्भावाद्यः कश्चनापि भावो भवति स सर्वोपि ज्ञानमयत्वमनतिवर्तमानो ज्ञानमय एव स्यात् ततः सर्वे एव ज्ञानमया ज्ञानिनो भावाः ।

ज्ञानिनो ज्ञाननिर्वृत्ताः सर्वे भावा भवंति हि । सर्वेप्यज्ञाननिर्वृत्ता भवन्त्यज्ञानिनस्तु ते ॥६६॥

अथैतदेव दृष्टांतेन समर्थयते ।

कणयमयाभावादो जायते कुंडलादयो भावा ।
अयमययाभावादो जह जायते तु कडयादी ॥१४०॥
अण्णाणमया भावा अणाणिणो वहुविहा वि जायते ।
णाणिस्स दु णाणमया सव्वे भावा तहा होंति ॥१४१॥

कनकमयाद्भावाज्जायते कुंडलादयो भावा ।
अयोमयकाद्भावाद्यथा जायते तु कटकादयः ॥१४०॥
अज्ञानमयाद्भावादज्ञानिनो बहुविधा अपि जायंते ।
ज्ञानिनस्तु ज्ञानमया सर्वे भावास्तथा भवंति ॥१४१॥

[illegible]वृत्ति — [illegible]र्थात् "उपादानकारणसदृशं कार्यं भवतीति" [illegible] भवंति । [illegible]र्थात् अयोमया एव भावा [illegible] इति गाथा गता । अथ दार्ष्टांतमाह । अण्णाणेति तथा पूर्वो[illegible] [illegible]ज्ञानिनो भावा पर्याया बहुविधा मिथ्यात्वरागादिरूपा [illegible] । [illegible] ज्ञानिनो जीवस्य ज्ञानमया सर्वे भावा पर्याया भवंति । किं च [illegible] परिणाम करोति स परिणाम [illegible] । [illegible] दीक्षा [illegible] [illegible] । तत्र मिथ्यात्वरागादिविभूति [illegible] [illegible]

[illegible]

[illegible]

इत्येनिः स्वयं ज्ञानमयाज्ञानादज्ञानजातिमनतिवर्तमाना सर्वे ज्ञानमया एव भावा भवेयुर्न पुनरज्ञानमया। इत्यज्ञानमयभावानामज्ञानी व्याप्य भूमिकां। द्रव्यकर्मनिमित्तानां भावनामति हेतुतां ॥६७॥

मिच्छत्तस्सदु उदयं जं जीवाणां दु अतच्चसद्दहणं।
असंजमस्स दु उदओ जं जीवाणां अविरदत्तं ॥१४२॥
अण्णाणस्स दु उदओ जं जीवाणं अतच्चउवलद्धी।
जो दु कलुसोवओगो जीवाणं सो कसाउदओ ॥१४३॥
तं जाण जोगउदयं जो जीवाणं तु चिट्ठउच्छाहो।
सोहणमसोहणं वा कायव्वो विरदिभावो वा ॥१४४॥
एदेसु हेदुभूदेसु कम्मइयवग्गणागयं जं तु।
परिणमदे अट्ठविहं णाणावरणादिभावेहिं ॥१४५॥
तं खलु जीवणिबद्धं कम्मइयवग्गणागयं जइया।
तइया दु होदि हेदू जीवो परिणामभावाणं ॥१४६॥

अज्ञानस्य स उदयो या जीवानामतत्त्वोपलब्धिः।
मिथ्यात्वस्य तूदयो जीवस्याश्रद्दधानत्वं ॥१४२॥
उदयोऽसंयमस्य तु यज्जीवानां भवेदविरमणं तु।
यस्तु कलुषोपयोगो जीवानां स कषायोदयः ॥१४३॥
तं जानीहि योगोदयं यो जीवानां तु चेष्टोत्साहः।
शोभनोऽशोभनो वा कर्तव्यो विरतिभावो वा ॥१४४॥
एतेषु हेतुभूतेषु कार्मणवर्गणागतं यत्तु।
परिणमतेऽष्टविधं ज्ञानावरणादिभावैः ॥१४५॥
तत्खलु जीवनिबद्धं कार्मणवर्गणागतं यदा।
तदा तु भवति हेतुर्जीवः परिणामभावानां ॥१४६॥

तात्पर्यवृत्तिः —मिच्छत्तस्सदु उदयं जं जीवाणं अतच्च सद्दहणं मिथ्यात्वस्योदयो भवति जीवानामनंतज्ञानादिचतुष्टयरूपं शुद्धात्मतत्त्वमुपादेयं विहायान्यत्र यच्छ्रद्धानं रुचिरुपादेयबुद्धिः असंजमस्सदु उदओ जं जीवाणं अविरदत्तं असंयमस्य च स उदयो भवति जीवानामात्मसुखसंवित्त्यभावे सति विषयकषायेभ्यो यदनिवर्तनमिति। अथ—अण्णाणस्स दु उदओ जं जीवाणं अतच्च उवलद्धी अज्ञानस्योदयो भवति यत्किं भेदज्ञानं विहाय जीवानां विपरीतरूपेण परद्रव्यैकत्वेनोपलब्धिः प्रतीतिः जो दु कसाउवओगो सो जीवाणं कसाउदओ स जीवानां कषायोदयो भवति यः स्वात्मोपलब्धिलक्षणं शुद्धोपयोगं विहाय क्रोधादिकषायरूप उपयोगः परिणाम इति। अथ—तं जाण जोगउदयं जं जीवाणं तु चिट्ठउच्छाहो तं योगोदयं जानीहि त्वं हे शिष्य जीवानां मनोवचनकायवर्गणाधारेण वीर्यांतरायक्षयोपशमजनितः कर्मादानहेतुरात्मप्रदेशपरिस्पंदलक्षणः प्रयत्नरूपेण यस्तु चेष्टोत्साहो व्यापारोत्साहः सोहणमसोहणं वा कायव्वो विरदिभावो वा स च शुभाशुभरूपेण द्विधा भवति तत्र

दु परिणामो जायदि जीवस्स रागमादीहिं अथाभिप्रायो भवता पूर्वदूषणभयादेकस्य जीवस्यै[illegible] तेनोपादानकारणस्य रागादिपरिणामो जायते **ता कम्मोदयहेदू हिं विणा जीवस्स परिणा**[illegible] तस्मादिदं दूषणं कर्मोदयहेतुभिर्विनापि शुद्धजीवस्य रागादिपरिणामो जायते न च प्रत्यक्षविरोध आ[illegible] विरोधश्च । अथवा द्वितीयव्याख्यान एकस्य जीवस्योपादानकारणभूतस्य कर्मोदयासाधारणहेतुभिर्विना रागा[illegible] परिणामो यदि भवति तदा सम्मतमेव । किं च द्रव्यकर्मणामनुपचरितासद्भूतव्यवहारेण कर्ता जीव रा[illegible] दिभावकर्मणामशुद्धनिश्चयेन स चाशुद्धनिश्चयः यद्यपि द्रव्यकर्मकर्तृत्वविषयभूतस्यानुपचरितासद्भूतव्यवहा[illegible] स्यापेक्षया निश्चयसंज्ञां लभते । तथापि शुद्धात्मद्रव्यविषयभूतस्य शुद्धनिश्चयस्यापेक्षया वस्तुवृत्त्या व्यवह[illegible] एवेति भावार्थः । अथ निश्चयेन जीवात्पृथग्भूत एव पुद्गलकर्मणः परिणाम इति निरूपयति ।

आत्मख्याति —यदि जीवस्य तन्निमित्तभूतविपच्यमानपुद्गलकर्मणा सहैव रागाद्यज्ञान[illegible] भवतीति वितर्कः तदा जीवपुद्गलकर्मणोः सहभूतसुधाहरिद्रयोरिव द्वयोरपि रागाद्यज्ञानपरिणाम[illegible] अथ चैकस्यैव जीवस्य भवति रागाद्यज्ञानपरिणामः ततः पुद्गलकर्मविपाकाद्भिन्नः पृथग्भूतो जीवस्य परिणाम[illegible] जीवात्पृथग्भूत एव पुद्गलद्रव्यस्य परिणामः ।

जइ जीवेण सहच्चिय पुग्गलदव्वस्स कम्मपरिणामो ।
एवं पुग्गलजीवा हु दोवि कम्मत्तमावण्णा ॥१४९॥
एकस्स दु परिणामो पुग्गलदव्वस्स कम्मभावेण ।
ता जीवभावहेदूहिं विणा कम्मस्स परिणामो ॥१५०॥

यदि जीवेन सह चैव पुद्गलद्रव्यस्य कर्मपरिणामः ।
एवं पुद्गलजीवौ खलु द्वावपि कर्मत्वमापन्नौ ॥१४९॥
एकस्य तु परिणामः पुद्गलद्रव्यस्य कर्मभावेन ।
तज्जीवभावहेतुभिर्विना कर्मणः परिणामः ॥१५०॥

तात्पर्यवृत्ति —**एकस्स परिणामो पुग्गलदव्वस्स कम्मभावेण** एक[illegible]भूतस्य कर्म[illegible] वर्गणायोग्यपुद्गलद्रव्यस्य द्रव्यकर्मरूपेण परिणामः यत एवं **ता जीवभावहेदूहिं विणा कम्मस्स परिणामो** तस्मात्कारणाज्जीवगतमिथ्यात्वरागादिपरिणामोपादानहेतुभिर्विनापि द्रव्यकर्म[illegible] परिणाम [illegible]

इति पुण्यपापादिसप्तपदार्थानां पीठिकारूपे महाधिकारे जीवसम
पुद्गलपरस्परोपादानकारणनिषेधमुख्यतया गाथाद्वय
माष्टमोऽन्तराधिकारः समाप्तः ।

अथानन्तरं व्यवहारेण बद्धो निश्चयेनाबद्धो जीव इत्यादिविकल्परूपेण [illegible] शुद्धपारिणामिकपरमभावग्राहकेन शुद्धद्रव्यार्थिकनयेन पुण्यपापादिपदार्थेभ्यो भिन्न [illegible] एवं गाथापंचकेन नवमेंऽतराधिकारे समुदायपातनिका । तद्यथा अथ [illegible] बद्धस्पृष्टं [illegible] कर्मेति प्रश्ने सति नयविभागेन परिहारमाह ।

आत्मख्याति —यदि पुद्गलद्रव्यस्य तन्निमित्तभूत[illegible] परिणामो भवतीति वितर्कः तदा पुद्गल[illegible] सहभूत[illegible] अथ चैकस्यैव पुद्गलद्रव्यस्य भवति कर्मत्वपरिणामः [illegible] पुद्गलकर्मणः परिणामः । [illegible] ।

१४९ [illegible] । [illegible]

[illegible] शोभन पश्चादमतादिरूपो वर्जनीय सचाशोभन इति । अथ—**एदेसु हेदुभूदेसु क[illegible]म्म इयवग्गणागय** ज तु एतेषु पूर्वोक्तेषु हेतुभूतेषु स मिथ्यात्वादिपंचप्रत्ययेषु [illegible] **परिणमदे अट्ठविह णाणावरणादिभावेहिं** जीवस्य सम्यग्दर्शन[illegible] [illegible] सति ज्ञानावरणादिद्रव्यकर्मरूपेणाष्टविध परिणमतीति । अथ—**स खलु जीवणिबद्ध कम्मइयवग्गणागय** जइया तत्पूर्वोक्तमूर्णोदित कर्मवर्गणायोग्य[illegible] द्रव्य [illegible] जीवनिबद्ध [illegible] यदा भवति खलु स्फुट **तइया दु होदि हेदू जीवो परिणाम**भावाणं तस्मिन् काले पूर्वोक्तमूर्तस्य [illegible] द्रव्यप्रत्ययेषु सत्सु स्वकीयगुणस्थानानुसारेण जीवो हेतुः कारण भवति [illegible] परिणामरूपाणां भावानां प्रत्ययानामिति । किंच उदयागतद्रव्यप्रत्ययनिमित्तेन मिथ्यात्व[illegible] [illegible] जीवो नवतर कर्मबंधस्य कारण भवतीति तात्पर्य । अयमत्र भावार्थ उदय[illegible] [illegible] यदि जीव स्वस्वभाव मुक्त्वा रागादिरूपेण भावप्रत्ययेन परिणमतीति तदा बंधो भवति [illegible] यदि पुनरुदयमात्रेण बंधो भवति तदा सर्वदैव संसार[illegible] । [illegible] सर्वदैव कर्मोदयस्य विद्यमानत्वात् । इति पुण्यपापादिसप्तपदार्थानां पीठिकारूपे [illegible] [illegible] शुद्धात्मस्वरूपच्युतानां जीवानां बंधकारण भवतीति [illegible] [illegible] समाप्त ।

[illegible] गाथात्रयमित्यष्टमान्तराधिकारे समुदाय[illegible] । [illegible] कर्मपुद्गलपरिणाम जीवस्य परिणाम इति प्रतिपादयति ।

[illegible]—[illegible] अज्ञानोदय । [illegible] [illegible] [illegible] शुभाशुभप्रवृत्तिनिवृत्ति[illegible] [illegible] मिथ्यात्वाद्युदयेषु हेतुभूतेषु [illegible] यदा [illegible] जीवनिबद्ध यदा [illegible] [illegible] परिणामभावानां हेतु[illegible] । [illegible]

> जीवस्स दु कम्मेण य सह परिणामा दु होंति रागादी ।
> एवं जीवो कम्म च दो वि रागादिमावण्णा ॥१४७॥
> एकस्स दु परिणामो जायदि जीवस्स रागमादीहिं ।
> ता कम्मोदयहेदूहि विणा जीवस्स परिणामो ॥१४८॥

[illegible] सह परिणामा खलु भवन्ति रागादयः ।
[illegible] ॥१४७॥
[illegible] रागादिभिः ।
[illegible] परिणाम ॥१४८॥

[illegible] — [illegible] परिणामा दु होंति रागादी [illegible]
[illegible]
[illegible]
[illegible]

क्रामन्नपि न विकल्पमतिक्रामति । यस्तु जीवेऽबद्धं कर्मेति विकल्पयति सोऽपि जीवे बद्धं कर्मेति विकल्पमतिक्रामन्नपि न विकल्पमतिक्रामति । यः पुनर्जीवे बद्धमबद्धं च कर्मेति विकल्पयति स तु तदुभयमपि विकल्पमनतिक्रामन् न विकल्पमतिक्रामति । ततो य एव समस्तनयपक्षमतिक्रामति स एव समस्तं विकल्पमतिक्रामति । य एव समस्तं विकल्पमतिक्रामति स एव समयसारं विंदति । यद्येवं तर्हि को हि नाम नयपक्षसंन्यासभावनां न नाटयति ।

य एव मुक्त्वा नयपक्षपातं स्वरूपगुप्ता निवसति नित्यं ।
विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृतं पिबति ॥ ७० ॥
एकस्य बद्धो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७१ ॥
एकस्य मूढो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७२ ॥
एकस्य रक्तो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७३ ॥
एकस्य दुष्टो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७४ ॥
एकस्य कर्ता न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७५ ॥
एकस्य भोक्ता न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७६ ॥
एकस्य जीवो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७७ ॥
एकस्य सूक्ष्मो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७८ ॥
एकस्य हेतुर्न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ७९ ॥
एकस्य कार्यं न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८० ॥
एकस्य भावो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८१ ॥
एकस्य चैको न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८२ ॥
एकस्य सांतो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८३ ॥
एकस्य नित्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८४ ॥
एकस्य वाच्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८५ ॥
एकस्य नाना न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिचिदेव ॥ ८६ ॥

जीवे कम्मं वद्ध पुट्ठं चेदि ववहारणयभणिदं ।
सुद्धणयस्स दु जीवे अवद्धपुट्ठ हवइ कम्म ॥१५१॥

जीवे कर्म बद्ध स्पृष्ट चेति व्यवहारनयभणितं ।
शुद्धनयस्य तु जीवे अवद्धस्पृष्ट भवति कर्म ॥१५१॥

तात्पर्यवृत्ति —**जीवे कम्म वद्ध पुट्ठ चेदि ववहारणयभणिद** जीवेऽधिकरणभूते बद्ध संश्लेषरूपेण क्षीरनीरवत्सबद्ध स्पृष्ट योगमात्रेण छुप्त च कर्मेति व्यवहारनयपक्षो व्यवहारनयाभिप्राय । **सुद्धणयस्स दु जीवे अवद्धपुट्ठ हवइ कम्म** शुद्धनयस्याभिप्रायेण पुनर्जीवेऽधिकरणभूते अबद्ध स्पृष्ट कर्म इति निश्चयव्यवहारनयद्वयविकल्परूप शुद्धात्मस्वरूप न भवतीति भावार्थ । अथ यस्माद्बद्धावद्धादिविकल्परूप नयस्वरूपमुक्त तस्माच्छुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन बद्धाबद्धादिनयविकल्परूपो जीवो न भवतीति प्रतिपादयति ।

आत्मख्यातिः—जीवपुद्गलकर्मणोरेकबन्धपर्यायत्वेन तदतिव्यतिरेकाभावाज्जीवे बद्धस्पृष्ट कर्मेति व्यवहारनयपक्ष । जीवपुद्गलकर्मणोरनेकद्रव्यत्वेनात्यतव्यतिरेकाज्जीवेऽबद्धस्पृष्ट कर्मेति निश्चयपक्ष । तत किं-

कम्म वद्धमवद्ध जीवे एवं तु जाण णयपक्ख ।
पक्खातिक्कतो पुण भण्णदि जो सो समयसारो ॥१५२॥

कर्म बद्धमबद्ध जीवे एव तु जानीहि नयपक्ष ।
पक्षातिक्रांत पुनर्भण्यते यः स समयसार ॥१५२॥

तात्पर्यवृत्ति —**कम्म वद्धमवद्धं जीवे एव तु जाण णयपक्ख** जीवेऽधिकरणभूते कर्म बद्धमबद्ध चेति योऽसौ विकल्प स उभयोपि नयपक्षपात स्वीकार इत्यर्थ **पक्खातिक्कतो पुण भण्णदि जो सो समयसारो** नयपक्षातिक्रांतो भण्यते य स समयसार शुद्धात्मा । तद्यथा व्यवहारेण बद्धो जीव इति नयविकल्प शुद्धजीवस्वरूप न भवति निश्चयेनाबद्धो जीव इति च नयविकल्प शुद्धजीवस्वरूप न भवति निश्चयव्यवहाराभ्यां बद्धाबद्धजीव इति वचनविकल्प शुद्धजीवस्वरूप न भवति । कस्मादिति चेत् ? श्रुतविकल्पा नया इति वचनात् । श्रुतज्ञान च क्षायोपशमिक क्षायोपशमस्तु ज्ञानावरणीयक्षयोपशमजनितत्वात् । यद्यपि व्यवहारनयेन छद्मस्थापेक्षया जीवस्वरूप भण्यते तथापि केवलज्ञानापेक्षया शुद्धजीवस्वरूप न भवति । तर्हि कथ भूत जीवस्वरूपमिति चेत् ? योसौ नयपक्षपातरहितस्वसंवेदनज्ञानी तस्याभिप्रायेण बद्धाबद्धमूढामूढादिनयविकल्परहित चिदानंदैकस्वभाव जीवस्वरूप भवतीति । तथा चोक्त

य एव मुक्त्वा नयपक्षपात स्वरूपगुप्ता निवसंति नित्य ।
विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृत पिबंति ॥ ६८ ॥
एकस्य बद्धो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्ववेदी च्युतपक्षपातस्तस्यास्ति नित्य खलु चिच्चिदेव ॥ ६९ ॥

समयसारस्य या बुद्धिनयद्वयात्मिका । वर्तते बुद्धतत्त्वस्य सा स्वस्य निवर्तते ॥
हस्तावलम्बनार्थं तु विनिश्चित्य नयद्वयात् । त्यक्त्वा द्वयमुपादेयस्त्वात्मा साधुगम्यत ॥
अथ नयपक्षातिक्रान्तस्य शुद्धजीवस्य किं स्वरूपमिति पृष्टे सति पुनर्विशेषेण कथयति ।

आत्मख्याति —य किल जीवे बद्ध कर्मेति यश्च जीवेऽबद्ध कर्मेति विकल्प स द्वितयोऽपि हि नयपक्ष । य एवैनमतिक्रामति स एव सकलविकल्पातिक्रान्त स्वय निर्विकल्पैकविज्ञानघनस्वभावो भूत्वा साक्षात्समयसार संभवति । तत्र यस्तावज्जीवे बद्ध कर्मेति विकल्पयति स जीवेऽबद्ध कर्मेति एक पक्षम

क्रामन्नपि न विकल्पमतिक्रामति । यस्तु जीवेऽबद्धं कर्मेति विकल्पयति सोऽपि जीवे बद्धं कर्मेत्येकं पक्षमतिक्रामन्नपि न विकल्पमतिक्रामति । यः पुनर्जीवे बद्धमबद्धं च कर्मेति विकल्पयति स तु तं द्वितयमपि पक्षमनतिक्रामन्न विकल्पमतिक्रामति । ततो य एव समस्तनयपक्षमतिक्रामति स एव समस्तं विकल्पमतिक्रामति । य एव समस्तं विकल्पमतिक्रामति स एव समयसारं विंदति । यद्येवं तर्हि को हि नाम पक्षसन्न्यासभावनां न नाटयति ।

य एव मुक्त्वा नयपक्षपातं स्वरूपगुप्ता निवसंति नित्यं ।
विकल्पजालच्युतशांतचित्तास्त एव साक्षादमृतं पिबंति ॥ ७० ॥
एकस्य बद्धो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७१ ॥
एकस्य मूढो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७२ ॥
एकस्य रक्तो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७३ ॥
एकस्य दुष्टो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७४ ॥
एकस्य कर्ता न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७५ ॥
एकस्य भोक्ता न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७६ ॥
एकस्य जीवो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७७ ॥
एकस्य सूक्ष्मो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७८ ॥
एकस्य हेतुर्न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ७९ ॥
एकस्य कार्यं न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८० ॥
एकस्य भावो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८१ ॥
एकस्य चैको न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८२ ॥
एकस्य सांतो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८३ ॥
एकस्य नित्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८४ ॥
एकस्य वाच्यो न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८५ ॥
एकस्य नाना न तथा परस्य चिति द्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८६ ॥

एकस्य चेत्यो तथा न परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८७ ॥
एकस्य दृश्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८८ ॥
एकस्य वेद्यो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ८९ ॥
एकस्य भातो न तथा परस्य चितिद्वयोर्द्वाविति पक्षपातौ ।
यस्तत्त्ववेदी च्युतपक्षपातस्तस्यास्ति नित्यं खलु चिच्चिदेव ॥ ९० ॥
स्वेच्छासमुच्छलदनल्पविकल्पजालामेवं व्यतीत्य महतीं नयपक्षकक्षां ।
अन्तर्बहिः समरसैकरसस्वभावं स्वं भावमेकमुपयात्यनुभूतिमात्रं ॥ ९१ ॥
इन्द्रजालमिदमेवमुच्छलत्पुष्कलोच्चलविकल्पवीचिभिः ।
यस्य विस्फुरणमेव तत्क्षणं कृत्स्नमस्यति तदस्मि चिन्महः ॥ ९२ ॥

पक्षातिक्रान्तस्य किं स्वरूपमिति चेत् ?

दोण्हवि णयाण भणियं जाणइ णवरं तु समयपडिबद्धो।
ण दु णयपक्खं गिण्हदि किंचिवि णयपक्खपरिहीणो ॥१५३॥

द्वयोरपि नययोर्भणितं जानाति केवलं तु समयप्रतिबद्धः ।
न तु नयपक्षं गृह्णाति किंचिदपि नयपक्षपरिहीनः ॥१५३॥

आत्मख्याति:— [illegible] **दोण्हवि णयाण भणियं जाणइ** यथा भगवान् केवली [illegible] । **णवरं तु समयपडिबद्धो** [illegible] **णयपक्खपरिहीणो** [illegible] **ण दु णयपक्खं गिण्हदि किंचिवि** [illegible] गृह्णाति [illegible] न गृह्णाति । [illegible]

तात्पर्यवृत्ति:— [illegible]

चित्स्वभावभरभावितभावाऽभावभाव[illegible]नैः ।
बंधपद्धतिमपास्य समस्तां चेतये समयसारमपारम् ॥ ९३ ॥

पक्षातिक्रांत एव समयसार इत्यवतिष्ठते ।

सम्मद्दंसणणाणं एदं लहदित्ति णवरि ववदेसं ।
सव्वणयपक्खरहिदो भणिदो जो सो समयसारो ॥१५४॥

सम्यग्दर्शनज्ञानमेतल्लभत इति केवलं व्यपदेशं ।
सर्वनयपक्षरहितो भणितो यः स समयसारः ॥१५४॥

तात्पर्यवृत्ति —सव्वणयपक्खरहिदो भणिदो जो सो समयसारो इ[illegible] बहिर्विषयसमस्तमतिज्ञानविकल्परहितः सन् बद्धाबद्धादिविकल्पनयपक्ष[illegible] [illegible]निर्विकल्पसमाधिस्थैः पुरुषैर्दृश्यते ज्ञायते च यः आत्मा तेन कारणात् **सम्मद्दंसणणाणं एदं लहदित्ति णवरि ववदेसं** नवरि केवलं सकल[illegible]केवलदर्शनज्ञानसंज्ञां [illegible] । न च बद्धाबद्धादिव्यपदेशाविति । एवं निश्चयव्यवहारनयद्वयपक्षपातरहितशुद्धसमयसार[illegible] चतुष्टयेन नवमोंतराधिकारः समाप्तः ।

इत्यनेन प्रकारेण **जाव ण वेदि विसेसं** इत्यादिगाथाम[illegible] [illegible] प्रसूचनार्थं गाथाषट्कं । तदनंतरमज्ञानिसज्ञानिजीवा[illegible] [illegible] । [illegible] नकायपर्यायेणोत्पन्नव[illegible]भ्रूणादिक्रियायाः निराकरणमुख्यत्वेन गाथा[illegible] । [illegible] घम कुर्वंतीति समर्थनद्वारेण सूत्रसप्तकं । ततश्च [illegible] सूत्र[illegible] । तत परं ज्ञानमयाज्ञानमयपरिणामकथनमुख्यतया गाथानवकं । [illegible] प्रत्ययभेदप्रतिपादनरूपेण गाथापंचकं । ततश्च जीवपुद्गल[illegible] । तत परं नयपक्षपातरहितशुद्धसमयसारकथनरूपेण गाथाचतुष्टयं [illegible] नवभिरंतराधिकारैः समयसारव्याख्यायां शुद्धात्मानुभूति[illegible] [illegible] सबंधी पीठिकारूपस्तृतीयो महाधिकारः समाप्तः ।

तदनंतरं जीवाधिकाररंगभूमौ [illegible] [illegible] जीवाजीवौ पुण्यकर्मरूपेण [illegible] ।

आत्मख्याति —[illegible] एव केवलं सम्यग्दर्शन[illegible] । [illegible] पक्षातिक्रांततया विज्ञानसमस्तविकल्प[illegible] स समयसारः । [illegible] [illegible] निश्चित तत्र [illegible] [illegible] मतिज्ञानतत्त्व, तथा [illegible] नवविधा [illegible] [illegible] [illegible] केवलं [illegible] [illegible] ।

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

१ [illegible] ।

विकल्पकः परं कर्ता विकल्पः कर्म केवलम् ।
न जातु कर्तृकर्मत्वं सविकल्पस्य नश्यति ॥९६॥
यः करोति स करोति केवलं यस्तु वेत्ति स तु वेत्ति केवलम् ।
यः करोति न हि वेत्ति स क्वचित् यस्तु वेत्ति न करोति स क्वचित् ॥९७॥
ज्ञप्तिः करोतौ न हि भासतेंतः ज्ञप्तौ करोतिश्च न भासतेंतः ।
ज्ञप्तिः करोतिश्च ततो विभिन्ने ज्ञाता न कर्तेति ततः स्थितं च ॥९८॥
कर्ता कर्मणि नास्ति नास्ति नियतं कर्मापि तत्कर्तरि द्वंद्वं विप्रतिषिध्यते यदि तदा का कर्तृकर्मस्थितिः ।
ज्ञाता ज्ञातरि कर्म कर्मणि सदा व्यक्तेति वस्तुस्थितिर्नेपथ्ये बत नानटीति रभसा मोहस्तथाप्येष किं ॥९९॥
अथवा नानटीतां तथापि
कर्ता कर्ता भवति न यथा कर्म कर्मापि नैव ज्ञानं ज्ञानं भवति च यथा पुद्गलः पुद्गलोपि ।
ज्ञानज्योतिर्ज्वलितमचलं व्यक्तमंतस्तथोच्चैश्चिच्छक्तीनां निकरभरतोऽत्यंतगंभीरमेतत् ॥१००॥

इति जीवाजीवौ कर्तृकर्मवेषविमुक्तौ निष्क्रांतौ ।

इति समयसारव्याख्यायामात्मख्यातौ द्वितीयोऽङ्कः ।

तात्पर्यवृत्तिः — [illegible] निश्चयेनैकमपि पुद्गलकर्म व्यवहारेण द्विपात्रीभूतपुण्यपापरूपेण प्रवि[illegible] कम्ममसुहं कुसीलं इत्यादि [illegible] कृत्वा क्रमेणैकोनविंशतिसूत्रपर्यंतं पुण्यपापव्याख्यानं करोति । [illegible] भेदोऽस्ति तथापि निश्चयेन नास्ति इति व्याख्यानमुख्यत्वेन [illegible] शुद्धात्मानं विना आगमभाषया तु वीतरागसम्यक्त्वं विना व्रतदानादिकं [illegible] । सम्यक्त्वसहितं पुनः परंपरया मुक्तिकारणं च भवति इति मुख्यत्वेन [illegible] । तदनंतरं निश्चयरत्नत्रयात्मकमोक्षमार्गमुख्यत्वेन जीवादीसद्दहणं इत्यादि [illegible] गाथानिवहेन । तथाथ [illegible] पुण्यपापं [illegible] इति । तथैवमपि निश्चयनयेन पुद्गलकर्म [illegible] कथयति ।

अथ [illegible] — [illegible] कर्म [illegible] पुण्यपापरूपेण प्रविशति —

[illegible] मैक्यमुपानयन् ।
[illegible] सुधाप्लवः ॥१०१॥
[illegible] शूद्रः स्वयमहमिति स्नाति नित्यं तयैव ।
[illegible] शूद्रौ साक्षादपि च चरतो जातिभेदभ्रमेण ॥१०२॥

कम्ममसुहं कुसीलं सुहकम्मं चावि जाण सुहसीलं ।
किह तं होदि सुसीलं जं संसारं पवेसेदि ॥१५५॥

कर्माशुभं कुशीलं शुभकर्म चापि जानीत सुशीलं ।
कथं तद्भवति सुशीलं यत्संसारं प्रवेशयति ॥१५५॥

तात्पर्यवृत्तिः — कम्ममसुहं कुसीलं सुहकम्मं चावि जाण सुहसीलं [illegible]

[illegible]

शोभन भवति । यज्जीव संसारे प्रवेशयति । हेतुस्वभावानुभवबंधरूपाश्रयाणां निश्चयेनाभेदात् कर्मभेदो नास्तीति । तथाहि हेतुस्तावदुच्यते शुभाशुभपरिणामो हेतु । स च शुद्धनिश्चयेनाशुभत्वं प्रति, एक एव द्रव्य पुण्यपापरूप पुद्गलद्रव्यस्वभाव । सोऽपि निश्चयेन पुद्गलद्रव्यं प्रति, एक एव तत्फल सुखदुःखरूप स च फलरूपानुभव । सोप्यात्मोत्थनिर्विकारसुखानंदापेक्षया दु खरूपैणैक एव आश्रयस्तु शुभाशुभबंधरूप । सोऽपि बंध प्रत्येक एव इति हेतुस्वभावानुभवाश्रयाणां सदाप्यभेदात् । यद्यपि व्यवहारेण भेदोऽस्ति तथापि निश्चयेन शुभाशुभकर्मभेदो नास्ति इति व्यवहारवादिनां पक्षो बाध्यत एव ।

अथोभय कर्म, अविशेषेण बंधकारण साधयति

आत्मख्याति.—शुभाशुभजीवपरिणामनिमित्तत्वे सति कारणभेदात् शुभाशुभपुद्गलपरिणाममयत्वे सति स्वभावभेदात् शुभाशुभफलपाकत्वे सत्यनुभवभेदात् शुभाशुभमोक्षबंधमार्गाश्रितत्वे सत्याश्रयभेदात् चैकमपि कर्म किंचिच्छुभं किंचिदशुभमिति केषांचित्किल पक्ष", स तु प्रतिपक्ष" । तथाहि शुभोऽशुभो वा जीव परिणाम केवलाज्ञानत्वादेकस्तदेकत्वे सति कारणभेदात् एकं कर्म । शुभोऽशुभो वा पुद्गलपरिणाम केवल पुद्गलमयत्वादेकस्तदेकत्वे सति स्वभावाभेदादेकं कर्म । शुभोऽशुभो वा फलपाक- केवलपुद्गलमयत्वादेकस्तदेकत्वे सत्यनुभवाभेदादेकं कर्म । शुभाशुभौ मोक्षबंधमार्गौ तु प्रत्येकं केवलजीवपुद्गलमयत्वादनेकौ तदनेकत्वे सत्यपि केवलपुद्गलमयबंधमार्गाश्रितत्वेनाश्रयाभेदादेकं कर्म ॥

हेतुस्वभावानुभवाश्रयाणां सदाप्यभेदान्नहि कर्मभेद" ।
तद्बंधमार्गाश्रितमेकमिष्टं स्वयं समस्तं खलु बंधहेतु । १०३ ।

अथोभय कर्माविशेषेण बंधहेतु साधयति—

सोवण्णियह्मि णियलं बंधदि कालायसं च जह पुरिसं ।
बंधदि एवं जीवं सुहमसुहं वा कदं कम्मं ॥ १५६ ॥

सौवर्णिकमपि निगलं बध्नाति कालायसमपि च यथा पुरुषं ।
बध्नात्येवं जीवं शुभमशुभं वा कृतं कर्म । १५६ ।

तात्पर्यवृत्ति[1]—यथा सुवर्णनिगलं लोहनिगलं च अविशेषेण पुरुषं बध्नाति तथा शुभमशुभं वा कृतं कर्म अविशेषेण जीवं बध्नातीति । किंच । भोगाकांक्षानिदानरूपेण रूपलावण्यसौभाग्यकामदेवेन्द्राहमिंद्रख्यातिपूजालाभादिनिमित्तं यो व्रततपश्चरणदानपूजादिकं करोति, स पुरुष- तत्रनिमित्तं रत्न विक्रयवत्, भस्मनिमित्त रत्नराशिदहनवत्, सूत्रनिमित्त हारचूर्णवत्, कोद्रवक्षेत्रवृत्तिनिमित्तमगुरुवनच्छेदनवत् । वृथैव व्रतादिकं नाशयति । यस्तु शुद्धात्मभावनासाधनार्थं बहिरंगव्रततपश्चरणदानपूजादिकं करोति स परं परया मोक्षं लभते इति भावार्थं ।

अथोभयकर्म विशेषेण मोक्षमार्गविषये निषेधयति—

आत्मख्याति—शुभमशुभं च कर्माविशेषेणैव पुरुषं बध्नाति बंधत्वाविशेषात् कांचनकालायसनिगलवत्-

अथोभय कर्म प्रतिषेधयति—

तह्मादु कुसीलेहिंय रायं माकाहि माव संसग्गं ।
साधीणो हि विणासो कुसीलसंसग्गरायेण ॥ १५७ ॥

तस्मात्तु कुशीलैराग मा कुरु मा वा संसर्गं ।
स्वाधीनो हि विनाश कुशीलसंसर्गरागाभ्याम् । १५७ ।

---

[1] सुवर्ण ।

तात्पर्यवृत्ति —तम्हादु कुसीलेहिय रायं मा काहि मा व संसग्गं तस्मात् कारणात् कुशीलैः कुत्सितैः शुभाशुभकर्मभिः सह चित्तानुरागं मा कुरु। बहिरंगवचनकायगतसंसर्गं च मा कुरु कस्मात् इति चेत्। साहीणो हि विणासो कुसीलसंसग्गरायेण कुशीलसंसर्गरागाभ्यां स्वाधीनो निश्चयेन निर्विकल्पसमाधिविनाशः स्वाधीनो हि स्फुटं भवति अथवा स्वाधीनस्यात्मसुखस्य विनाश इति।

अथोभयकर्म प्रति निषेधं स्वयमेव श्रीकुन्दकुन्दाचार्यदेवा दृष्टान्तदार्ष्टान्ताभ्यां समर्थयन्ते—

आत्मख्याति —कुशीलशुभाशुभकर्मभ्यां सह रागसंसर्गौ प्रतिषिद्धौ बन्धहेतुत्वात् कुशीलमनोरमामनोरमकरेणुकुट्टिनीरागसंसर्गवत्। अथोभयं कर्म प्रतिषेध्यं स्वयं दृष्टांतेन समर्थयते—

जहणाम कोवि पुरिसो कुच्छियसील जण वियाणित्ता।
वज्जेदि तेण समय समग्ग रायकरण च ॥ १५८ ॥
एमेव कम्मपयडी सीलसहाव हि कुच्छिद णादु।
वज्जंति परिहरंति य त ससग्ग सहावरदा ॥ १५९ ॥

यथा नाम कश्चित्पुरुषः कुत्सितशील जन विज्ञाय।
वर्जयति तेन समक ससर्ग रागकरण च। १५८।
एवमेव कर्मप्रकृतिशीलस्वभाव च कुत्सितं ज्ञात्वा।
वर्जयंति परिहरंति च तत्संसर्गं स्वभावरताः। १५९।

तात्पर्यवृत्ति —यथा नाम स्फुटमहो वा कश्चित्पुरुषः कुत्सितशीलं जनं ज्ञात्वा वज्जेदि तेण समयं [illegible] रायकरणं च [illegible] बहिरंगसंसर्गं वर्जयति मनोगतरागं च वर्जयतीति [illegible] एमेव कम्मपयडी सीलसहावं हि कुच्छिदं णादु [illegible] पूर्वोक्तदृष्टान्तप्रकारेण [illegible] [illegible] वज्जंति परिहरंति य तं संसग्गं सहावरदा इत्यादि [illegible] [illegible] समस्तपरद्रव्यालंबनशून्यनिर्विकल्पसमाधिस्वभावरता [illegible] [illegible] इति भावार्थः।

[illegible]

[illegible]

[illegible]

रत्तो बंधदि कम्मं मुंचदि जीवो विरागसंपण्णो।
एसो जिणोवदेसो तम्हा कम्मेसु मा रज्ज ॥ १६० ॥

[illegible]
[illegible] । १६० ।

[illegible]

शुभाशुभसंकल्पविकल्परहितत्वेन स्वकीयशुद्धात्मभावनोत्पन्ननिर्विकारसुखामृतरसास्वादेन तृप्तो भूत्वा शुभाशुभकर्मणोः मा रज्यत्व रागं मा कुर्वीति। एवं यद्यप्यनुपचरितासद्भूतव्यवहारेण द्रव्यपुण्यपापयोर्भेदोऽस्ति अशुद्धनिश्चयेन पुनस्तदुदयजनितेंद्रियसुखदुःखयोर्भेदोऽस्ति तथापि शुद्धनिश्चयनयेन नास्ति इति व्याख्यानमुख्यत्वेन गाथाद्वयं गतं। अथ विशुद्धज्ञानशब्दवाच्यं परमात्मानं मोक्षकारणं कथयति।

आत्मख्याति'—यः खलु रक्तोऽवश्यमेव कर्म बध्नीयात् विरक्त एव मुच्येतेत्ययमागमः स सामान्येन रक्तत्वनिमित्तत्वाच्छुभमशुभमुभयकर्माविशेषेण बंधहेतुं साधयति तदुभयमपि कर्म प्रतिषेधयति।

> कर्म सर्वमपि सर्वविदो यद्बंधसाधनमुशन्त्यविशेषात्।
> तेन सर्वमपि तत्प्रतिषिद्धं ज्ञानमेव विहितं शिवहेतुः। १०४।
> निषिद्धे सर्वस्मिन् सुकृतदुरिते कर्मणि किल प्रवृत्ते नैष्कर्म्ये न खलु मुनयः संत्यशरणाः।
> तदा ज्ञाने ज्ञानं प्रतिचरितमेषां हि शरणं स्वयं विन्दन्त्येते परममृतं तत्र निरताः ॥ ९ ॥

अथ ज्ञानं हेतुं साधयति—

परमट्ठो खलु समओ सुद्धो जो केवली मुणी णाणी।
तह्मिट्ठिदा सभावे मुणिणो पावंति णिव्वाणं ॥ १६१ ॥

परमार्थः खलु समयः शुद्धो यः केवली मुनिर्ज्ञानी।
तस्मिन् स्थिताः स्वभावे मुनयः प्राप्नुवंति निर्वाणं। १६१।

तात्पर्यवृत्तिः—**परमट्ठो खलु समओ** उत्कृष्टार्थः परमार्थः सकः? परमात्मा अथवा धर्मार्थकाममोक्षलक्षणेषु परमार्थेषु परम उत्कृष्टो मोक्षलक्षणार्थः परमार्थः सोऽपि स एव। अथवा मतिश्रुतावधिमनःपर्ययकेवलज्ञानभेदरहितत्वेन निश्चयेनैकः परमार्थः सोऽपि परमात्मैव खलु स्फुटं **समओ** सम्यगयति गच्छति शुद्धगुणपर्यायान् परिणमतीति समयः। अथवा सम्यगयः संशयादिरहितो बोधो ज्ञानं यस्य भवति स समयः। अथवा समित्येकत्वेन परमसमरसीभावेन स्वकीयशुद्धस्वरूपे अयनं गमनं परिणमनं समयः सोऽपि स एव **सुद्धो** रागादिभावकर्मरहितो यः। सोऽपि स एव **केवली** परद्रव्यरहितत्वेनासहायः केवली सोऽपि स एव **मुणी** मुनिः प्रत्यक्षज्ञानी। सोऽपि परमात्मैव। **तह्मिट्ठिदा सहावे मुणिणो पावंति णिव्वाणं।** तस्मिन् परमात्मस्वभावे स्थिताः वीतरागस्वसंवेदनज्ञानरता मुनयस्तपोधना निर्वाणं प्राप्नुवंति लभंत इत्यर्थः ॥

अथ तस्मिन्नेव परमात्मनि स्वसंवेदनज्ञानरहितानां व्रततपश्चरणादिकं पुण्यबंधकारणमेवेति प्रतिपादयति

आत्मख्यातिः—ज्ञानं मोक्षहेतुः, ज्ञानस्य शुभाशुभकर्मणोर्बंधहेतुत्वे सति मोक्षहेतुत्वस्य तथोपपत्तेः तत्तु सकलकर्मादिजात्यंतरविविक्तचिज्जातिमात्रः परमार्थ आत्मेति यावत् स तु युगपदेकीभावप्रवृत्तज्ञानगमनतया समयः। सकलनयपक्षासंकीर्णैकज्ञानतया शुद्धः। केवलचिन्मात्रवस्तुतया केवली। मननमात्रभावमात्रतया मुनिः स्वयमेव ज्ञानतया ज्ञानी। स्वस्य भवनमात्रतया स्वभावः स्वतश्चितो भवनमात्रतया सद्भावो वेति शब्दभेदेऽपि न च वस्तुभेदः।

अथ ज्ञानं विधापयति—

परमट्ठम्हि य अठिदो जो कुणदि तवं वदं च धारयदि।
तं सव्वं बालतवं बालवदं विंति सव्वण्हू ॥ १६२ ॥

परमार्थे चास्थितः करोति तपो व्रतं च धारयति।
तत्सर्वं बालतपो बालव्रतं विदंति सर्वज्ञाः ॥१६२।

तात्पर्यवृत्तिः —परमट्ठम्मि य अठिदो जो कुणदि तवं वदं च धारयदि तस्मिन्नेव पूर्वसूत्रोक्तपरमार्थलक्षणे परमात्मस्वरूपे अस्थितो रहितो यस्तपश्चरणं करोति व्रतादिकं च धारयति तं **सव्वं बालतवं बालवदं विंति सव्वण्हू**—तत्सर्वं बालतपश्चरणं बालव्रतं ब्रुवंति कथयंति के ते? सर्वज्ञाः। कस्मात्? इति चेत् पुण्यपापोदयजनितसमस्तेंद्रियसुखदुःखाधिकारपरिहारपरिणताभेदरत्नत्रयलक्षणेन निश्चयभेदज्ञानेन रहितत्वात् इति ॥

अथ स्वसंवेदनज्ञानं तथैवाज्ञानं चेति यथाक्रमेण मोक्षबंधहेतू दर्शयति—

आत्मख्यातिः —ज्ञानमेव मोक्षस्य कारणं विहितं परमार्थभूतज्ञानशून्यस्याज्ञानकृतयोर्व्रततपःकर्मणोः बंधहेतुत्वाद्बालव्यपदेशेन प्रतिषिद्धत्वे सति तस्यैव मोक्षहेतुत्वात् ॥

अथ ज्ञानाज्ञाने मोक्षबंधहेतू नियमयति—

वदणियमाणि धरंता सीलाणि तहा तवं च कुव्वंता।
परमट्ठबाहिरा जेण तेण ते होंति अण्णाणी ॥ १६३ ॥

व्रतनियमान् धारयंतः शीलानि तथा तपश्च कुर्वाणाः।
परमार्थबाह्या येन तेन ते भवन्त्यज्ञानिनः ॥१६३॥

तात्पर्यवृत्तिः —वदणियमाणि धरंता सीलाणि तहा तवं च कुव्वंता त्रिगुप्तिसमाधिलक्षणाभेदज्ञानाद् बाह्या ये ते व्रतनियमान् धारयंतः, शीलानि तपश्चरणं च कुर्वाणा अपि मोक्षं न लभंते यस्मात् **परमट्ठबाहिरा जेण तेण ते होंति अण्णाणी** येन कारणेन पूर्वोक्तभेदज्ञानाभावात् परमार्थबाह्यास्तेन कारणेन ते भवंत्यज्ञानिनः। अज्ञानिनां तु कथं मोक्षः? ये तु परमसमाधिलक्षणभेदज्ञानसहितास्ते तु व्रतनियमानधरंतोऽपि शीलानि तपश्चरणं बाह्यद्रव्यरूपमकुर्वाणा अपि मोक्षं लभंते। तदपि कस्मात्? येन कारणेन पूर्वोक्तभेदज्ञानसद्भावात् [illegible]स्तेन कारणेन ते च ज्ञानिनो भवंति। ज्ञानिनां तु मोक्षो भवत्येवेति।

किंच विशिष्टव्रतनियमशीलबहिरंगतपश्चरणादिकं विनापि यदि मोक्षो भवति। तर्हि संकल्प[illegible] [illegible]ऽपि [illegible] तपश्चरणाभावेऽपि मोक्षो भवति इति सांख्यशैवमतानुसारिणां [illegible] निर्विकल्पत्रिगुप्तिसमाधिलक्षणभेदज्ञानसहितानां मोक्षो भवतीति [illegible]। एवंभूतभेदज्ञानकाले शुभाशुभा ये मनोवचनकायव्यापारा परंपरया मुक्ति[illegible] न संति। ये पुनः शुभाशुभविषयकषायव्यापारास्ते [illegible]। न हि [illegible] [illegible]। [illegible] ॥

अथ [illegible] शुद्धात्मभावनां विहाय पुण्यमेवेच्छंति, तेन मुक्तिकारणं [illegible] [illegible]—

आत्मख्यातिः —[illegible] परमार्थभूतानामज्ञानिनामर्थ[illegible] [illegible]। [illegible] ज्ञानभूतानां ज्ञानिनां [illegible] [illegible] ॥

[illegible] ॥ १०१ ॥

अथ [illegible]—

1 [illegible]

परमट्ठबाहिरा जे ते अण्णाणेण पुण्णमिच्छंति ।
संसारगमणहेदुं विमोक्खहेदुं अयाणंता ॥ १६४ ॥

परमार्थबाह्या ये ते अज्ञानेन पुण्यमिच्छन्ति ।
संसारगमनहेतुं विमोक्षहेतुमजानन्तः ॥१६४॥

परमट्ठबाहिरा इति—इह हि केचन सकलकर्मक्षयमोक्षमिच्छन्तोऽपि निजपरमात्मभावनापरिणताभेदरत्नत्रयलक्षणं परमसामायिकं पूर्वं दीक्षाकाले प्रतिज्ञायापि चिदानंदैकस्वभावशुद्धात्मसम्यक्श्रद्धानपरिज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकपरमसामायिकस्वभावनाभावात् परमार्थबाह्याः सन्तः संसारगमनहेतुत्वेन बंधकारणमप्यज्ञानभावेन पुण्यमिच्छन्ति । किं कुर्वन्तः ? अभेदरत्नत्रयात्मकं मोक्षकारणमजानन्तः । अथवा द्वितीयव्याख्यानं केचन पुण्यमेव मोक्षहेतुमिच्छन्ति । किं कुर्वन्तः ? पूर्वोक्तमभेदरत्नत्रयात्मकपरमसामायिकं मोक्षकारणमजानन्तः सन्त इति । किं च निर्विकल्पसमाधिरूपसामायिकस्य स्वयमेव प्रस्तावो नास्ति । अथवा निश्चयव्रतादीत्यभिप्रायः ।

इति वीतरागसम्यक्त्वरूपात् शुद्धात्मोपादेयभावनां विना व्रततपश्चरणादिकं पुण्यकारणमेव भवति तद्भावनासहितं पुनर्बहिरङ्गसाधकत्वेन परम्परया मुक्तिकारणं चेति व्याख्यानमुख्यत्वेन गाथाचतुष्टयं गतं ।

एवं गाथादशकेन पुण्याधिकारः समाप्तः ॥

अथ संवेरस्वपरावभिन्नत्वाच्च निश्चयेन व्याख्यानमुख्यत्वेन, अथवा निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन जीवादीसद्दहणमित्यादिसूत्रद्वयं । तदनन्तरं मोक्षहेतुभूतो योऽसौ सम्यक्त्वादिजीवगुणस्तत्प्रच्छादनमुख्यत्वेन । वत्थस्स सेदभावो इत्यादि गाथात्रयं । ततः परं पापं पुण्यं च बंधकारणमेवेति-मुख्यत्वेन । सो सव्वणाण इत्यादि सूत्रमेकं । तनश्च मोक्षहेतुभूतो योऽसौ जीवो गुणी तत्प्रच्छादनमुख्यतया सम्मत्त इत्यादि गाथात्रयमिति समुदायेन सूत्रनवकपर्यंतं तृतीयस्थले व्याख्यानं करोति । तद्यथा

अथ तेषामज्ञानिनां निश्चयमोक्षहेतुं दर्शयति—

आत्मरूपाणि—इह खलु केचिन्निखिलकर्मपक्षक्षयसंभावितात्मलाभं मोक्षमभिलषन्तोऽपि तद्धेतुभूतं सम्यग्दर्शनज्ञानचारित्रस्वभावपरमार्थभूतज्ञानभवनमात्रमैकाग्र्यलक्षणं समयसारभूतं सामायिकं प्रतिज्ञायापि दुरन्तकर्मचक्रोत्तरणक्लीबतया परमार्थभूतज्ञानानुभवनमात्रं सामायिकमात्मस्वभावमलभमानाः प्रतिनिवृत्तस्थूलतमसंक्लेशपरिणामकर्मतया प्रवर्तमानस्थूलतमविशुद्धिपरिणामकर्माणः कर्मानुभवगुरुलाघवप्रतिपत्तिमात्रसंतुष्टचेतसः स्थूललक्ष्यतया सकलं कर्मकाण्डमनुन्मूलयन्तः स्वयमज्ञानादशुभकर्म केवलं बंधहेतुमध्यास्य च व्रतनियमशीलतपःप्रभृतिशुभकर्म बंधहेतुमप्यजानन्तो मोक्षहेतुमभ्युपगच्छन्ति ।

अथ परमार्थमोक्षहेतुस्तेषां दर्शयति—

जीवादी सद्दहणं सम्मत्तं तेसिमधिगमो णाणं ।
रागादी परिहरणं चरणं एसो दु मोक्खपहो ॥ १६५ ॥

जीवादिश्रद्धानं सम्यग्दर्शनं तेषामधिगमो ज्ञानं ।
रागादिपरिहरणं चारित्रं एष तु मोक्षपथः ॥१६५॥

जीवादीसद्दहणं सम्मत्तं जीवादिनवपदार्थानां विपरीताभिनिवेशरहितत्वेन श्रद्धानं सम्यग्दर्शनं **तेसिमधिगमो णाणं** तेषामेव संशयविमोहविभ्रमरहितत्वेनाधिगमो निश्चयः परिज्ञानं सम्यग्ज्ञानं **रागादी परिहरणं चरणं** तेषामेव सम्बन्धित्वेन रागादिपरिहारश्चारित्रं **एसो दु मोक्खपहो** इत्येव व्यवहारमोक्षमार्गः । अथवा तेषामेव भूतार्थेनाधिगतानां पदार्थानां शुद्धात्मनः सकाशात् भिन्नत्वेन सम्यगवलोकन

निश्चयसम्यक्त्वं। तेषामेव सम्यक्परिच्छित्तिरूपेण शुद्धात्मनो भिन्नत्वेन निश्चय सम्यग्ज्ञानं। तेषामेव शुद्धात्मनो भिन्नत्वेन निश्चयं कृत्वा रागादिविकल्परहितत्वेन स्वशुद्धात्मन्यवस्थानं निश्चयचारित्रमिति निश्चयमोक्षमार्गः। अथ निश्चयमोक्षमार्गहेतोः शुद्धात्मस्वरूपात् यदन्यच्छुभाशुभमनोवचनकायव्यापाररूपं कर्म तन्मोक्षमार्गो न भवति इति प्रतिपादयति—

आत्मख्याति —मोक्षहेतुः किल सम्यग्दर्शनज्ञानचारित्रं। तत्र सम्यग्दर्शनं तु जीवादिश्रद्धानस्वभावेन ज्ञानस्य भवनं। जीवादिज्ञानस्वभावेन ज्ञानस्य भवनं ज्ञानं। रागादिपरिहरणस्वभावेन ज्ञानस्य भवनं चारित्रं। ततो ज्ञानमेव परमार्थमोक्षहेतुः।

अथपरमार्थमोक्षहेतोरन्यत् कर्म प्रतिषेधयति—

मोत्तूण णिच्छयट्ठं ववहारे ण विदुसा पवट्टंति।
परमट्ठमस्सिदाण दु जदीण कम्मक्खओ होदि ।।१६६।।

मुक्त्वा निश्चयार्थं व्यवहारे, न विद्वांसः प्रवर्तंते।
परमार्थमाश्रितानां तु यतीनां कर्मक्षयो भवति ।। १६६ ।।

तात्पर्यवृत्ति —मोत्तूण णिच्छयट्ठं ववहारे निश्चयार्थं मुक्त्वा व्यवहारविषये ण विदुसा पवट्टंति विद्वांसो ज्ञानिनो न प्रवर्तन्ते। कस्मात्? परमट्ठमस्सिदाण दु जदीण कम्मक्खओ होदि सम्यग्दर्शनज्ञानचारित्रैकाग्र्यपरिणतिरूपां निजशुद्धात्मभावनाश्रितानां परमार्थमाश्रितानां तु यतीनां कर्मक्षयो भवतीति। एवं मोक्षमार्गकथनरूपेण गाथाद्वयं गतं।

अथ मोक्षहेतुभूतानां सम्यग्दर्शनज्ञानचारित्राणां जीवगुणानां वस्त्रस्य मलेनेव मिथ्यात्वादिकर्मणा प्रच्छादनं दर्शयति—

आत्मख्याति —यः खलु परमार्थमोक्षहेतोरतिरिक्तो व्रततपःप्रभृतिशुभकर्मा केषांचिन्मोक्षहेतुः स सर्वोऽपि प्रतिषिद्धस्तस्य द्रव्यान्तरस्वभावत्वात् तत्स्वभावेन ज्ञानभवनस्याभवनात्। परमार्थमोक्षहेतोरेवैकद्रव्यस्वभावत्वात् तत्स्वभावेन ज्ञानभवनस्य भवनात्।

वृत्तं ज्ञानस्वभावेन ज्ञानस्य भवनं सदा। एकद्रव्यस्वभावत्वान्मोक्षहेतुस्तदेव तत् ।। १०७ ।।
वृत्तं कर्मस्वभावेन ज्ञानस्य भवनं न हि। द्रव्यान्तरस्वभावत्वान्मोक्षहेतुर्न कर्म तत् ।। १०८ ।।
मोक्षहेतुतिरोधानाद्बन्धत्वात्स्वयमेव च। मोक्षहेतुतिरोधायिभावत्वात्तन्निषिध्यते ।। १०९ ।।

अथ कर्म मोक्षहेतुतिरोधानकरणं साधयति—

वत्थस्स सेदभावो जह णासेदि मलविमेलणाच्छण्णो।
मिच्छत्तमलोच्छण्णं तह सम्मत्तं खु णादव्वं ।।१६७।।
वत्थस्स सेदभावो जह णासेदि मलविमेलणाच्छण्णो।
अण्णाणमलोच्छण्णं तह णाणं होदि णादव्वं ।।१६८।।
वत्थस्स सेदभावो जह णासेदि मलविमेलणाच्छण्णो।
तह दु कसायाच्छण्णं चारित्तं होदि णादव्वं ।।१६९।।

वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलनासक्तः।
मिथ्यात्वमलावच्छन्नं तथा सम्यक्त्वं खलु ज्ञातव्यं ।। १६७ ।।

वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलनाच्छन्नः।
अज्ञानमलावच्छन्नं तथा ज्ञानं भवति ज्ञातव्यं ॥ १६८ ॥
वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलनाच्छन्नः।
कषायमलावच्छन्नं तथा चारित्रमपि ज्ञातव्यं ॥ १६९ ॥

तात्पर्यवृत्तिः—वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विमेलेन मेलना सवधस्तेन च्छन्न। तथैव मिथ्यात्वमलेनोच्छन्नो मोक्षहेतुभूतो जीवस्य सम्यक्त्वगुणो नश्यतीति ज्ञातव्यं। वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विमेलेन मेलना सवधस्तेनच्छन्न। तथाऽज्ञानमलेनोच्छन्नो मोक्षहेतुभूतो जीवस्य ज्ञानगुणो नश्यतीति ज्ञातव्यं। वस्त्रस्य श्वेतभावो यथा नश्यति मलविमेलना, मलस्य विमेलेन मेलना सवधस्तेनच्छन्न। तथा कषायकर्ममलेनोच्छन्नो मोक्षहेतुभूतो जीवस्य चारित्रगुणो नश्यतीति ज्ञातव्यं। इति मोक्षहेतुभूतानां सम्यक्त्वादिगुणानां मिथ्यात्वाज्ञानकषायप्रतिबन्धप्रच्छादनकथनरूपेण गाथात्रयं गतं।

अथ कर्म स्वयमेव बंधहेतु कथं मोक्षकारणं भवतीति कथयति—

आत्मख्यातिः—ज्ञानस्य सम्यक्त्वं मोक्षहेतुः स्वभावः, परभावेन मिथ्यात्वनाम्ना कर्ममलेनावच्छन्नत्वात् तिरोधीयते। परभावभूतमलावच्छिन्नश्वेतवस्त्रस्वभावभूतश्वेतस्वभाववत्। ज्ञानस्य ज्ञानं मोक्षहेतुः स्वभावः, परभावेनाज्ञाननाम्ना कर्ममलेनावच्छन्नत्वात्तिरोधीयते। परभावभूतमलावच्छन्नश्वेतवस्त्रस्वभावभूतश्वेतस्वभाववत्। ज्ञानस्य चारित्रं मोक्षहेतुः स्वभावः, परभावेन कषायनाम्ना कर्ममलेनावच्छन्नत्वात्तिरोधीयते। परभावभूतमलावच्छिन्नश्वेतवस्त्रस्वभावभूतश्वेतस्वभाववत्। अतो मोक्षहेतुतिरोधानकरणात् कर्म प्रतिषिद्धं।
अथ कर्मणः स्वयं बन्धत्वं साधयति—

सो सव्वणाणदरसी कम्मरयेण णियेण उच्छण्णो।
संसारसमावण्णो णवि जाणदि सव्वदो सव्वं ॥१७०॥
स सर्वज्ञानदर्शी कर्मरजसा निजेनावच्छिन्नः।
संसारसमापन्नो न विजानाति सर्वतः सर्वं ॥ १७० ॥

सो सव्वणाणदरसी कम्मरयेण णियेण वच्छण्णो—स शुद्धात्मा निश्चयेन समस्तवस्तुज्ञानदर्शनस्वभावोऽपि निजकर्मरजसोच्छन्नो झम्पितः सन्। संसारसमावण्णो णवि जाणदि सव्वदो सव्वं। संसारसमापन्नः, संसारे पतितः सन् नैव जानाति सर्वं वस्तु सर्वतः सर्वप्रकारेण। ततो ज्ञायते कर्म कर्तृ स्वयमेव बन्धरूपं कथं मोक्षकारणं भवतीति। एवं स्वयमेव बन्धकारणमिति कथनरूपेण गाथा गता।
अथ पूर्वं मोक्षहेतुभूतानां सम्यक्त्वादिजीवगुणानां मिथ्यात्वादिकर्मणा प्रच्छादनं भवतीति कथितं इदानीं तद्गुणाधारभूतो गुणी जीवो मिथ्यात्वादिकर्मणा प्रच्छाद्यते इति प्रकाशयति—

आत्मख्यातिः—यतः स्वयमेव ज्ञानतया विश्वसामान्यविशेषज्ञानशीलमपि ज्ञानमनादिस्वपुरुषापराधप्रवर्तमानकर्ममलावच्छन्नत्वादेव बन्धावस्थायां सर्वतः सर्वमप्यात्मानमविजानदज्ञानभावेनैवेदमेवमवतिष्ठते। ततो नियतं स्वयमेव कर्मैव बन्धः। अतः स्वयं बन्धत्वात्कर्म प्रतिषिद्धं।
अथ कर्मणो मोक्षहेतुतिरोधायिभावत्वं दर्शयति—

सम्मत्तपडिणिवद्धं मिच्छत्तं जिणवरेहि परिकहिदं।
तस्सोदयेण जीवो मिच्छादिट्ठित्ति णादव्वो ॥१७१॥
णाणस्स पडिणिवद्धं अण्णाणं जिणवरेहि परिकहिदं।

भेदोन्मादं भ्रमरसभरान्नाटयत्पीतमोहं मूलोन्मूलं सकलमपि तत्कर्म कृत्वा बलेन ।
हेलोन्मीलत्परमकलया सार्धमारब्धकेलि ज्ञानज्योतिः कवलिततमः प्रोज्जजृम्भे भरेण ॥ ४ ॥

इति पुण्यपापरूपेण द्विपात्रीभूतमेकपात्रीभूय कर्म निष्क्रांतं ॥

इति समयसारव्याख्यायामात्मख्यातौ तृतीयोंकः ॥

तात्पर्यवृत्ति —अथ प्रविशत्यास्रवः । यत्र सम्यग्भेदभावनापरिणतं कारणसमयसार-रूपं संवरो नास्ति तत्रास्रवो भवतीति संवरविपक्षद्वारेण चतुर्दशगाथापर्यंतमास्रवव्याख्यानं करोति । तत्रादौ भेदज्ञानात्—शुद्धात्मोपलंभो भवति इति संक्षेपव्याख्यानमुख्यत्वेन **उवओग**—इत्यादि गाथात्रयं । तदनंतरं भेदज्ञानात्कथं शुद्धात्मोपलंभो भवतीति प्रश्ने परिहाररूपेण **जहकणयमग्गि** इत्यादि गाथाद्वयं । ततः परं शुद्धभावनया पुनः शुद्धो भवतीति मुख्यत्वेन **सुद्धं तु वियाणंतो** इत्यादि गाथैकं । ततः परं केन प्रकारेण संवरो भवतीति पूर्वपक्षे कृते सति परिहारमुख्यतया **अप्पाणमप्पणा** इत्यादि गाथात्रयं । अथात्मा परोक्षस्तस्य ध्यानं कथं क्रियतेति पृष्टे सति देवतारूपदृष्टांतेन परोक्षोऽपि ज्ञायत इति परिहाररूपेण **उवदेसेण** इत्यादि गाथाद्वयं । तदनंतरं, अथोदयप्राप्तप्रत्ययगतानां रागाद्यध्यवसानानामभावे सति जीवगतानां रागादिभावास्रवाणामभावो भवतीत्यादि संवरक्रमाख्यानमुख्यत्वेन **तेसिं हेदू** इत्यादि गाथात्रयं । एवं संवरविपक्षद्वारेणास्रवव्याख्याने समुदायपातनिका । तद्यथा प्रथमतस्तावच्छुभाशुभसमस्वरस्य परमोपायभूतं निर्विकारस्वसंवेदनज्ञानलक्षणं भेदज्ञानं निरूपयति

आत्मख्याति —अथ प्रविशति संवरः ।

आसंसारविरोधिसंवरजयैकांतावलिप्तास्रव न्यक्कारात्प्रतिलब्धनित्यविजयं संपादयत्संवरं ।
व्यावृत्तं पररूपतो नियमितं सम्यक् स्वरूपे स्फुरज्ज्योतिश्चिन्मयमुज्ज्वलं निजरसप्राग्भारमुज्जृम्भते ॥ १ ॥

तत्रादावेव सकलकर्मसंवरणस्य परमोपायभेदविज्ञानमभिनंदति

उवओगे उवओगो कोहादिसु णत्थि कोवि उवयोगो ।
कोहे कोहो चेव हि उवओगे णत्थि खलु कोहो ॥१७४॥
अट्ठवियप्पे कम्मे णोकम्मे चावि णत्थि उवओगो ।
उवओगह्मि य कम्मं णोकम्मं चावि णो अत्थि ॥१७५॥
एदं तु अविवरीदं णाणं जइया दु होदि जीवस्स ।
तइया ण किंचि कुव्वदि भावं उवओगसुद्धप्पा ॥१७६॥

उपयोगे उपयोगः क्रोधादिषु नास्ति कोप्युपयोगः ।
क्रोधे क्रोधश्चैव हि उपयोगे नास्ति खलु क्रोधः ॥१७४॥
अष्टविकल्पे कर्मणि नोकर्मणि चापि नास्त्युपयोगः ।
उपयोगेऽपि च कर्म नोकर्म चापि नो अस्ति ॥१७५॥
एतत्त्वविपरीतं ज्ञानं यदा भवति जीवस्य ।
न किंचित्करोति भावमुपयोगशुद्धात्मा ॥१७६॥

---

१ आसां खलु गाथानां समुदायार्थ आत्मख्यातिकारैः संवरप्रकरणे कृतस्तासामेव तात्पर्यवृत्तिकारैः आस्रवप्रकरणे तत्र संवरप्रतिपक्ष आस्रव इति संवरप्रतिपक्षमुख्यतया कक्षीकृत्य तात्पर्यवृत्तौ संवरस्थाने आस्रव व्याख्यानं च कृतं इति विज्ञेयं । २ गाथासप्तकमिदमपि क पुस्तके पाठः ।

तस्सोदयेण जीवो अण्णाणी होदि णादव्वो ॥१७२॥
चारित्तपडिणिबद्धं कसायं जिणवरेहि परिकहियं।
तस्सोदयेण जीवो अचरित्तो होदि णादव्वो ॥१७३॥

सम्यक्त्वप्रतिनिबद्धं मिथ्यात्वं जिनवरैः परिकथितं ।
तस्योदयेन जीवो मिथ्यादृष्टिरिति ज्ञातव्यः ॥ १७१ ॥
ज्ञानस्य प्रतिनिबद्धं अज्ञानं जिनवरैः परिकथितं ।
तस्योदयेन जीवोऽज्ञानी भवति ज्ञातव्यः ॥ १७२ ॥
चारित्रप्रतिनिबद्धः कषायो जिनवरैः प्रज्ञप्तः ।
तस्योदयेन जीवोऽचारित्रो भवति ज्ञातव्यः ॥ १७३ ॥

तात्पर्यवृत्ति —सम्यक्त्वप्रतिनिबद्धं प्रतिकूलं मिथ्यात्वं भवतीति जिनवरैः परिकथितं तस्योदयेन जीवो मिथ्यादृष्टिर्भवतीति ज्ञातव्यः । ज्ञानस्य प्रतिनिबद्धं प्रतिकूलमज्ञानं भवतीति जिनवरैः परिकथितं तस्योदयेन जीवश्चाज्ञानी भवतीति ज्ञातव्यः । चारित्रस्य प्रतिनिबद्धः प्रतिकूलः क्रोधादिकषायो भवतीति जिनवरैः परिकथितः तस्योदयेन जीवोऽचरित्रो भवतीति ज्ञातव्यः । एवं मोक्षहेतुभूतो योऽसौ जीवगुणः तत्प्रच्छादनकथनमुख्यत्वेन गाथात्रयं गतं । इति सम्यक्त्वादिजीवगुणा मुक्तिकारणं तद्गुणपरिणतो वा जीवो मुक्तिकारणं भवति तस्माच्छुद्धजीवाद्भिन्नं शुभाशुभमनोवचनकायव्यापाररूपं, तद्व्यापारेणोपार्जितं वा शुभाशुभकर्म मोक्षकारणं न भवतीति मत्वा हेयं त्याज्यमिति व्याख्यानमुख्यत्वेन गाथानवकं गतं । द्वितीयपातनिकाभिप्रायेण पापाधिकारव्याख्यानमुख्यत्वेन गतं । अत्राह शिष्यः । जीवादिसद्दहणमित्यादि व्यवहाररत्नत्रयव्याख्यानं कृतं तिष्ठति कथं पापाधिकार इति । तत्र परिहारः —यद्यपि व्यवहारमोक्षमार्गो निश्चयरत्नत्रयस्योपादेयभूतस्य कारणभूतत्वादुपादेयः परंपरया जीवस्य पवित्रताकरणात् पवित्रस्तथापि बहिर्द्रव्यालंबनत्वेन पराधीनत्वात्पततीति नश्यतीत्येकं कारणं । निर्विकल्पसमाधिरतानां व्यवहारविकल्पालंबनेन स्वरूपात्पतितं भवतीति द्वितीयं कारणं । इति निश्चयनयापेक्षया पापं । अथवा सम्यक्त्वादिविपक्षभूतानां मिथ्यात्वादीनां व्याख्यानं कृतमिति वा पापाधिकारः ।

इति समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां तात्पर्यवृत्तौ स्थलत्रयसमुदायेनैकोनविंशतिगाथाभिश्चतुर्थः पुण्यपापाधिकारः समाप्तः ।

तत्रैव सति व्यवहारनयेन पुण्यपापरूपेण द्विभेदमपि कर्म निश्चयेन शृंगाररहितपात्रवत्पुद्गलरूपेणैकीभूय निष्क्रांतं ॥

आत्मख्याति —सम्यक्त्वस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकं किल मिथ्यात्वं तत्तु स्वयं कर्मैव तदुदयादेव ज्ञानस्य मिथ्यादृष्टित्वं । ज्ञानस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकमज्ञानं तत्तु स्वयं कर्मैव तदुदयादेव ज्ञानस्याज्ञानत्वं । चारित्रस्य मोक्षहेतोः स्वभावस्य प्रतिबंधकः किल कषायः सतु स्वयं कर्मैव तदुदयादेव ज्ञानस्याचारित्रत्वं । अतः स्वयं मोक्षहेतुतिरोधायिभावत्वात्कर्म प्रतिषिद्धं ।

संन्यस्तव्यमिदं समस्तमपि तत्कर्मैव मोक्षार्थिना संन्यस्ते सति तत्र का किल कथा पुण्यस्य पापस्य वा ।
सम्यक्त्वादिनिजस्वभावभवनान्मोक्षस्य हेतुर्भवन्नैष्कर्म्यप्रतिबद्धमुद्धतरसं ज्ञानं स्वयं धावति ॥ १ ॥
यावत्पाकमुपैति कर्मविरतिर्ज्ञानस्य सम्यङ् न सा कर्मज्ञानसमुच्चयोऽपि विहितस्तावन्न काचित्क्षतिः ।
किंत्वत्रापि समुल्लसत्यवशतो यत्कर्म बंधाय तन्मोक्षाय स्थितमेकमेव परमं ज्ञानं विमुक्तं स्वतः ॥ २ ॥
मग्नाः कर्मनयावलम्बनपरा ज्ञानं न जानंति ये मग्ना ज्ञाननयैषिणोऽपि यदतिस्वच्छंदमंदोद्यमाः ।
विश्वस्योपरि ते तरंति सततं ज्ञानं भवंतः स्वयं ये कुर्वंति न कर्म जातु न वशं यांति प्रमादस्य च ॥३॥

भेदोन्मादं भ्रमरसभरान्नाटयत्पीतमोहं मूलोन्मूलं सकलमपि तत्कर्म कृत्वा बलेन ।
हेलोन्मीलत्परमकलया सार्धमारब्धकेलि ज्ञानज्योतिः कवलिततमः प्रोज्जजृम्भे भरेण ॥ ४ ॥

इति पुण्यपापरूपेण द्विपात्रीभूतमेकपात्रीभूय कर्म निष्क्रान्तं ॥

इति समयसारव्याख्यायामात्मख्यातौ तृतीयोऽङ्कः ॥

तात्पर्यवृत्तिः —अथ प्रविशत्यास्रवः । यत्र सम्यग्भेदभावनापरिणत कारणसमयसार-रूपः संवरो नास्ति तत्रास्रवो भवतीति संवरविपक्षद्वारेण चतुर्दशगाथापर्यंतमास्रवव्याख्यानं करोति । तस्मादौ भेदज्ञानात् शुद्धात्मोपलम्भो भवतीति संक्षेपव्याख्यानमुख्यत्वेन **उवओग**—इत्यादि गाथात्रयं । तदनंतरं भेदज्ञानाच्छुद्धात्मोपलम्भो भवतीति प्रश्ने परिहाररूपेण **जह कणयमग्गि** इत्यादि गाथाद्वयं । ततः परं शुद्धभावनया पुनः शुद्धो भवतीति मुख्यत्वेन **सुद्धं तु वियाणंतो** इत्यादि गाथैकं । ततः परं केन प्रकारेण संवरो भवतीति पूर्वपक्षे कृते सति परिहारमुख्यतया **अप्पाणमप्पणा** इत्यादि गाथात्रयं । अथात्मा परोक्षस्तस्य ध्यानं कथं क्रियेतेति पृष्टे सति देवतारूपकध्यातं परोक्षेऽपि ज्ञायत इति परिहाररूपेण **उवदेसेण** इत्यादि गाथाद्वयं । तदनंतरं, अथोदयप्राप्तप्रत्ययगतानां रागाद्यध्यवसानानाम् भावे सति जीवगतानां रागादिभावास्रवाणामभावो भवतीत्यादि संवरक्रमव्याख्यानमुख्यत्वेन **तेसिं हेदू** इत्यादि गाथात्रयं । एवं संवरविपक्षद्वारेणास्रवव्याख्यानं समुदायपातनिका । तद्यथा प्रथमतस्तावच्छुभाशुभसंवरस्य परमोपायभूतं निर्विकारस्वसंवेदनज्ञानलक्षणं भेदज्ञानं निरूपयति

आत्मख्यातिः —अथ प्रविशति संवरः ।

आसंसारविरोधिसंवरजयैकान्तावलिप्तास्रव-न्यक्कारात्प्रतिलब्धनित्यविजयं संपादयत्संवरं ।
व्यावृत्तं पररूपतो नियमितं सम्यक् स्वरूपे स्फुरज्ज्योतिश्चिन्मयमुज्ज्वलं निजरसप्राग्भारमुज्जृम्भते ॥

तत्रादावेव सकलकर्मसंवरणस्य परमोपायंभेदविज्ञानमभिनन्दति

उवओगे उवओगो कोहादिसु णत्थि कोवि उवयोगो ।
कोहे कोहो चेव हि उवओगे णत्थि खलु कोहो ॥१७४॥
अट्ठवियप्पे कम्मे णोकम्मे चावि णत्थि उवओगो ।
उवओगह्मि य कम्मं णोकम्मं चावि णो अत्थि ॥१७५॥
एदं तु अविवरीदं णाणं जइया दु होदि जीवस्स ।
तइया ण किंचि कुव्वदि भावं उवओगसुद्धप्पा ॥१७६॥

उपयोगे उपयोगः क्रोधादिषु नास्ति कोप्युपयोगः ।
क्रोधे क्रोधश्चैव हि उपयोगे नास्ति खलु क्रोधः ॥१७४॥
अष्टविकल्पे कर्मणि नोकर्मणि चापि नास्त्युपयोगः ।
उपयोगेऽपि च कर्म नोकर्म चापि नो अस्ति ॥१७५॥
एतत्त्वविपरीतं ज्ञानं यदा भवति जीवस्य ।
न किंचित्करोति भावमुपयोगशुद्धात्मा ॥१७६॥

---

१ आस्रवो खलु गाथानां समुदाय [illegible] आस्रवप्रकरणे [illegible] आस्रवप्रकरण तत्र संवरप्रतिपक्ष आस्रव इति संवरस्य [illegible] मुख्यतया [illegible] संवरस्थाने आस्रव [illegible] इति [illegible] । २ [illegible] पुस्तके पाठः ।

तात्पर्यवृत्ति –उवओगे उवओगो ज्ञानदर्शनोपयोगलक्षणत्वादभेदनयेनात्मैवोपयोगस्तस्मिन्नुप-योगाभिधाने शुभात्मन्युपयोग आत्मा तिष्ठति **कोहादिसु णत्थि कोवि उवओगो** शुद्धनिश्चयेन क्रोधादि परिणामेषु नास्ति कोऽप्युपयोग आत्मा **कोहे कोहो चेव हि** क्रोधे क्रोधश्चैव हि स्फुटं तिष्ठति **उवओगे णत्थि खलु कोहो** उपयोगे शुद्धात्मनि नास्ति खलु स्फुटं क्रोध ॥

अट्ठवियप्पे कम्मे णोकम्मे चावि णत्थि उवओगो तथैव चाष्टविधज्ञानावरणादिद्रव्यकर्मणि, औदारिकशरीरादिनोकर्मणि चैव नास्त्युपयोग–उपयोगशब्दवाच्य शुद्धबुद्धैकस्वभाव परमात्मा **उवओग-म्हि य कम्मं णोकम्मं चावि णो अत्थि** उपयोगे शुद्धात्मनि शुद्धनिश्चयेन कर्म नोकर्म चैव नास्ति इति।

एदं तु अविवरीदं णाणं जइया दु होदि जीवस्स इदं तु चिदानंदैकस्वभावशुद्धात्मसंवित्ति रूपं विपरीताभिनिवेशरहितं भेदज्ञानं यदा भवति जीवस्य **तइया ण किंचि कुव्वदि भावं उवओग सुद्धप्पा** तस्माद्भेदविज्ञानात्स्वात्मोपलम्भो भवति शुद्धात्मोपलम्भे जाते किमपि मिथ्यात्वरागादिभावान् करोति न परिणमति। कथंभूतः सन्? निर्विकारचिदानंदैकशुद्धोपयोगशुद्धात्मा शुद्धस्वभावः सन्निति। यत्र भूतो संवरो नास्ति तत्राश्रयो भवत्यस्मिन्नधिकारे संवर ज्ञातव्यमिति तात्पर्यं। एवं पूर्वप्रकारेण भेदविज्ञानात् शुद्धात्मोपलम्भो भवति। शुद्धात्मोपलम्भे सति मिथ्यात्वरागादिभावं न करोति ततो नवतरकर्मसंवरो भव तीति संवरव्याख्यानमुख्यत्वेन गाथात्रयं गतं।

अथ कथं भेदज्ञानादेव शुद्धात्मोपलंभो भवतीति पृच्छति–

आत्मख्यातिः—न खल्वेकस्य द्वितीयमस्ति द्वयोर्भिन्नप्रदेशत्वेनैकसत्तानुपपत्तेस्तदसत्वे च तेन सहाधाराधेयसंबंधोऽपि नास्त्येव ततः स्वरूपप्रतिष्ठत्वलक्षण एवाधाराधेयसंबंधोऽवतिष्ठते तेन ज्ञानं जान-त्तायां स्वरूपे प्रतिष्ठितं। जानत्ताया ज्ञानादपृथग्भूतत्वात् ज्ञाने एव स्यात्। क्रोधादीनि क्रुध्यत्तादौ स्वरूपे प्रतिष्ठितानि क्रुध्यत्तादेः क्रोधादेः पृथग्भूतत्वात्क्रोधादिष्वेव स्युः, न पुनः क्रोधादिषु कर्मणि नोकर्मणि वा ज्ञानमस्ति। न च ज्ञाने क्रोधादयः कर्म नोकर्म वा संति परस्परमत्यंतस्वरूपवैपरीत्येन परमार्थाधाराधेय संबंधशून्यत्वात्। न च ज्ञानस्य जानत्तास्वरूपं तथा क्रुध्यत्तादिरपि क्रोधादीनां च यथा क्रुध्यत्तादि स्व रूपं तथा जानत्तापि कथंचनापि व्यवस्थापयितुं शक्येत जानत्तायाः क्रुध्यत्तादेश्च स्वभावभेदेनोद्भासमानत्वात् स्वभावभेदाच्च वस्तुभेद एवेति नास्ति ज्ञानाज्ञानयोराधाराधेयत्वं। किं च यदा किलैकमेवाकाशं स्वबुद्धिमधि-रोप्याधाराधेयभावो विभाव्यते तदा शेषद्रव्यांतराधिरोपनिरोधादेव बुद्धेर्न भिन्नाधिकरणापेक्षा प्रभवति। तद प्रभवे चैकमाकाशमेवैकस्मिन्नाकाश एव प्रतिष्ठितं विभावयतो न पराधाराधेयत्वं प्रतिभाति ततो ज्ञानमेव ज्ञाने एव क्रोधादय एव क्रोधादिष्वेवेति, साधु सिद्धं भेदविज्ञानं ॥

चैद्रूप्यं जडरूपतां च दधतोः कृत्वा विभागं द्वयोरंतर्दारुणदारणेन परितो ज्ञानस्य रागस्य च।
भेदज्ञानमुदेति निर्मलमिदं मोदध्वमध्यासिताः शुद्धज्ञानघनौघमेकमधुना संतो द्वितीयच्युताः ॥

एवमिदं भेदविज्ञानं यदा ज्ञानस्य वैपरीत्यकणिकामप्यनासादयदविचलितमवतिष्ठते तदा शुद्धोपयोग मयात्मत्वेन ज्ञानं ज्ञानमेव केवलं सन्न किंचनापि रागद्वेषमोहरूपं भावमारचयति ततो भेदविज्ञानाच्छुद्धात्मो पलंभः प्रभवति। शुद्धात्मोपलंभात् रागद्वेषमोहाभावलक्षणः संवरः प्रभवति। कथं भेदविज्ञानाद् शुद्धात्मोपलंभ इति चेत्—

जह कणयमग्गितवियं पि कणयसहावं ण तं परिच्चयदि।
तह कम्मोदयतविदो ण जहदि णाणी दु णाणित्तं ॥१७७॥
एवं जाणदि णाणी अण्णाणी मुणदि रागमेवादं।
अण्णाणतमोच्छण्णो आदसहावं अयाणंतो ॥१७८॥

यथा कनकमग्नितप्तमपि कनकभाव न तत्परित्यजति ।
तथा कर्मोदयतप्तो न जहाति ज्ञानी तु ज्ञानित्व ॥१७७॥
एव जानाति ज्ञानी अज्ञानी जानाति रागमेवात्मान ।
अज्ञानतमोऽवच्छन्नमात्मस्वभावमजानन् ॥१७८॥

तात्पर्यवृत्ति —जह कणयमग्गितवियपि कणयसहाव ण त परिचयदि—यथा कनक सुवर्णमग्नितप्तमपि त कनकस्वभाव न परित्यजति । तह कम्मोदयतविदो ण चयदि णाणी दु णाणित्त तेन प्रकारेण तीव्रपरीषहोपसर्गेण कर्मोदयेन सततोऽपि रागद्वेषमोहपरिणामपरिहारपरिणतो भेदरत्नत्रयलक्षणभेदज्ञानी न त्यजति । किं तत् ? —शुद्धात्मसवित्तिलक्षण ज्ञानित्व पाडवादिवदिति । एव जाणदि णाणी एवमुक्तप्रकारेण शुद्धात्मान जानाति वीतरागस्वसवेदनलक्षणभेदज्ञानी अण्णाणी मुणदि रागमेवाद अज्ञानी पुन पूर्वोक्तभेदज्ञानाभावात् मिथ्यात्वरागादिरूपमेवात्मान मनुते जानाति । कथभूत सन् ? अण्णाणतमोच्छण्णो अज्ञानतमसोऽवच्छन्न प्रच्छादितो झपित । पुनरपि कथभूत सन् । आदसहाव अयाणतो निर्विकारपरमचैतन्यचमत्कारस्वभाव शुद्धात्मान निर्विकल्पसमाधेरभावादजानन् अननुभवन् इति । एव भेदज्ञानात्कथ शुद्धात्मोपलम्भो भवतीति पृष्टे प्रत्युत्तररूपेण गाथाद्वय गत ।

अथ कथ शुद्धात्मोपलम्भात्सवर इति पुनरपि पृच्छति—

को णाम भणिज्ज बुहो णादु सव्वे परोदये भावे ।
मज्झमिण तिय वयण जाणतो अप्पय सुद्ध ॥३२८॥

को नाम भणेद् बुधः ज्ञात्वा सर्वान् परोदयान् भावान् ।
ममेदमिति वचनं जानन्नात्मानं शुद्धं ॥ ३२८ ॥

तात्पर्यवृत्तिः—को णाम भणिज्ज बुहो को ब्रूयाद्बुधो ज्ञानी विवेकी नाम स्फुटमहो वा न कोऽपि । किं ब्रूयात् । मज्झमिणं तिय वयणं ममेदमिति वचनं किं कृत्वा ? णादुं ज्ञात्वा निजशुद्धात्मानुभूति [illegible] [illegible] । कान् ? सव्वे परोदये भावे सर्वान् मिथ्यात्वरागादिभावान् विभावपरिणामान् । कथंभूतान् ? परोदयान् शुद्धात्मनः सकाशात् परैः कर्मोदयैर्जनितान् । किं कुर्वन् सन् ? जाणंतो अप्पयं सुद्धं जानन् [illegible] । [illegible] ।

[illegible]

आत्मख्याति —यो हि परात्मनोर्नियतस्वलक्षणविभागपातिन्या प्रज्ञया ज्ञानी स्यात् स खल्वेकं चिन्मात्रं भावमात्मीयं जानाति शेषांश्च सर्वानेव भावान् परकीयान् जानाति । एवं जानन् कथं परभावान् ममेमे इति ब्रूयात् परात्मनोर्निश्चयेन स्वस्वामिसंबंधस्यासंभवात् । अतः सर्वथा चिद्भाव एव गृहीतव्यः शेषाः सर्वे एव भावाः प्रहातव्या इति सिद्धांतः —

सिद्धांतोऽयमुदात्तचित्तचरितैर्मोक्षार्थिभिः सेव्यतां शुद्धं चिन्मयमेकमेव परमं ज्योतिः सदैवास्म्यहं ।
एते ये तु समुल्लसंति विविधा भावाः पृथग्लक्षणास्तेऽहं नास्मि यतोऽत्र ते मम परद्रव्यं समग्रा अपि ।।१७८।।

परद्रव्यग्रहं कुर्वन् बध्यते वापराधवान् ।
बध्यतानपराधेन स्वद्रव्ये संवृतो मुनिः ॥ १७९ ॥

तेयादी अवराहे कुव्वदि जो सो ससंकिदो होदि ।
मा वज्झेऽहं केणवि चोरोत्ति जणम्मि वियरंतो ॥३२९॥
जो ण कुणदि अवराहे सो णिस्संको दु जणवदे भमदि ।
णवि तस्स वज्झिदुं जे चिंता उप्पज्जदि कयावि ॥३३०॥
एवं हि सावराहो वज्झामि अहं तु संकिदो चेदा ।
जो पुण णिरवराहो णिस्संकोहं ण वज्झामि ॥३३१॥

स्तेयादीनपराधान् करोति यः स तु शंकितो भवति ।
मा बध्ये केनापि चौर इति जने विचरन् ॥ ३२९ ॥
यो न करोत्यपराधान् स निश्शंकस्तु जनपदे भ्रमति ।
नापि तस्य बद्धुं यो चिंतोत्पद्यते कदाचित् ॥ ३३० ॥
एवं हि सापराधो बध्येऽहं तु शंकितश्चेतयिता ।
यदि पुनर्निरपराधो निश्शंकोऽहं न बध्ये ॥ ३३१ ॥

तात्पर्यवृत्तिः—तेयादी अवराहे कुव्वदि जो सो ससंकिदो होदि यश्चौर्यपरदारादिपराधान् करोति स पुरुषः सशंकितो भवति । केन रूपेण ? मा वज्झेहं केणवि चोरोत्ति जणम्मि वियरंतो जने विचरन् माहं बध्ये केनापि तलवरादिना । किं कृत्वा ? चौर इति मत्वा । इत्यन्वयदृष्टांतगाथा गता ।

जो ण कुणदि अवराहे सो णिस्संको दु जणवदे भमदि यस्तु परदारादि[illegible] न करोति स निश्शंको जनपदे लोके भ्रमति । णवि तस्स वज्झिदुं जे चिंता उप्पज्जदि कयावि तस्य चिंता नोत्पद्यते कदाचिदपि जे अहो यस्मात्कारणात् स निरपराधः । केन रूपेण चिंता नोत्पद्यते ? नाहं बध्ये केनापि चौर इति मत्वा । एवं व्यतिरेकदृष्टांतगाथा गता । एवंहि सावराहो वज्झामि अहं तु संकिदो चेदा यो रागादि[illegible] करोति स [illegible] शंकितो भवति । केन [illegible] बध्येऽहं [illegible] । [illegible] प्रतिक्रमणादि दंडं ददाति जो पुण णिरवराहो णिस्संकोहं ण वज्झामि यस्तु पुनर्निर[illegible] केन रूपेण ? इति चेत् [illegible] ज्ञानादिरूपनिर्विकल्पसमाधिभावनया शुद्धात्म इत्यर्थः [illegible] ।

अथ को हि नामापराध [illegible] ।

१ म पुस्तके साधाराधोऽस्ति [illegible] ।

मोक्षकारण भवति, अ यथा स्वगादिसुखनिमित्त पुण्यकारणमेव। यत्पुनरज्ञानिजनगतं मिथ्यात्वविषयकषायप रिणतिरूपमप्रतिक्रमण तन्नरकादिदुःखकारणमेव। एव प्रतिक्रमणाद्यष्टविकल्परूपशुभोपयोगो यद्यपि सविकल्पावस्थायाममृतकुम्भो भवति तथापि सुगदुःखादिसमताऽलक्षणपरमोपेक्षारूपसंयमापेक्षया विषकुम्भ एवेति व्याख्यानमुख्यत्वेन चतुर्थस्थले गाथाष्टक गतं।

इति समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां तात्पर्यवृत्तौ द्वाविंशतिगाथा भिश्चतुर्भिरन्तराधिकारैरष्टमो मोक्षाधिकार समाप्त ।

आत्मख्याति:—यस्तावदज्ञानिजनसाधारणोऽप्रतिक्रमणादि स शुद्धात्मसिद्ध्यभावस्वभावत्वेन स्वयमेवापराधत्वाद्विषकुम्भ एव किं विचारेण । यस्तु द्रव्यरूप प्रतिक्रमणादि स सर्वापराधविषदोषकर्षणसमर्थत्वेनामृतकुम्भोऽपि प्रतिक्रमणादिविलक्षणाप्रतिक्रमणादिरूपां तार्तीयीकीं भूमिमपश्यत स्वकार्यकरणासमर्थत्वेन विपक्षकार्यकारित्वाद्विषकुम्भ एव स्यात्। अप्रतिक्रमणादिरूपा तृतीयभूमिस्तु स्वयं शुद्धात्मसिद्धिरूपत्वेन सर्वापराधविषदोषाणां सर्वंकषत्वात् साक्षात्स्वयममृतकुम्भो भवतीति व्यवहारेण द्रव्यप्रतिक्रमणादेरपि, अमृतकुम्भत्व साधयति । तयैव च निरपराधो भवति चेतयिता । तदभावे द्रव्यप्रतिक्रमणादेरप्यपराध एव । अतस्तृतीयभूमिकयैव निरपराधत्वमित्यवतिष्ठते तत्प्राप्त्यर्थ एवायं द्रव्यप्रतिक्रमणादि, ततो मेति मस्था यत्प्रतिक्रमणादीन् श्रुतिस्त्याजयति किंतु द्रव्यप्रतिक्रमणादिना न मुञ्चति अन्यदपीयप्रतिक्रमणाप्रतिक्रमणाद्यगोचराप्रतिक्रमणादिरूप शुद्धात्मसिद्धिलक्षणमतिदुष्कर किमपि कारयति । वक्ष्यते चात्र—

कम्म ज पुव्वकय सुहासुहमणेयवित्थरविसेस ।
तत्तो णियत्तए अप्पय तु जो सो पडिकम्मण इत्यादि ॥

अतो हता प्रमादिनो गता सुखासीनतां । प्रलीन चापल मुन्मीलितमालबन ।
आत्मन्येवालानित चित्तमासपूर्णविज्ञानघनोपलब्धे ॥१८१॥
यत्र प्रतिक्रमणमेव विष प्रणीत तत्राप्रतिक्रमणमेव सुधा कुत स्यात्।
तत्किं प्रमाद्यति जन प्रपतन्नधोऽध किं नोर्ध्वमूर्ध्वमधिरोहति निष्प्रमाद ॥१८२॥
प्रमादकलित कथ भवति शुद्धभावोऽलस कषायभरगौरवादलसता प्रमादो यत ।
अत स्वरसनिर्भरे नियमित स्वभावे भवन्मुनि परमशुद्धतां व्रजति मुच्यते वाचिरात् ॥१८३॥
त्यक्त्वा शुद्धिविधायि तत्किल परद्रव्य समग्र स्वय स्वद्रव्ये रतिमेति य स नियत सर्वापराधच्युत ।
बंधध्वसमुपेत्य नित्यमुदितस्वज्योतिरच्छोच्छलच्चैतन्यामृतपूरपूर्णमहिमा शुद्धो भवन्मुच्यते ॥१८४॥
बंधच्छेदात्कलयदतुल मोक्षमक्षय्यमेतन्नित्योद्योतस्फुटितसहजावस्थमेकांतशुद्धं ।
एकाकारस्वरसभरतोऽत्यंतगंभीरधीर पूर्णज्ञानज्वलितमचले स्वस्य लीनं महिम्नि ॥१८५॥

इति मोक्षो निष्क्रांत

इति समयसारव्याख्यायामात्मख्यातौ, अष्टमोऽङ्क. ।

तात्पर्यवृत्ति—तत्रैव सति शृंगाररहितपात्रवद्रागादिरहितशांतरसपरिणतशुद्धात्मरूपेण मोक्षो निष्क्रांत।

अथ प्रविशति सर्वविशुद्धज्ञान —ससारपर्यायमाश्रित्याशुद्धोपादानरूपेणाशुद्धनिश्चयनयेन यद्यपि कर्तृत्वभोक्तृत्वबधमोक्षादिपरिणामसहितो जीवस्तथापि सर्वविशुद्धपारिणामिकपरमग्राहकेण शुद्धोपादानरूपेण शुद्धद्रव्यार्थिकनयेन कर्तृत्व–भोक्तृत्व–बधमोक्षादिकारणभूतपरिणामशून्य एवेति। **दविय ज उप्पज्जदि**

...मादि कृत्वा चतुर्दशगाथापर्यंत मोक्षपदार्थचूलिकाव्याख्यानं करोति । तत्रादौ निश्चयेन कर्मक...
...हयत्वेन सूत्रचतुष्टयं । तदनंतरं गुरुस्यापि यद्ज्ञानावरणप्रकृतिबंधो भवति तदज्ञानस्य माहात्म्य...
...र्थं चेदा दु पयडिअट्ठ इत्यादि प्राकृतसूत्रचतुष्टयं । अत पर भोक्तृत्वाभावज्ञापनार्थ...
...कम्मफल इत्यादिसूत्रचतुष्टयं । तदनंतरं मोक्षचूलिकोपसंहाररूपेण विकुणदि इत्यादि सूत्र...
...पतानि मोक्षपदार्थचूलिकायां समुदायपातनिका ।
...थ निश्चयेन कर्मणां कर्ता न भवति—इत्याख्याति—

दविय ज उप्पज्जदि गुणेहि ततेहि जाणसु अणण्ण ।
जह कडयादीहिं दु पज्जएहिं कणय अणण्णमिह ॥३२६॥
जीवस्साजीवस्सय जे परिणामा दु देसिदा सुत्ते ।
त जीवमजीव वा तेहिमणण्ण वियाणाहि ॥ ३२७ ॥
ण कुदोवि विउप्पण्णो जह्मा कज्ज ण तेण सो आदा ।
उप्पादेदि ण किंचिवि कारणमवि तेण ण सो होदि ॥ ३२८ ॥
कम्म पडुच्च कत्ता कत्तार तह पडुच्च कम्माणि ।
उप्पज्जतिय णियमा सिद्धी दु ण दिस्सदे अण्णा ॥ ३२९ ॥

द्रव्य यदुत्पद्यते गुणैस्तैस्तैर्जानीह्यनन्यत् ।
यथा कटकादिभिस्तु पर्यायैः कनकमनन्यदिह ॥३२६॥
जीवस्याजीवस्य तु ये परिणामास्तु दर्शिताः सूत्रे ।
ते जीवमजीव वा तैरनन्य विजानीहि ॥३२७॥
न कुतश्चिदप्युत्पन्नो यस्मात्कार्य न तेन स आत्मा ।
उत्पादयति न किंचित्कारणमपि तेन न स भवति ॥३२८॥
कर्म प्रतीत्य कर्ता कर्तार तथा प्रतीत्य कर्माणि ।
उत्पद्यंते नियमात्सिद्धिस्तु न दृश्यते या ॥३२९॥

तात्पर्यवृत्ति —यथा कनकमिह कटकादिपर्यायैः सहानन्यदभिन्न भवति तथा द्रव्यं यदु... [illegible] सह । स्वकीयस्वकीयगुणै तह [illegible] स्वयमेव परिणमति । कैः सह । [illegible] प्रथमगाथा गता। जीवस्साजीवस्स य जे परिणामा दु देसिदा सुत्ते [illegible] णामा पर्याया दर्शिताः कथिताः सूत्रे परमागमे तैः सह [illegible] मनन्यमभिन्न विजानीहीति द्वितीयगाथा गता। यस्मा कुदोवि [illegible] चि [illegible] कर्मणा न जनितः तेन कारणेन [illegible] कम्म पडुच्च कत्ता [illegible] न भवति तेन कारणं [illegible] कत्तार तह पडुच्च कम्माणि उप्पज्जति णियमा [illegible] । पुनश्चा [illegible] सह जीवपुद्गलयोः [illegible] नान्यथा जीवस्य कर्मणा [illegible]

चात्पद्यते जीवकर्तारमाश्रित्योपचारेण नियमान्निश्चयात् सत्त्वं नास्ति सिद्धी दु ण दिस्सदे अण्णा अनेन प्रकारेण, अन्यः कोऽपि परस्परनिमित्तभावं विहाय शुद्धोपादानरूपेण शुद्धनिश्चयेन जीवस्य कर्मकर्तृत्वविषये सिद्धिर्निष्पत्तिर्घटना न दृश्यते कर्मवर्गणायोग्यपुद्गलानां च कर्मत्वं न दृश्यते ततः स्थितं शुद्धनिश्चयनयेनाकर्ता जीव इति चतुर्थगाथा गता । एवं निश्चयेन जीवः कर्मणा कर्ता न भवतीति व्याख्यानमुख्यत्वेन प्रथमस्थले गाथाचतुष्टयं गतं ।

अथ शुद्धस्यात्मनो ज्ञानावरणादिप्रकृतिभिर्यद्बंधो भवति तदज्ञानस्य माहात्म्यमिति प्रज्ञापयति—

आत्मख्याति.—जीवो हि तावत्क्रमनियमितात्मपरिणामैरुत्पद्यमानो जीव एव नाजीवः, एवमजीवोऽपि क्रमनियमितात्मपरिणामैरुत्पद्यमानोऽजीव एव न जीवः, सर्वद्रव्याणां स्वपरिणामैः सह तादात्म्यात् कंकणादिपरिणामैः कांचनवत्। एवं हि जीवस्य स्वपरिणामैरुत्पद्यमानस्याप्यजीवेन सह कार्यकारणभावो न सिद्ध्यति सर्वद्रव्याणां द्रव्यांतरेणोत्पाद्योत्पादकभावाभावात्। तदसिद्धौ चाजीवस्य जीवकर्मत्वं न सिद्ध्यति। तदसिद्धौ च कर्तृकर्मणोरनन्यापेक्षसिद्धत्वात्-जीवस्याजीवकर्तृत्वं न सिद्ध्यति, अतो जीवोऽकर्ता अवतिष्ठते।

अकर्ता जीवोऽयं स्थित इति विशुद्धः स्वरसतः स्फुरच्चिज्ज्योतिर्भिश्छुरितभुवनाभोगभुवनः ।
तथाप्यस्यासौ स्याद्यदिह किल बंधः प्रकृतिभिः स खल्वज्ञानस्य स्फुरति महिमा कोपि गहनः ।।१८६।

चेदा दु पयडियट्ठं उप्पज्जदि विणस्सदि ।
पयडीवि चेदयट्ठं उप्पज्जदि विणस्सदि ॥३४०॥
एवं बंधो दुण्हपि अण्णोण्णपच्चयाण हवे ।
अप्पणो पयडीए य संसारो तेण जायदे ॥३४१॥

चेतयिता तु प्रकृत्यर्थमुत्पद्यते विनश्यति ।
प्रकृतिरपि चेतकार्थमुत्पद्यते विनश्यति ॥३४०॥
एवं बंधो द्वयोरपि-मन्योन्यप्रत्यययोर्भवेत् ।
आत्मनः प्रकृतेश्च संसारस्तेन जायते ॥३४१॥

तात्पर्यवृत्तिः — चेदा आत्मा स्वस्वभावच्युतः सन् प्रकृतिनिमित्तं कर्मोदयनिमित्तमुत्पद्यते । विनश्यति च विभावपरिणामैः पर्यायैः । प्रकृतिरपि चेतयितृकार्यं जायमानरागादिपरिणामनिमित्तं ज्ञानावरणादिकर्मपर्यायैरुत्पद्यते विनश्यति च । एवं पूर्वोक्तप्रकारेण बंधो जायते द्वयोः-स्वस्वभावच्युतस्यात्मनः, कर्मवर्गणायोग्यपुद्गलपिंडरूपाया ज्ञानावरणादिप्रकृतेश्च । कथंभूतयोर्द्वयोः ? अन्योऽन्यप्रत्यययोः, परस्परनिमित्तकारणभूतयोः ।एवं रागाद्यज्ञानभावेन बंधो भवति तेन बंधेन संसारो जायते, न च स्वस्वरूपत इत्युक्तं भवति।

अथ यावत्कालं शुद्धात्मसंवित्तिच्युतः सन् प्रकृत्यर्थं प्रकृत्युदयरूपं रागादिकं न मुंचति तावत्कालमज्ञानी स्यात् तदभावे ज्ञानी च भवतीत्युपदिशति—

आत्मख्याति —अयं हि आसंसारत एव प्रतिनियतस्वलक्षणानिर्ज्ञानेन परात्मनोरेकत्वाध्यासस्य करणात्कर्ता सन् चेतयिता प्रकृतिनिमित्तमुत्पादविनाशावासादयति । प्रकृतिरपि चेतयितृनिमित्तमुत्पादविनाशावासादयति । एवमनयोरात्मप्रकृत्योः कर्तृकर्मभावाभावेऽप्यन्योन्यनिमित्तनैमित्तिकभावेन द्वयोरपि बंधो दृष्टः, ततः संसारः, तत एव च तयोः कर्तृकर्मव्यवहारः —

जा एसो पयडियट्ठं चेदगो ण विमुंचदि ।
अयाणओ हवे ताव मिच्छादिट्ठी असंजओ ॥३४२॥ -

जदा विमुचदे चेदा कम्मप्फलमणतय ।
तदा विमुत्तो हवदि जाणगो पस्सगो मुणी ॥३४३॥

यावदय प्रकृत्यर्थं चेतयिता नैव विमुचति ।
अज्ञायको भवेत्तावन्मिथ्यादृष्टिरसयत ॥३४२॥
यदा विमुचति चेतयिता कर्मफलमनतक ।
तदा विमुक्तो भवति ज्ञायको दर्शको मुनि ॥३४३॥

तात्पर्यवृत्ति — यावत्कालमय चेतयिता जीव , चिदानदैकस्वभावपरमात्मसम्यक्श्रद्धानज्ञानानु भवरूपाणा सम्यग्दर्शनज्ञानचारित्राणामभावात्प्रकृत्यर्थं रागादिकर्मोदयरूपं न मुचति, तावत्काल रागादि रूपमात्मान श्रद्धाति जानात्यनुभवति च ततो मिथ्यादृष्टिर्भवति, अज्ञानी भवति, असयतश्च भवति, तथा भूत सन् मोक्ष न लभते। यदा पुनरयमेव चेतयिता मिथ्यात्वरागादिरूप कर्मफल शक्तिरूपेणानतविशेषण सर्वप्रकारेण मुचति तदा शुद्धबुद्धैकस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभवरूपाणा सम्यग्दर्शनज्ञानचारित्राणा सद्भावात् रागमिथ्यात्वरागादिभ्यो भिन्नमात्मान श्रद्धाति जानात्यनुभवति च। तत सम्यग्दृष्टिर्भवति, सयतो मुनिश्च भवति तथाभूत सन् विशेषेण द्रव्यभावगतमूलोत्तरप्रकृतिविनाशेन मुक्तो भवतीति । एव यद्यप्यात्मा शुद्धनिश्चयेन कर्ता न भवति तथाप्यनादिकर्मबधवशान्मिथ्यात्वरागाद्यज्ञानभावेन कर्म बध्नातीति अज्ञानसामर्थ्यज्ञापनार्थं द्वितीयस्थले सूत्रचतुष्टय गत—

अथ शुद्धनिश्चयनयेन कर्मफलभोक्तृत्व जीवस्वभावो न भवति, कस्मात् ? अज्ञानस्वभावत्वात्—इति कथयति—

आत्मख्याति —यावदय चेतयिता प्रतिनियतस्वलक्षणानिर्ज्ञानात् प्रकृतिस्वभावमात्मनो बधनिमित्त न मुचति तावत्स्वपरयोरेकत्वज्ञानेनाज्ञायको भवति । स्वपरयोरेकत्वदर्शनेन मिथ्यादृष्टिर्भवति । स्वपरयोरेक त्वपरिणत्या चासयतो भवति । तावदेव परात्मनोरेकत्वाध्यासस्य करणात्कर्ता भवति । यदा त्वयमेव प्रति नियतस्वलक्षणनिर्ज्ञानात् प्रकृतिस्वभावमात्मनो बधनिमित्त मुचति तदा स्वपरयोर्विभागज्ञानेन ज्ञायको भवति । स्वपरयोर्विभागदर्शनेन दर्शको भवति । स्वपरयोर्विभागपरिणत्या च सयतो भवति तदैव च परा त्मनोरेकत्वाध्यासस्याकरणादकर्ता भवति ।

भोक्तृत्व न स्वभावोऽस्य स्मृत कर्तृत्ववच्चित ।
अज्ञानादेव भोक्ताय तदभावादवेदक ॥ १८७ ॥

अण्णाणी कम्मफल पयडिसहावट्ठिदो दु वेदेदि ।
णाणी पुण कम्मफल जाणदि उदिद ण वेदेदि ॥३४४॥

अज्ञानी कर्मफल प्रकृतिस्वभावस्थितस्तु वेदयते ।
ज्ञानी पुन कर्मफल जानाति उदित न वेदयते ॥ ३४४ ॥

तात्पर्यवृत्ति — अण्णाणी कम्मफल पयडिसहावट्ठिदो दु वेदेदि निर्विकारपरमानदैकस्वभावा त्मतत्त्वसम्यक्श्रद्धानज्ञानानुभवरूपाभेदरत्नत्रयलक्षणभेदज्ञानस्याभावादज्ञानी जीव [illegible] उदयागतकर्मप्रकृति स्वभाव सुखदु खस्वरूप [illegible] हर्षविषादाभ्यां तन्मयो भूत्वा कर्मफल वेदयत्यनुभवति । णाणी पुण कम्मफल जाणदि उदिद ण वेदेदि ज्ञानी पुन पूर्वोक्तभेदज्ञाने सति वीतरागसहजपरमानदरूप सुखरसास्वादेन परमसमरसीभावेन परिणत सन् कर्मफलमुदितमागत वस्तुस्वरूपेण जानात्येव नच हर्षविषादाभ्या तन्मयो भूत्वा वेदयतीति ।

[illegible] इति च पाठ ।

अथाज्ञानी जीवः सापराधः सशंकितः सन् कर्मफलं तन्मयो भूत्वा वेदयति, यस्तु निरपराधी ज्ञानी स कर्मोदये सति किं करोति ? इति कथयति—

आत्मख्याति —अज्ञानी हि शुद्धात्मज्ञानाभावात् स्वपरयोरेकत्वज्ञानेन, स्वपरयोरेकत्वदर्शनेन, स्वपरयोरेकत्वपरिणत्या च प्रकृतिस्वभावे स्थितत्वात् प्रकृतिस्वभावमप्यहंतया-अनुभवन् कर्मफलं वेदयते। ज्ञानी तु शुद्धात्मज्ञानसद्भावात्स्वपरयोर्विभागज्ञानेन, स्वपरयोर्विभागदर्शनेन स्वपरयोर्विभागपरिणत्या च प्रकृतिस्वभावादपसृतत्वात्—शुद्धात्मस्वभावमेकमेवाहंतयानुभवन् कर्मफलमुदितं ज्ञेयमात्रत्वात्—जानात्येव न पुनस्तस्याहंतयाऽनुभवितुमशक्यत्वाद्वेदयते।

अज्ञानी प्रकृतिस्वभावनिरतो नित्यं भवेद्वेदको ज्ञानी तु प्रकृतिस्वभावविरतो नो जातु चिद्वेदकः।
इत्येवं नियमं निरूप्य निपुणैरज्ञानिता त्यज्यतां शुद्धैकात्ममये महस्यचलितैरासेव्यतां ज्ञानिता ॥११८॥

अज्ञानी वेदक एवेति नियम्यते—

जो पुण णिरावराहो चेदा णिस्संकिदो दु सो होदि।
आराहणाय णिच्चं वट्टदि अहमिदि वियाणंतो ॥ ३४५ ॥

यः पुनर्निरपराधश्चेतयिता निश्शंकितस्तु स भवति।
आराधनया नित्यं वर्तते अहमिति विजानन् ॥ ३४५ ॥

तात्पर्यवृत्ति —जो पुण णिरवराहो चेदा णिस्संकिदा दु सो होदि यस्तु चेतयिता ज्ञानी जीवः स निरपराधः सन् परमात्माराधनविषये निश्शंको भवति। निश्शंको भूत्वा किं करोति ? आराहणाय णिच्चं वट्टदि अहमिदि वियाणंतो निर्दोषपरमात्माराधनारूपया निश्चयाराधनया नित्यं सर्वकालं वर्तते। किं कुर्वन्[1] अनंतज्ञानादिरूपोऽहमिति निर्विकल्पसमाधौ स्थित्वा शुद्धात्मानं सम्यग्जानन् परमसमरसीभावेन वानुभवति इति।

अज्ञानी कर्मणां नियमेन वेदको भवतीति दर्शयति—

ण मुयदि पयडिमभव्वो सुट्ठुवि अज्झाइदूण सत्थाणि।
गुडदुद्धंपि पिवंता ण पण्णया णिव्विसा होंति ॥ ३४६ ॥

न मुंचति प्रकृतिमभव्यः सुष्ठुपि—अधीत्य शास्त्राणि।
गुडदुग्धमपि पिबंतो न पन्नगा निर्विषा भवंति ॥ ३४६ ॥

तात्पर्यवृत्ति —यथा पन्नगाः सर्पाः शर्करासहितं दुग्धं पिबंतोऽपि निर्विषा न भवंति तथा ज्ञानी जीवो मिथ्यात्वरागादिरूपकर्मप्रकृत्युदयस्वभावं न मुंचति। किं कृत्वापि ? अधीत्यापि। कानि ? शास्त्राणि। कथं सुष्ठु विसुष्ठ्वपि। कस्मान्न मुंचति ? वीतरागस्वसंवेदनज्ञानाभावात्—कर्मोदये सति मिथ्यात्वरागादीनां तन्मयो भवति यतः कारणात् इति।

ज्ञानी कर्मणां नियमेन वेदको न भवतीति दर्शयति—

आत्मख्याति —यथात्र विषधरो विषभावं स्वयमेव न मुंचति, विषभावमोचनसमर्थसशर्करक्षीरपानाच्च न मुंचति। तथा किलाभव्यः प्रकृतिस्वभावं स्वयमेव न मुंचति प्रमोचनसमर्थद्रव्यश्रुतज्ञानाच्च न मुंचति, नित्यमेव भावश्रुतज्ञानलक्षणशुद्धात्मज्ञानाभावेनाज्ञानित्वात्। अतो नियम्यते ज्ञानी प्रकृतिस्वभावे सुस्थितत्वाद्वेदक एव।

---

१ प्रकृतिज्ञानावरणादिकाया स्वभावमनुगतिस्तराररागादिभावमुखदु खादिका परिणाविस्तत्र नित्य आत्मविमुद्धा कारणं। २ नये न पाणाणामस्माता।

[illegible]—

णिव्वेदसमावण्णो णाणी कम्मप्फलं वियाणादि ।
महुरं कडुयं बहुविहमवेदगो तेण पण्णत्तो ॥ ३४७ ॥

निर्वेदसमापन्नो ज्ञानी कर्मफलं विजानाति ।
मधुरं कटुकं बहुविधमवेदकस्तेन प्रज्ञप्तः ॥ ३४७ ॥

तात्पर्यवृत्तिः—णिव्वेदसमावण्णो णाणी कम्मप्फलं वियाणादि [illegible] विजानाति [illegible] महुरं कडुयं बहुविहमवेदगो तेण [illegible] ज्ञानी [illegible] शुभाशुभकर्म [illegible]

आत्मख्यातिः—ज्ञानी तु [illegible] जानाति, [illegible] मधुरं मधुरं वा [illegible] । अतो ज्ञानी [illegible] एव । [illegible] ॥१८८॥

[illegible] स हि मुक्त एव ॥१८८॥

[illegible]

णवि कुव्वदि णवि वेददि णाणी कम्माइं बहुपयाराइं ।
जाणदि पुण कम्मफलं बंधं पुण्णं च पावं च ॥ ३४८ ॥

नापि करोति नापि वेदयते ज्ञानी कर्माणि बहुप्रकाराणि ।
जानाति पुनः कर्मफलं बंधं पुण्यं च पापं च ॥३४८॥

तात्पर्यवृत्तिः—णवि कुव्वदि णवि वेददि णाणी कम्माइं बहुपयाराइं त्रिगुप्तिगुप्त [illegible] बहुप्रकाराणि ज्ञानी [illegible] निर्विकल्पसमाधौ स्थितो ज्ञानी कर्माणि [illegible] न च तन्मयो भूत्वा वेदयत्यनुभवति । तर्हि किं [illegible] निश्चयेन न करोति न च तन्मयो भूत्वा [illegible] भूत्वा वस्तुस्वरूपेण जानात्येव । किं जानाति ? [illegible] जाणादि पुण कम्मफलं बंधं पुण्णं पावं च [illegible] प्रकृतिबंधादिभेदभिन्नं पुनः कर्मबंधं, सद्वेद्य [illegible] शुभाशुभ[illegible] पुण्यं अतोऽन्यदसद्वेद्यादिरूपं पापं चेति ।

[illegible] विनाशं समयति—

आत्मख्यातिः—ज्ञानी हि कर्मचेतनाशून्यत्वेन कर्मफलचेतनाशून्यत्वेन च स्वयमकर्तृत्वादवेद[illegible] कर्मफलं च [illegible] न कर्म करोति न वेदयते च । किंतु ज्ञानचेतनामयत्वेन केवलं ज्ञातृत्वात्कर्मबंधं कर्मफलं च शु[illegible]भमशुभं वा केवलमेव जानाति ।

कुत एतत् ?

१ [illegible] ।

दिट्ठी सयपि णाण अकारय तह अवेदय चेव ।
जाणदिय बंधमोक्खं कम्मुदय णिज्जर चेव ॥ ३४९ ॥
दृष्टि: स्वयमपि ज्ञानमकारक तथाऽवेदक चैव ।
जानाति च बंधमोक्ष कर्मोदय निर्जरां चैव ॥ ३४९ ॥

तात्पर्यवृत्ति -दिट्ठी सयपि णाण अकारय तह अवेदय चेव यथा दृष्टि कर्त्री दृश्यमग्निरूप वस्तुसधुक्षण पुरुषवन्न करोति तथैव च तप्ताय पिंडवदनुभवरूपेण न वेदयति । तथा शुद्धज्ञानमप्यभेदेन शुद्धज्ञानपरिणतजीवो वा स्वय शुद्धोपादानरूपेण न करोति न च वेदयति । अथवा पाठांतर दिट्ठो सयपि णाण तस्य व्याख्यान-न केवल दृष्टि क्षायिकज्ञानमपि निश्चयेन कर्मणामकारक तथैव वेदकमपि। तथाभूत सन् किंकरोति ? जाणदि य बंधमोक्खं जानाति च । कौ ? बंधमोक्षौ । न केवल बंधमोक्षौ कम्मुदय णिज्जर चेव शुभाशुभरूप कर्मोदय सविपाकाविपाकरूपेण सकामाकामरूपेण व द्विधा निर्जरां चैव जानाति इति । एव सर्वविशुद्धपारिणामिकपरमभावग्राहकेण शुद्धोपादानभूतेन शुद्धद्रव्यार्थिकनयेन कर्तृत्व--भोक्तृत्व-बंध-मोक्षादिकारणपरिणामशून्यो जीव इति सूचित । समुदायपातनिकायां पश्चाद्गाथाचतुष्टयेन जीवस्याकर्तृत्वगुणव्याख्यानमुख्यत्वेन सामान्यविवरण कृत । पुनरपि गाथाचतुष्टयेन शुद्धस्यापि यत्प्रकृतिभिर्बधो भवति तदज्ञानस्य माहात्म्यमित्यज्ञानसामर्थ्यकथनरूपेण विशेषविवरण कृत । पुनश्च गाथाचतुष्टयेन जीवस्याभोक्तृत्वगुणव्याख्यानमुख्यत्वेन व्याख्यान कृत । तदनतर शुद्धनिश्चयेन तस्यैव कर्तृत्वबंधमोक्षादिककारणपरिणामवर्जनरूपस्य द्वादशगाथाव्याख्यानस्योपसंहाररूपेण गाथाद्वय गत ।

इति समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां तात्पर्यवृत्तौ मोक्षाधिकारसंबधिनी चूलिका समाप्ता ।
अथवा द्वितीयव्याख्यानेनात्र मोक्षाधिकार समाप्त ।

आत्मख्याति -यथात्र लोके दृष्टिर्दृश्यादत्यंतविभक्तत्वेन तत्करणवेदनयोरसमर्थत्वात् दृश्य न करोति न वेदयते च, अन्यथाग्निदर्शनात्संधुक्षणवत् स्वय ज्वलनकरणस्य, लोहपिंडवत्स्वयमौष्ण्यानुभवनस्य च दुर्निवारत्वात्। किंतु केवल दर्शनमात्रस्वभावत्वात् तत्सर्वं केवलमेव पश्यति । तथा ज्ञानमपि स्वय दृष्टित्वात् कर्मणोऽत्यंतविभक्तत्वेन निश्चयतस्तत्करणवेदनयोरसमर्थत्वात्कर्म न करोति न वेदयते च । किंतु केवल ज्ञानमात्रस्वभावत्वात्कर्मबंध मोक्ष वा कर्मोदय निर्जरां वा, केवलमेव जानाति ।

ये तु कर्तारमात्मान पश्यति तमसा तता ।
सामान्यजनवत्तेषां न मोक्षोऽपि मुमुक्षुता ॥१९९॥

तात्पर्यवृत्ति —किं च विशेष —औपशमिकादिपंचभावानां मध्ये केन भावेन मोक्षो भवतीति विचार्यते । [illegible]

[illegible]

। तच परिणमनमागमभाषयौपशमिकक्षायोपशमिकक्षायिकं भावत्रयं भण्यते। अध्यात्मभाषया पुनः शुद्धात्माभिमुखपरिणामः शुद्धोपयोग इत्यादि पर्यायसंज्ञां लभते। स च पर्यायः शुद्धपारिणामिकभावलक्षणशुद्धात्मद्रव्यात्कथंचिद्भिन्नः। कस्मात्? भावनारूपत्वात्। शुद्धपारिणामिकस्तु भावनारूपो न भवति। यद्येकान्तेनाशुद्धपारिणामिकादभिन्नो भवति तदास्य भावनारूपस्य मोक्षकारणभूतस्य मोक्षप्रस्तावे विनाशे सति शुद्धपारिणामिकभावस्यापि विनाशं प्राप्नोति, न च तथा। ततः स्थितं—शुद्धपारिणामिकभावविषये या भावना तद्रूपं यदौपशमिकादिभावत्रयं तत्समस्तरागादिरहितत्वेन शुद्धोपादानकारणत्वान्मोक्षकारणं भवति न च शुद्धपारिणामिकः। यस्तु शक्तिरूपो मोक्षः स शुद्धपारिणामिके पूर्वमेव तिष्ठति। अयं तु व्यक्तिरूपमोक्षविचारो वर्तते। तथा चोक्तं सिद्धान्ते 'निष्क्रियः शुद्धपारिणामिकः'। निष्क्रिय इति कोऽर्थः? बन्धकारणभूता या क्रिया रागादिपरिणतिः, तद्रूपो न भवति। मोक्षकारणभूता च क्रिया शुद्धभावनापरिणतिस्तद्रूपश्च न भवति। ततो ज्ञायते शुद्धपारिणामिकभावो ध्येयरूपो भवति ध्यानरूपो न भवति। कस्मात्? ध्यानस्य विनश्वरत्वात्। तथा योगीन्द्रदेवैरप्युक्तं—

णवि उपज्जइ णवि मरइ बंधु ण मोक्खु करेइ।
जिउ परमत्थे जोइया जिणवरु एउ भणेइ॥ १॥

किं च विवक्षितैकदेशशुद्धनयाश्रितेयं भावना निर्विकारस्वसंवेदनलक्षणक्षायोपशमिकज्ञानत्वेन यद्यप्येकदेशव्यक्तिरूपा भवति तथापि ध्याता पुरुषः यदेव सकलनिरावरणमखण्डैकप्रत्यक्षप्रतिभासमयमविनश्वरं शुद्धपारिणामिकपरमभावलक्षणं निजपरमात्मद्रव्यं तदेवाहमिति भावयति न च खण्डज्ञानरूपमिति भावार्थः। इदं तु व्याख्यानं परस्परसापेक्षागमाध्यात्मनयद्वयाभिप्रायस्याविरोधेनैव कथितं सिद्ध्यतीति ज्ञातव्यं विवेकिभिः।

अत ऊर्ध्वं जीवादिनवाधिकारेषु जीवस्य कर्तृत्वभोक्तृत्वादिस्वरूपं यथास्थानं निश्चयव्यवहारविभागेन सामान्येन पूर्वं सूचितं, तस्यैव विशेषविवरणार्थं **लोकस्स कुणदि विण्हू** इत्यादि गाथामादिं कृत्वा पाठक्रमेण षडधिकनवतिगाथापर्यन्तं चूलिकाव्याख्यानं करोति—

चूलिकाशब्दस्यार्थः कथ्यते तद्यथा—विशेषव्याख्यानं, उक्तानुक्तव्याख्यानं, उक्तानुक्तसंकीर्णव्याख्यानं चेति त्रिधा चूलिकाशब्दस्यार्थो ज्ञातव्यः। तत्र षण्णवतिगाथासु मध्ये विष्णुर्देवादिकर्तृत्वनिराकरणमुख्यत्वेन **लोगस्स कुणदि विण्हू** इत्यादि गाथासप्तकं च भवति। तदनन्तरं, अन्यः करोति अन्यो भुङ्क्ते चान्य—इत्येकान्तनिषेधरूपेण बौद्धमतानुसारिशिष्यसंबोधनार्थं **केहिंचि दु पज्जएहिं** इत्यादि सूत्रचतुष्टयं। अत परं सांख्यमतानुसारिशिष्यं प्रति, एकान्तेन जीवस्य भावमिथ्यात्वकर्तृत्वनिराकरणार्थं **मिच्छत्ता जदि पयडी** इत्यादि सूत्रपंचकं। ततः परं ज्ञानाज्ञानसुखदुःखादिभावान् कर्मैवैकान्तेन करोति नचात्मेति पुनरपि सांख्यमतनिराकरणार्थं—**कम्मेहिं अण्णाणी** इत्यादि त्रयोदशसूत्राणि। तदनन्तरं कोऽपि प्राथमिकशिष्यः शब्दादिपञ्चेन्द्रियविषयाणां विनाशं कर्तुं वाञ्छति किंतु मनसि स्थितस्य विषयानुरागस्य घातं करोमीति विशेषविवेकं न जानाति तस्य संबोधनार्थं **दंसणणाणचरित्तं** इत्यादि [illegible] सूत्रसप्तकं। तदनन्तरं यथा सुवर्णकारादिशिल्पी कुण्डलादिकं हस्तकुट्टकादिभिः करोति [illegible] मूल्यादिकं भुङ्क्ते च तथापि तन्मयो न भवति। तथा जीवोऽपि द्रव्यकर्म करोति [illegible] तन्मयो न भवतीत्यादिप्रतिपादनरूपेण **जह सिप्पियो दु** इत्यादि गाथासप्तकं। ततः परं [illegible] तन्मयो न भवति। तथा [illegible] सेटिका कुड्यादिकं श्वेतं करोति तथापि निश्चयेन तन्मयो न भवति। तथा [illegible] च द्रव्यमेव जानाति पश्यति परिहरति श्रद्धत्ते च तथापि निश्चयेन तन्मयो न भवति इति [illegible] सांख्यशिष्यसंबोधनार्थं **जह सेडिया** इत्यादि सूत्रदशकं। ततः परं शुद्धनिश्चयनय[illegible] निश्चयनय[illegible] [illegible] पुनरपि [illegible]
निश्चयनयव्याख्यान-निश्चय[illegible]—

षट्कम् । तदनंतरं रागद्वेषादिविकल्पज्ञानरूपाः जीवपरिणामाः इति कथनार्थं णिंददि संथुददि वयणाणि इत्यादि गाथादशकम् । अत ऊर्ध्वं उत्पातनं मदीयमिदं मया कृतं च यत् सम्यग्भावनया पुनर्भावितं पुनरपि पुनरपि तदेवं दुःखबीजं कर्मादीनि प्रतिपादनमुख्यत्वेन वेदंतो कम्मफलं इत्यादि गाथात्रयं । तदनंतरं आचारसूत्रादिद्रव्यश्रुतेन्द्रियविषयद्रव्यकर्म धर्माधर्माकाशकालाः पुद्गलनिश्चयेन रागादयोऽपि पुद्गलविकल्पा न भवंतीति व्याख्यानमुख्यत्वेन सत्थं णाणं ण हवदि इत्यादि पंचदश सूत्राणि । तत ऊर्ध्वं यस्य पुद्गलद्रव्यनिश्चयेन मूर्तिरहितत्वस्याभिप्रायेण कर्मनोकर्माहाररहित इति व्याख्यानरूपेण अप्पा जस्स अमुत्तो इत्यादि गाथात्रयं । तदनंतरं देहाश्रितद्रव्यलिंगं निर्विकल्पसमाधिरूपभावलिंगरहितं यतीनां मुक्तिकारणं न भवति भावलिंगसहितानां पुनः सहकारिकारणं भवतीति व्याख्यानमुख्यत्वेन पाखंडी लिंगाणि य इत्यादि सूत्रसप्तकं । पुनश्च समयप्राभृताध्ययनफलकथनरूपेण जो समयपाहुडमिणं इत्यादि सूत्रमेकं कथयतीति त्रयोदशभिरंतराधिकारैः समयसारचूलिकाधारे समुदायपातनिका—

इदानीं त्रयोदशाधिकाराणां यथाक्रमेण विशेषव्याख्यानं क्रियते। तद्यथा—एकांतेनात्मानं कर्तारं ये मन्यन्ते तेषामज्ञानिजनवन्मोक्षो नास्तीत्युपदिशति—

लोगस्स कुणदि विह्णू सुरणारयतिरियमाणुसे सत्ते।
समणाणपिय अप्पा जदि कुव्वदि छव्विहे काए ॥३५०॥
लोगसमणाणमेयं सिद्धंतं पडि ण दिस्सदि विसेसो।
लोगस्स कुणदि विण्हू समणाण अप्पओ कुणदि ॥ ३५१ ॥
एवं ण कोवि मुक्खो दीसइ दुण्हपि समण लोयाणं।
णिच्चं कुव्वंताणं सदेव मणुआसुरे लोगे ॥ ३५२ ॥

लोकस्य करोति विष्णुः सुरनारकतिर्यङ्मानुषान् सत्त्वान्।
श्रमणानामप्यात्मा यदि करोति षड्विधान् कायान् ॥ ३५० ॥
लोकश्रमणानामेवं सिद्धांतं प्रति न दृश्यते विशेषः ।
लोकस्य करोति विष्णुः श्रमणानामप्यात्मा करोति ॥ ३५१ ॥
एवं न कोऽपि मोक्षो दृश्यते लोकश्रमणानां द्वयेषां ।
नित्यं कुर्वतां सदैव मनुजान् सुरान् लोकान् ॥ ३५२ ॥

तात्पर्यवृत्तिः —लोगस्स कुणदि विह्णू सुरणारयतिरियमाणुसे सत्ते लोकस्य मते विष्णुः करोति । कान् ? सुरनारकतिर्यङ्मानुषान् सत्त्वान् समणाणपि य अप्पा जदि कुव्वदि छव्विहे काए श्रमणानां मते पुनरात्मा करोति यदि चेत् कान् ? षड्जीवनिकायानिति । लोगसमणाणमेवं सिद्धंतं पडि ण दिस्सदि विसेसो एवं पूर्वोक्तप्रकारेण सिद्धांतं प्रति, आगमं प्रति न दृश्यते कोऽपि विशेषः कयोः संबंधी ? लोकश्रमणयोः कस्मात् । इति चेत्—लोगस्स कुणदि विण्हू समणाण (वि) अप्पओ कुणदि लोकमते विष्णुनामा कोऽपि परकल्पितपुरुषविशेषः करोति। श्रमणानां मते पुनरात्मा करोति तत्र विष्णुसंज्ञा श्रमणमते चात्मसंज्ञा नास्ति विप्रतिपत्तिर्नचार्थे । एवं ण कोवि मुक्खो दीसदि दुण्हपि समणलोयाणं एवं कर्तृत्वे सति को दोषः ? मोक्षः कोऽपि न दृश्यते कयोर्लोकश्रमणयोः । किंविशिष्टयोः ?

१ सिद्धं जइ ण दीसइ विसेस, आत्मख्यातावयं पाठः । २ दीसइ लोयसमणाणं दोण्हंपि य आत्मख्यातौ ।

कुर्वताण रागद्वेषमोहाद्यशुभोपयोग निजभावकाले कर्म युक्तता । कः । लोकः । कथंभूतः ।
… । तत्र रागद्वेषमोहपरिणमने सति
… भवति ततश्च मोक्षो
… नास्ति कथं कर्ता भविष्यतीति कथयति-
… गाथात्रयं गतं ।
अथाप्रे निश्चयेन … नास्ति … लौकिकतामतिवर्तते ।
आत्मरूपाणिः—… करोति, तथा तु स्वात्मा तानि करोति इत्यपसिद्धांतस्य
… पुरनारकादिकार्याणि करोति, … लौकिकानामिव … नाकोत्तरिकाणामपि नास्ति मोक्ष ।
… लौकिकानामिव …
नास्ति सर्वोऽपि संबंधः परद्रव्यात्मतत्त्वयोः ।
कर्तृकर्मसंबंधाभावे तत्कर्तृता कुतः ॥ १९० ॥

ववहारभासिदेण दु परदव्व मम भणंति विदिदत्था ।
जाणंति णिच्छयेण दु णय इह परमाणुमित्त मम किंचि ॥२५३॥
जह कोवि णरो जपदि अह्माण गामविसयपुररट्ठं ।
णय होंति ताणि तस्स दु भणदिय मोहेण सो अप्पा ॥२५४॥
एमेव मिच्छदिट्ठी णाणी णिस्संसयं हवदि एसो ।
जो परदव्वं मम इदि जाणंतो अप्पयं कुणदि ॥२५५॥
तह्मा ण मेति णच्चा दोह्न एदाण कत्ति ववसाओ ।
परदव्वे जाणंतो जाणे जो दिट्ठिरहिदाणं ॥२५६॥

व्यवहारभाषितेन तु परद्रव्यं मम भणंत्यविदितार्थाः ।
जानंति निश्चयेन तु नचेह परमाणुमात्रमपि किंचित् ॥ २५३ ॥
यथा कोऽपि नरो जल्पति अस्माकं ग्रामविषयपुरराष्ट्रं ।
नच भवंति तस्य तानि तु भणति च मोहेन स आत्मा ॥ २५४ ॥
एवमेव मिथ्यादृष्टिर्ज्ञानी निःसंशयं भवत्येष ।
यः परद्रव्यं ममेति जानन्नात्मानं करोति ॥ २५५ ॥
तस्मान्न मेति ज्ञात्वा द्वयेषामप्येतेषां कर्तृव्यवसायं ।
परद्रव्ये जानन् जानीयाद्दृष्टिरहितानां ॥ २५६ ॥

तात्पर्यवृत्तिः —**ववहारभासिदेण दु परदव्व मम भणंति विदिदत्था** परद्रव्यं मम भणंति । व्यवहार भाषितेन व्यवहारनयेन । **जाणंति** … के ते ? विदितार्था ज्ञातार्थाः तत्त्ववेदिनः । केन कृत्वा भणंति ? … निश्चयेन पुनर्जानंति । के ? नचेह परद्रव्यं परमाणुमात्रमपि … **णिच्छयेण दु णय इह परमाणुमित्त मम किंचि** निश्चयेन पुनर्जानंति । … **जह कोवि णरो जपदि अह्माण गामविसयपुररट्ठं** यथा नाम स्फुटमहो वा कश्चित् पुरुषो जल्पति … राष्ट्रमस्माकमिति
ममेति । … ग्रामः … देशाभिधानो विषयः नगराभिधानं पुरं … नच तानि तस्य भवंति राजकायनगरा…
किं जल्पति ? … ग्रामः … **णय हुंति ताणि तस्स दु भणदिय मोहेण सो अप्पा** नच तानि तस्य भवंति … एवं पूर्वोक्तदृष्टांतेन ज्ञानी …
तथाप्यसौ मोहेन … ग्रामं … मति दृष्टांत …

मूढो भूत्वा यदि परद्रव्यमात्मीयं भणति तदा मिथ्यात्वं प्राप्तः सन् मिथ्यादृष्टिर्भवति निःसन्देहं निश्चितं संदेहो न कर्तव्य इति। तह्मा इत्यादि तह्मा तस्मात् परकीयग्रामादिदृष्टांतेन स्वानुभूतिमाननात्स्युतः सन् योऽसौ परद्रव्यं व्यवहारेणात्मीयं करोति स मिथ्यादृष्टिर्भवतीति भणितं पूर्वं तस्मात्कारणाज्ज्ञायते दुह्ण एदाण कत्तिववसाओ। परद्रव्ये तयोः पूर्वोक्तलौकिकजैनयोः-आत्मा परद्रव्यं करोतीत्यनेन रूपेण योऽसौ परद्रव्यविषयं कर्तृत्वव्यवसायः। किं कृत्वा? पुव्वं ण ममेति णच्चा निर्विकारस्वपरपरिच्छित्तिज्ञानेन परद्रव्यं मम स्वकीयं न भवति इति ज्ञात्वा जाणतो जाणिज्जो दिट्ठिरहिदाण इमं लौकिकजैनयो परद्रव्ये कर्तृत्वव्यवसाय-अन्य कोऽपि तृतीयतटस्थः पुरुषो जानन् सन् जानीयात्। स कथंभूतः जानीयात्? वीतरागसम्यक्त्वसंज्ञाया तु निश्चयदृष्टिस्तद्रहितानां व्यवसायोऽयमिति। ज्ञानी भूत्वा व्यवहारेण परद्रव्यमात्मीयं वदन् सन् कथमज्ञानी भवतीति चेत्? व्यवहारो हि म्लेच्छानां म्लेच्छभाषेव प्राथमिकजनसंबोधनार्थं काल एवानुसर्तव्यः। प्राथमिकजनप्रतिबोधनकालं विहाय कतकफलवदात्मशुद्धिकारकात् शुद्धनयात्च्युतो भूत्वा यदि परद्रव्यमात्मीयं करोति तदा मिथ्यादृष्टिर्भवति। किं च विशेषः-लौकिकानां मते विष्णुः करोतीति यदुक्तं पूर्वं तल्लौकिकव्यवहारापेक्षया भणितं। नचानादिभूतस्य देवमनुष्यादिभूतलोकस्य विष्णुर्वा महेश्वरो वा कोऽपि कर्तास्ति। कथमिति चेत् सर्वोऽपि लोकस्तावदेकेंद्रियादिजीवैर्भृतस्तिष्ठति। तेषां च जीवानां निश्चयनयेन विष्णुपर्यायेण ब्रह्मपर्यायेण महेश्वरपर्यायेण जिनपर्यायेण च परिणमनशक्तिरस्ति तेन कारणेनात्मैव विष्णुः, आत्मैव ब्रह्मा, आत्मैव महेश्वरः, आत्मैव जिनः। तदपि कथमिति चेत् कोऽपि जीवः पूर्वं मनुष्यभवे जिनरूपं गृहीत्वा भोगाकांक्षानिदानबंधेन पापानुबंधि पुण्यं कृत्वा स्वर्गे समुत्पद्य तस्मादागत्य मनुष्यभवे त्रिखंडाधिपतिरर्द्धचक्रवर्ती भवति तस्य विष्णुसंज्ञा नचापरः कोऽपि लोकस्य कर्ता विष्णुरस्ति इति। तथा चापरः कोऽपि जीवो जिनदीक्षां गृहीत्वा रत्नत्रयाराधनया पापानुबंधि पुण्योपार्जनं कृत्वा विद्यानुवादसंज्ञं दशमपूर्वं पठित्वा चारित्रमोहोदयेन तपश्चरणच्युतो भूत्वा हुण्डावसर्पिणीकालप्रभावेण विद्याबलेन लोकस्याहं कर्तेत्यादि चमत्कारमुत्पाद्य मूढजनानां विस्मयं कृत्वा महेश्वरो भवति न सर्वावसर्पिणीषु। सा च हुण्डावसर्पिणी संख्यातीतासु अवसर्पिण्युत्सर्पिणीषु गतासु समुपयाति तथा चोक्तं—

> संखातीदवसप्पिणि गयासु हुडावसप्पिणी एय।
> परसमयह उप्पत्ती तहि जिणवर एव पभणेइ ॥ १ ॥

नचान्यः कोऽपि जगत्कर्ता महेश्वराभिधानः पुरुषविशेषोऽस्ति इति। तथा चापरः कोऽपि पुरुषो विशिष्टतपश्चरणं कृत्वा पश्चात्तपःप्रभावेण स्त्रीविषयनिमित्तं चतुर्मुखो भवति तस्य ब्रह्मा संज्ञा। नचान्यः कोऽपि जगतः कर्ता व्यापकरूपो ब्रह्माभिधानोऽस्ति। तथैवापरः कोऽपि दर्शनविशुद्धिविनयसंपन्नतादिषोडशभावनां कृत्वा देवेंद्रादिविनिर्मितपंचमहाकल्याणपूजायोग्यं तीर्थकरपुण्यं समुपार्ज्य जिनेश्वराभिधानो वीतरागसर्वज्ञो भवतीति वस्तुस्वरूपं ज्ञातव्यं। एवं यद्येकांतेन कर्ता भवति तदा मोक्षाभाव इति विष्णुदृष्टांतेन गाथाद्वयेन पूर्वपक्षं कृत्वा गाथाचतुष्टयेन परिहारव्याख्यानमिति प्रथमस्थले सूत्रषट्कं गतं।

अथ द्रव्यार्थिकनयेन य एव कर्म करोति स एव भुक्ते। पर्यायार्थिकनयेन पुनरन्यः करोत्यन्यो भुंक्ते च योऽसौ मन्यते स सम्यग्दृष्टिर्भवतीति प्रतिपादयति—

आत्मख्याति।—अज्ञानिन एव व्यवहारविमूढा परद्रव्यं ममेदमिति पश्यति। ज्ञानिनस्तु निश्चयप्रतिबुद्धाः परद्रव्यकणिकामात्रमपि न ममेदमिति पश्यंति। ततो यथात्र लोके कश्चिद्व्यवहारविमूढः परकीयग्रामवासी मम ग्राम इति पश्यन् मिथ्यादृष्टिः। तथा ज्ञान्यपि कथंचिद् व्यवहारविमूढो भूत्वा परद्रव्यं ममेदमिति पश्यन् तदा सोऽपि निःसंशयं परद्रव्यमात्मानं कुर्वाणो मिथ्यादृष्टिरेव स्यात्। अतस्तत्त्वं जानन् पुरुषः सर्वमेव परद्रव्यं न ममेति ज्ञात्वा लोकश्रमणानां द्वयेषामपि योऽयं परद्रव्ये कर्तृव्यवसायः, स तेषां सम्यग्दर्शनरहितत्वादेव भवति इति सुनिश्चितं जानीयात्।

१ कथं च पुनः ? ।

एकस्य वस्तुन इहान्यतरेण सार्द्धं सम्बन्ध एव सकलोऽपि यतो निषिद्धः ।
तत्कर्तृकर्मघटनास्ति न वस्तुभेदे पश्यन्त्वकर्तृमुनयश्च जनाश्च तत्त्वं ॥ १९१ ॥
ये तु स्वभावनियमं कलयन्ति नेममज्ञानमग्नमहसो बत ते वराकाः ।
कुर्वन्ति कर्म तत एव हि भावकर्मकर्ता स्वयं भवति चेतन एव नान्यः ॥ १९२ ॥

केहि चिदु पज्जयेहिं विणस्सदे णेव केहिचिदु जीवो ।
जह्मा तह्मा कुव्वदि सो वा अण्णो व णेयंतो ॥ ३५७ ॥
केहिचिदु पज्जयेहिं विणस्सदे णेव केहिचिदु जीवो ।
जह्मा तह्मा वेददि सोवा अण्णो व णेयंतो ॥ ३५८ ॥
जो चेव कुणदि सोचेव वेदको जस्स एस सिद्धंतो ।
सो जीवो णादव्वो मिच्छादिट्ठी अणारिहिदो ॥ ३५९ ॥
अण्णो करेदि अण्णो परिभुजदि जस्स एस सिद्धंतो ।
सो जीवो णादव्वो मिच्छादिट्ठी अणारिहदो ॥ ३६० ॥

कैश्चित्पर्यायैर्विनश्यति नैव कैश्चित्तु जीवः ।
यस्मात्तस्मात्करोति स वा अन्यो वा नैकांतः ॥ ३५७ ॥
कैश्चित्पर्यायै-विनश्यति नैव कैश्चित्तु जीवः ।
यस्मात्तस्माद्वेदयति स वा अन्योवा नैकांत ॥ ३५८ ॥
य एव करोति सएव वेदको यस्यैष सिद्धांत ।
स जीवो ज्ञातव्यो मिथ्यादृष्टिरनार्हतः ॥ ३५९ ॥
अन्यः करोत्यन्य परिभुंक्ते यस्य एष सिद्धांत ।
स जीवो ज्ञातव्यो मिथ्यादृष्टिरनार्हत[1] ॥ ३६० ॥

तात्पर्यवृत्ति —केहिचिदु पज्जयेहिं विणस्सदे णेव केहिचिदु जीवो [illegible] पर्यायार्थिकनयविभागैर्देवमनुष्यादिपर्यायैर्विनश्यति जीव । न नश्यति कैश्चिद् [illegible] जह्मा यस्मा[illegible] नित्यानित्यस्वभाव जीवस्तु तह्मा तस्मात् [illegible] कुव्वदि सो वा [illegible] पर्यायार्थिकनयेन स एव [illegible] स एव क [illegible] इति [illegible] अण्णो वा पर्यायार्थिकनयेन पुनरन्यो वा । [illegible] एकांतो नास्ति । एव [illegible] प्रथमगाथा गता । केहिचिदु पज्जयेहिं विणस्सदे णेव केहिचिदु जीवो कैश्चित् पर्यायैः पर्यायार्थिकनयविभागैः देवमनुष्यादिपर्यायैर्विनश्यति [illegible] पर्यायविभागैः । जह्मा यस्मात् नित्यानित्यस्वभावः जीवस्तु तह्मा तस्मात् [illegible] वेददि सो वा [illegible] शुद्धात्मभावनोत्पन्नसुखामृतरसास्वादमलभमानः स एव [illegible] [illegible] पूर्वकृतकर्म । अण्णो वा पर्यायार्थिकनयेन पुनरन्यो वा [illegible] द्वितीयगाथा गता । किं च [illegible] भुंक्ते । पर्यायार्थिकनयेन पुनरन्यः [illegible]

[1] [illegible]

मनुष्यपर्यायेण कृत देवादिपर्यायेण भुक्त इति भावार्थ । एव गाथाद्वयेनानेकान्तव्यवस्थापनरूपेण ... सिद्धि कृता ।

अथैकान्तेन य एव करोति स एव भुक्ते । अथवान्य करोत्यन्यो भुक्त इति यो वदति स ... दृष्टिरित्युपदिशति—

जो चेव कुणदि सोचेव वेदको जस्स एस सिद्धतो य एव जीव शुभाशुभ कर्म करोति स एव चैकान्तेन भुक्त न पुनरन्य, यस्यैष सिद्धात —आगम । **सो जीवो णादव्वो मिच्छादिट्ठी अणारिहदो** स जीवो मिथ्यादृष्टिरनार्हतो ज्ञातव्य । कथ मिथ्यादृष्टि ? इति चेत् यद्येकान्तेन नित्यकूटस्थोऽपरिणामी टकोत्कीर्ण साख्यमतवत्त तदा येन मनुष्यभवेन नरकगतियोग्य पापकर्मकृत स्वर्गगतियोग्य पुण्यकर्म कृत तस्य जीवस्य नरके स्वर्गे वा गमन न प्राप्नोति । तथा शुद्धात्मानुष्ठानेन मोक्ष कुत ? नित्यैकांतत्वादिति । **अण्णो करेदि अण्णो परिभुंजदि जस्स एस सिद्धतो** अन्य करोति कर्म भुक्ते चान्य, यद्येकांतेन मत **सो जीवो णादव्वो मिच्छादिट्ठी अणारिहदो** तदा येन मनुष्यभवे पुण्यकर्म कृत पापकर्मकृत मोक्षार्थ शुद्धात्मभावनानुष्ठान वा तस्य पुण्यकर्मणा देवलोकोऽपि मोक्ता प्राप्नोति न च स जीव । नरकेऽपि तथैव । केवलज्ञानादिव्यक्तिरूप मोक्ष चान्य कोऽपि लभते ततश्च पुण्यपापमोक्षानुष्ठान वृथेति बौद्धमतदूषण, इति गाथाद्वयेन नित्यैकातक्षणिकैकात ... निराकृत । एव द्वितीयस्थल सूत्रचतुष्टय गत । अथ यद्यपि शुद्धनयेन शुद्धबुद्धैकस्वभावात् कर्मणा कर्ता जीव ... स्तथाप्यशुद्धनयेन रागादिभावकर्मणा स एव कर्ता न च पुद्गल इत्याख्याति—अत्र गाथापचकेन प्रथम... गाथापूर्वार्धेन साख्यमतानुसारिशिष्य प्रति पूर्वपक्ष, उत्तरार्धेन परिहार इति ज्ञातव्य—

आत्मख्याति.—यतो हि प्रतिसमय सभवदगुरुलघुगुणपरिणामद्वारेण क्षणिकत्वादचलितचैतन्यान्वयगुणद्वारेण नित्यत्वाच्च जीव कैश्चित्पर्यायैर्विनश्यति, कैश्चित्तु न विनश्यतीति द्विस्वभावो जीवस्वभाव । त... य एव करोति स एवान्यो वा वेदयते । य एव वेदयते स एवान्यो वा करोतीति नास्त्येकात । एवमनेकान्तेऽपि यस्तत्क्षण वर्तमानस्यैव परमार्थसत्त्वेन वस्तुत्वमिति वस्त्वशेऽपि वस्तुत्वमध्यास्य शुद्धनयलोभादृजुसूत्रैकाते स्थित्वा य एव करोति स एव न वेदयते । अन्य करोति अन्यो वेदयते इति पश्यति स मिथ्यादृष्टिरेव द्रष्टव्य । क्षणिकत्वेऽपि वृत्त्यशाना वृत्तिमतश्चैतन्यचमत्कारस्य टकोत्कीर्णस्यैवात प्रतिभासमानत्वात् ।

आत्मान परिशुद्धमीप्सुभिरतिव्याप्तिं प्रपद्यान्धकै कालोपाधिबलादशुद्धिमधिका तत्रापि मत्वा परै ।
चैतन्य क्षणिक प्रकल्प्य पृथुकै शुद्धर्जुसूत्रेरितैरात्मा व्युज्झित एव हारवदहो निःसूत्रमुक्तेक्षिभि ॥
कर्तुर्वेदयतुश्च युक्तिवशतो भेदोऽस्त्वभेदोऽपि वा कर्ता वेदयिता च मा भवतु वा वस्त्वेव सचिन्त्यताम् ।
प्रोता सूत्र इवात्मनीह निपुणैर्भेत्तुं न शक्या क्वचिच्चिच्चिन्तामणिमालिकेयमभितोऽप्येका चकास्त्वेव न ॥

मिच्छत्ता जदि पयडी मिच्छादिट्ठी करेदि अप्पाण ।
तह्मा अचेदणा दे पयडी णणु कारगो पत्ता ॥ ३६१ ॥
सम्मत्ता जदि पयडी सम्मादिट्ठी करेदि अप्पाण ।
तह्मा अचेदणा दे पयडी णणु कारगो पत्तो ॥ ३६२ ॥
अहवा एसो जीवो पोग्गलदव्वस्स कुणदि मिच्छत्त ।
तह्मा पोग्गलदव्व मिच्छादिट्ठी ण पुण जीवो ॥ ३६३ ॥

१ ब द्वाँरत्व । २ अवद्य पकड़ पुस्तक । ३ नवव स्वहव-नी प.क्ष वडो नडरसा करनका (हर्दिश ।

अह जीवो पयडी विय पोग्गलदव्वं कुणति मिच्छत्तं ।
तह्मा दोहिकदत्तं दोण्णिवि भुंजति तस्स फलं ॥ ३६४ ॥
अह ण पयडी ण जीवो पोग्गलदव्वं करेदि मिच्छत्तं ।
तह्मा पोग्गलदव्वं मिच्छत्तं तं तु णहु मिच्छा ॥ ३६५ ॥

मिथ्यात्वं यदि प्रकृतिर्मिथ्यादृष्टिं करोत्यात्मानं ।
तस्मादचेतना ते प्रकृतिर्ननु कारकः प्राप्ता ॥ ३६१ ॥
सम्यक्त्वं यदि प्रकृतिः सम्यग्दृष्टिं करोत्यात्मानं ।
तस्मादचेतना ते प्रकृतिर्ननु कारकः प्राप्ता ॥ ३६२ ॥
अथवैष जीवः पुद्गलद्रव्यस्य करोति मिथ्यात्वं ।
तस्मात्पुद्गलद्रव्यं मिथ्यादृष्टिर्न पुनर्जीवः ॥ ३६३ ॥
अथ जीवः प्रकृतिरपि पुद्गलद्रव्यं कुरुते मिथ्यात्वं ।
तस्माद्वाभ्यां कृतं द्वावपि भुंजाते तस्य फलं ॥ ३६४ ॥
अथ न प्रकृतिर्न च जीवः पुद्गलद्रव्यं करोति मिथ्यात्वं ।
तस्मात्पुद्गलद्रव्यं मिथ्यात्वं तत्तु न खलु मिथ्या ॥३६५॥ पंचकं ।

तात्पर्यवृत्तिः—मिच्छत्ता जदि पयडी मिच्छादिट्ठी करेदि अप्पाणं द्रव्यमिथ्यात्वप्रकृति कर्ता यद्यात्मानं स्वयमपरिणामिनं हठान्मिथ्यादृष्टिं करोति तह्मा अचेदणादे पयडी णणु कारगो पत्तो तस्मात्कारणादचेतना तु या द्रव्यमिथ्यात्वप्रकृतिः सा तव मते नन्वहो भावमिथ्यात्वस्य कर्त्री प्राप्ता जीवश्चैकांतेनाकर्ता प्राप्तः । ततश्च कर्मबंधाभावः, कर्मबंधाभावे संसाराभावः । स च प्रत्यक्षविरोधः । सम्मत्ता जदि पयडी सम्मादिट्ठी करेदि अप्पाणं सम्यक्त्वप्रकृतिः कर्त्री यद्यात्मानं स्वयमपरिणामिनं सम्यग्दृष्टिं करोति तह्मा अचेदणादे पयडी णणु कारगो पत्तो तस्मात्कारणात् अचेतना प्रकृतिः [illegible] तव मते नन्वहो कर्त्री प्राप्ता जीवश्चैकांतेन सम्यक्त्वपरिणामस्याकर्तेति ततश्च वेदकसम्यक्त्वाभावः [illegible] सम्यक्त्वाभावः स च प्रत्यक्षविरोधः आगमविरोधश्च । अत्राह शिष्यः—प्रकृतिस्तावत् [illegible] सम्यक्त्वमिथ्यात्वतदुभयरूपस्य त्रिविधदर्शनमोहस्य सम्यक्त्वाख्यः प्रथमविकल्पः [illegible] सम्यक्त्वं भवति ?। सम्यक्त्वं तु निर्विकारसदानंदैकलक्षणपरमात्मतत्त्वादिश्रद्धानरूपो [illegible] णाम इति । परिहारमाह—सम्यक्त्वप्रकृतिस्तु [illegible] तथापि यथा [illegible] करोति तथा शुद्धात्माभिमुखपरिणामेन प्रतस्थानीयविशुद्धिविनाशम् [illegible] सन् क्षायोपशमिकादिविपत्तकज्ञानितप्रथमोपशमिकसम्यक्त्वानंतरं [illegible] रूपं जीवपरिणामं न हंति तेन कारणेनोपचारेण सम्यक्त्वहेतुः [illegible] साधकरनामधेयत् परंपरया मुक्तिकारणं भवतीति नास्ति दोषः । अहवा एसो जीवो पुग्गलदव्वस्स कुणदि मिच्छत्तं अथवा पूर्वदूषणभयेन [illegible] द्रव्यमिथ्यात्वरूपस्य [illegible] [illegible] विपरीताभिनिवेशजनकं भावमिथ्यात्वं करोति न पुनः [illegible] मते तह्मा पुग्गलदव्वं मिच्छादिट्ठी ण पुण जीवो [illegible] कर्मबंधः तस्यैव, संसारोऽपि तस्यैव नच जीवस्य स च प्रत्यक्षविरोध इति । अह जीवो पयडी विय पुग्गलदव्वं कुणति मिच्छत्तं अथ पूर्वदूषणभयात् [illegible] प्रकृतिरपि पुद्गलद्रव्यं [illegible] पुद्ग-
द्गलं मत तह्मा दोहि कदत्तं [illegible]

दुण्णिवि भुंजंति तस्स फलं तर्हि द्वौ जीवपुद्गलौ तस्य फलं भुंजाते ततश्चाचेतनाया प्रकृतेरपि भोक्तृत्वं प्राप्तं स च प्रत्यक्षविरोध इति । **अह ण पयडी ण जीवो पुग्गलदव्वं करेदि मिच्छत्तं** अथ मतं न प्रकृति करोति नच जीव एकांतेन । किं ? पुद्गलद्रव्यं कर्मतापन्नं । कथंभूतं । न करोति ? मिथ्यात्व भावमिथ्यात्वरूपं **तह्मा पुग्गलदव्वं मिच्छत्तं तंतु णहु मिच्छा** तर्हि यदुक्तं पूर्वसूत्रे **अहवा एसो पुग्गलदव्वस्स कुणदि मिच्छत्तं** तद्वचनं तु पुनः हु स्फुटं किं मिथ्या न भवति ? अपि तु भवत्येव । किं च-यद्यपि शुद्धनिश्चयेन शुद्धजीवस्तथापि पर्यायार्थिकनयेन कथंचित्परिणामित्वे सत्यनादिकर्मोदयवशाद्रागाद्युपाधिपरिणामं गृह्णाति स्फटिकवत् । यदि पुनरेकांतेनापरिणामी भवति तदोपाधिपरिणामो न घटते । जपापुष्पोपाधिपरिणमनशक्तौ सत्यां स्फटिके जपापुष्पमुपाधिं जनयति नच काष्ठादौ, कस्मादिति चेत् तदुपाधिपरिणमनशक्त्यभावात् इति । एवं यदि द्रव्यमिथ्यात्वप्रकृति कर्त्री एकांतेन यदि भावमिथ्यात्वं करोति तदा जीवो भावमिथ्यात्वस्य कर्ता न भवति । भावमिथ्यात्वाभावे कर्मबंधाभावः ततश्च संसाराभावः सच प्रत्यक्षविरोधः । इत्यादि व्याख्यानरूपेण तृतीयस्थले गाथापंचकं गतं ।

अथ ज्ञानाज्ञानसुखदुःखादिकर्मैकांतेन कर्मैव करोति नचात्मेति सांख्यमतानुसारिणो वदंति तान्प्रति पुनरपि नयविभागेनात्मनः कथंचित्कर्तृत्वं व्यवस्थापयति—

तत्र त्रयोदशगाथासु मध्ये कर्मैवैकांतेन कर्तृ भवति इति कथनमुख्यत्वेन **कम्मेहिं दु अण्णाणी** इत्यादि सूत्रचतुष्टयं । ततः परं सांख्यमतेप्येवं भणितमास्ते—इति संवाददर्शनार्थं ब्रह्मचर्यस्थापनमुख्यत्वेन **पुरुसिच्छियाहिलासी** इत्यादि गाथाद्वयं । अहिंसास्थापनमुख्यत्वेन **जह्मा घादेदि परं** इत्यादि गाथाद्वयं । प्रकृतेरेव कर्तृत्वं नचात्मनः इत्येकांतनिराकरणार्थं—अस्यैव गाथाचतुष्टयस्यैव दूषणोपसंहाररूपेण **एवं संखुवदेसं** इत्यादि गाथैका इति सूत्रपंचकसमुदायेन द्वितीयमंतरस्थलं । तदनंतरं—आत्मा कर्म न करोति कर्मजनितभावांश्च क्रियमाणं करोतीत्येकगाथायां पूर्वपक्षः गाथात्रयेण परिहार इति समुदायेन **अहवा मण्णसि मज्झं** इत्यादि सूत्रचतुष्टयं । एवं चतुरंतराधिकारे स्थलत्रयेण समुदायपातनिका ।

आत्मख्याति —जीव एव मिथ्यात्वादिभावकर्मणः कर्ता तस्याचेतनप्रकृतिकार्यत्वे चेतनत्वानुषंगात् । स्वस्यैव जीवो मिथ्यात्वादिभावकर्मणः कर्ता जीवेन पुद्गलद्रव्यस्य मिथ्यात्वादिभावकर्मणि क्रियमाणे पुद्गलद्रव्यस्य चेतनानुषंगात् । नच जीवश्च प्रकृतिश्च मिथ्यात्वादिभावकर्मणो द्वौ कर्तारौ जीववदचेतनायाः प्रकृतेरपि तत्फलभोगानुषंगात् । नच जीवश्च प्रकृतिश्च मिथ्यात्वभावकर्मणो द्वौ अकर्तारौ स्वभावत एव पुद्गलद्रव्यस्य मिथ्यात्वादिभावानुषंगात् । ततो जीवः कर्ता स्वस्य कर्म कार्यमिति सिद्धं ।

कार्यत्वादकृतं न कर्म न च तज्जीवप्रकृत्योर्द्वयोरज्ञायाः प्रकृतेः स्वकार्यफलभुग्भावानुषंगात्कृतिः ।
नैकस्याः प्रकृतेरचित्त्वलसनाज्जीवोऽस्य कर्ता ततो जीवस्यैव च कर्म तच्चिदनुगं ज्ञाता न यत्पुद्गलः ॥१४॥
कर्मैव प्रवितर्क्य कर्तृ हतकैः क्षिप्त्वात्मनः कर्तृतां कर्तात्मैष कथंचिदित्यचलिता कैश्चिच्छ्रुतिः कोपिता ।
तेषामुद्धतमोहमुद्रितधियां बोधस्य संशुद्धये स्याद्वादप्रतिबंधलब्धविजया वस्तुस्थितिः स्तूयते ॥१५॥

कम्मेहिं दु अण्णाणी किज्जदि णाणी तहेव कम्मेहिं ।
कम्मेहिं सुवाविज्जदि जग्गाविज्जदि तहेव कम्मेहिं ॥३६६॥
कम्मेहिं सुहाविज्जदि दुक्खाविज्जदि तहेव कम्मेहिं ।
कम्मेहिय मिच्छत्तं णिज्जदिय असंजमं चेव ॥३६७॥
कम्मेहिं भमाडिज्जदि उड्ढमहं चावि तिरियलोयम्मि ।
कम्मेहिं चेव किज्जदि सुहासुहं जेत्तियं किंचि ॥३६८॥

जह्मा कम्म कुव्वदि कम्म देदित्ति हरदि ज किंचि।
तह्मा सव्वे जीवा अकारया हुति आवण्णा ॥३६९॥
पुरुसिच्छियाहिलासी इच्छी कम्म च पुरिसमहिलसदि।
एसा आयरियपरपरागदा एरिसी दु सुदी ॥३७०॥
तह्मा ण कोवि जीवो अवह्मयारी दु तुह्म मुवदेसे।
जह्मा कम्म चेवहि कम्म अहिलमदि ज भणिय ॥३७१॥
जह्मा घादेदि पर परेण घादिज्जदेदि सापयडी।
एदेणच्छेण दुकिर भण्णदि परघादणामेत्ति ॥३७२॥
तह्मा ण कोवि जीवो उवघादगो अत्थि तुह्म उवदेसे।
जह्मा कम्म चेवहि कम्म घादेदि ज भणिय ॥३७३॥
एव सखुवदेस जेदु परूविंति एरिस समणा।
तेसिं पयडी कुव्वदि अप्पा य अकारया सव्वे ॥३७४॥
अहवा मण्णसि मज्झ अप्पा अप्पाण अप्पणो कुणदि।
एसो मिच्छसहावो तुह्म एव भणतस्स ॥ ३७५ ॥
अप्पा णिच्चो असखिज्जपदेसो देसिदो दु समयम्मि।
णवि सो सक्कदि तत्तो हीणो अहियोव कादु जे ॥ ३७६ ॥
जीवस्स जीवरूव विच्छरदो जाण लोगमित्त हि।
तत्तो किं सो हीणो अहियोव कद भणसि दव्व ॥ ३७७ ॥
जह जाणगोदु भावो णाणसहावेण अत्थि देदि मद।
तह्मा णवि अप्पा अप्पय तु सयमप्पणो कुणदि ॥ ३७८ ॥

कर्मभिस्तु अज्ञानी क्रियत ज्ञानी तथैव कर्मभि ।
कर्मभि स्वाप्यते जागर्यते तथैव कर्मभि ॥ ३६६ ॥
कर्मभिः सुखीक्रियते दुःखीक्रियते च कर्मभिः।
कर्मभिश्च मिथ्यात्व नायत नीयतेऽ सयम चैव ॥ ३६७ ॥
कर्मभिर्भ्राम्यत ऊर्ध्वमधश्चापि तिर्यग्लोक च।
कर्मभिर्धैव क्रियत शुभाशुभं यावत्किंचित् ॥ ३६८ ॥
यस्मात् कर्म करोति कर्म ददाति कर्म हरतीति किंचित्।
तस्मात्तु सर्वजीवा अकारका भवन्त्यापन्ना ॥ ३६९ ॥
पुरुष स्त्र्यभिलाषी स्त्रीकर्म च पुरुषमभिलषति।

१ मर्थदास क पुस्तक पाठ।

एवमाचार्यपरंपरागतेदृशी श्रुतिः ॥ ३७० ॥
तस्मान्न कोऽपि जीवोऽब्रह्मचारी युष्माकमुपदेशे ।
यस्मात्कर्मैव हि कर्माभिलषतीति यद्भणितं ॥ ३७१ ॥
यस्माद्धंति परं परेण हन्यते च सा प्रकृतिः ।
एतेनार्थेन भण्यते परघातनामेति ॥ ३७२ ॥
तस्मान्न कोऽपि जीव उपघातको युष्माकमुपदेशे ।
यस्मात्कर्मैव हि कर्म हंतीति भणितं ॥ ३७३ ॥
एवं सांख्योपदेशं ये तु प्ररूपयंतीदृशं श्रमणाः ।
तेषां प्रकृतिः करोत्यात्मानश्चाकारकाः सर्वे ॥ ३७४ ॥
अथवा मन्यसे ममात्मात्मानमात्मनः करोति ।
एष मिथ्यास्वभावस्तवैतन्मन्यमानस्य ॥ ३७५ ॥
आत्मा नित्योऽसंख्येयप्रदेशो दर्शितस्तु समये ।
नापि स शक्यते ततो हीनोऽधिकश्च कर्तुं यत् ॥ ३७६ ॥
जीवस्य जीवस्वरूपं विस्तरतो जानीहि लोकमात्रं हि ।
ततः स किं हीनोऽधिको वा कथं करोति द्रव्यं ॥ ३७७ ॥
अथ ज्ञायकस्तु भावो ज्ञानस्वभावेन मतः ।
तस्मान्नाप्यात्मात्मानं स्वयमात्मनः करोति ॥ ३७८ ॥

तात्पर्यवृत्तिः —कर्मभिरज्ञानी क्रियते जीव एकांतेन तथैव च ज्ञानी क्रियते कर्मभिः । स्वाप निद्रां नीयते जागरणं तथैवेति प्रथमगाथा गता। कर्मभिः सुखीक्रियते दुःखीक्रियते तथैव च कर्मभिः । कर्मभिश्च मिथ्यात्वं नीयते तथैवासंयमं चैकांतेन द्वितीयगाथा गता । कर्मभिश्चैवार्द्धोर्ध्वतिर्यग्लोकं च भ्राम्यते कर्मभिश्चैव क्रियते शुभाशुभं यदन्यदपि किंचिदिति तृतीयगाथा गता । यस्मादेव भणितं कर्मैव करोति कर्मैव ददाति कर्मैव हरति यत्किंचिच्छुभाशुभं तस्मादेकांतेन सर्वे जीवा अकारकाः प्राप्ताः, ततश्च कर्माभावः कर्माभावे संसाराभावः स च प्रत्यक्षविरोधः —इति कर्मकांतकर्तृत्वदूषणमुख्यत्वेन सूत्रचतुष्टयं गतं । कर्मैव करोतीत्येकांतेनेति पूर्वोक्तमर्थं श्रीकुंदकुंदाचार्यदेवाः सांख्यमतसंवादं दर्शयित्वा पुनरपि समर्थयंति। यथ पूर्वोक्तदूषणेन न भवदीयमतेऽपि भणितमास्ते पुंवेदाख्यं कर्म कर्तृ स्त्रीवेदकर्माभिलाषं करोति, स्त्रीवेदाख्यं कर्म पुंवेदकर्माभिलषत्येकांतेन न च जीवः । एवमाचार्यपरंपरायां समागता श्रुतिरीदृशी। श्रुतिः कोऽर्थः ? आगमो भवतां सांख्यानामिति प्रथमगाथा गता । तथा सति किं दूषणं चेति ? एवं न कोऽपि जीवोऽस्त्यब्रह्मचारी युष्माकमुपदेशे किंतु यथा शुद्धनिश्चयेन सर्वे जीवा ब्रह्मचारिणो भवंति तथैकांतेनाशुद्धनिश्चयेनापि ब्रह्मचारिण एव यस्मात्पुंवेदाख्यं कर्म स्त्रीवेदाख्यं कर्माभिलषति न च जीवः इत्युक्तं पूर्वं स च प्रत्यक्षविरोधः । इत्यब्रह्मकथनरूपेण गाथाद्वयं गतं । यस्मात्कारणात् परं कर्मस्वरूपं प्रकृतिः कर्त्री हंति परेण कर्मणा सा प्रकृतिरपि हन्यते न च जीवः । एतेनार्थेन किल जैनमते परघातनामकर्मेति भण्यते। परं किंतु जैनमते जीवो हिंसाभावेन परिणमति परघातनाम सहकारिकारणं भवति इति नास्ति विरोध इति प्रथमगाथा गता। तस्मात्किं दूषणं ? शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन तावदपरिणामी हिंसापरिणामरहितो जीवो जैनागमे कथितं, कथं ? इति चेत् सव्वे सुद्धा हु सुद्धणया इति वचनात् व्यवहारेण तु परिणामीति। भवदीयमते पुनर्यथा शुद्धनयेन तथाशुद्धनयेनाप्युपघातको हिंसकः कोऽपि नास्ति। कस्मात् ? इति चेत् यस्मादेकांतेन कर्म चेव हि कुव्वदि अण्णं कर्म हंति, न चात्मेति सूत्रेसूत्रे भणितमिति। एवं हिंसाविचारमुख्यत्वेन गाथाद्वयं गतं। एवं संखुवदेसं जे दु परूविंति एरिसं समणा एवं पूर्वोक्तं सांख्योपदेशमीदृशं

प्रोक्तस्य ये कथन परमगमोक्त नयविभागमजानन्त समणा श्रमणाभासा द्रव्यलिङ्गिन प्ररूपयति कथयन्ति। **तेसिं पयडी कुव्वदि अप्पाय अकारया सव्वे** तेषां मतेनैकान्तेन प्रकृति कर्त्री भवति। आत्मानश्च पुनरकारका सर्वे। ततश्च कर्तृत्वाभावे कर्माभाव, कर्माभावे संसाराभाव। ततो मोक्षप्रसङ्ग। स च प्रत्यक्षविरोध इति। जैनमते पुन परस्परसापेक्षनिश्चयव्यवहारनयद्वयेन सर्वं घटत इति नास्ति दोष। एवं सांख्यमतसंवाद दर्शयित्वा जीवस्यैकान्तेनाकर्तृत्वदूषणद्वारेण सूत्रपञ्चकं गत। **अहवा मण्णसि मज्झं अप्पा अप्पाणमप्पणो कुणदि द सावय।** अथवा मन्यसे त्वं पूर्वोक्तकर्तृत्वदूषणभयान्मदीयमते जीवो ज्ञानी ज्ञानेन च कर्मकर्तृत्व न घटते यत कारणादज्ञानिनां कर्मबन्धो भवति। किंत्वात्मा कर्ता आत्मानं कर्मतापन्नम् आत्मना करणभूतेन करोति तत कारणात् कर्तृत्व दूषणं न भवति? इति चेत् **एसो मिच्छसहावो तुह्मं एवं मुणन्तस्स** अयमपि मिथ्यास्वभाव एवं मन्यमानस्य तव इति पूर्वपक्षगाथा गता।

अथ सूत्रत्रयेण परिहारमाह कस्मान्मिथ्यास्वभाव? इति चेत **जं** यस्मात् कारणात् **अप्पा णिच्चासंखिज्जपदेसो दसिदो दु समयम्हि** आत्मा द्रव्यार्थिकनयेन नित्यस्तथा चासंख्यातप्रदेशो दर्शित समये परमागमे तस्मात्तन शुद्धचैतन्यान्वयलक्षणद्रव्यत्व तथैवासंख्यातप्रदेशत्वं च पूर्वमेव तिष्ठति **णवि सो सक्कदि तत्तो हीणो अहियो व काउं जं** तद्द्रव्य प्रदेशत्व च तत्प्रमाणादधिक हीनं वा कर्तुं नायाति इति हेतोरात्मा करोतीति वचन मिथ्येति। अथ मत असंख्यातमानं जघन्यमध्यमोत्कृष्टभेदेन बहुभेद तिष्ठति तेन कारणेन जघन्यमध्यमोत्कृष्टरूपेण संख्यातप्रदेशत्व जीव करोति तदपि न घटते यस्मात्कारणात् **जीवस्स जीवरूवं वित्थरदो जाण लोगमित्तं हि** जीवस्य जीवरूप प्रदेशापेक्षया विस्तरतो महामत्स्यकाले लोकपूरणकाले वा अथवा जघन्येन सूक्ष्मनिगोदकाले नानाप्रकारमध्यमावगाहशरीरग्रहणकाले वा प्रदीपवद्विस्तारोपसंहारवशेन लोकमात्रप्रदेशमेव जानीहि हि स्फुटं **तत्तो सो किं हीणो अहिओ व कदं भणसि दव्वं** तस्माल्लोकमात्रप्रदेशप्रमाणात्स जीव। किं हीनोऽधिको वा कृतो येन त्वं भणसि आत्मद्रव्य कृत किंतु नैवेति। **अह जाणगो दु भावो णाणसहावेण अत्थि देदिमदं** अथ हे शिष्य! ज्ञायको भाव पदार्थ आत्मा ज्ञानरूपेण पूर्वमेवास्तीति मत। **तम्हा णवि अप्पा अप्पयं तु सयमप्पणो कुणदि** यस्मान्निर्मलज्ञानदर्शनस्वभावशुद्धात्मा पूर्वमेवास्ति तस्मादात्मा कर्ता आत्मानं कर्मतापन्न स्वयमेवात्मना कृत्वा नैव करोतीत्येक दूषणं। द्वितीयं च निर्विकारपरमतत्त्वज्ञानी तु कर्ता न भवतीति पूर्वमेव भणितमास्ते। एवं पूर्वपक्षपरिहाररूपेण तृतीयान्तररूपगाथाचतुष्टयं गत। कश्चिदाह जीवात्प्राणा भिन्ना अभिन्ना वा यद्यभिन्नास्तदा यथा जीवस्य विनाशो नास्ति तथा प्राणानामपि विनाशो नास्ति कथं हिंसा? अथ भिन्नास्तर्हि जीवस्य प्राणघातेऽपि किमायात? तत्रापि हिंसा नास्तीति। तत्र परिहार कायादिप्राणै सह कथंचिद्भेदाभेद। कथं? इति चेत् तप्तायःपिंडवद्वर्तमानकाले पृथक्त्वं कर्तुं नायाति तेन कारणेन व्यवहारेणाभेद। निश्चयेन पुनर्मरणकाले कायादिप्राणा जीवेन सहैव न गच्छति तेन कारणेन भेद। यद्येकान्तेन भेदो भवति तर्हि यथा परकीये काये छिद्यमाने भिद्यमानेऽपि दुःखं न भवति। तथा स्वकीयकायेऽपि दुःखं न प्राप्नोति न च तथा? प्रत्यक्षविरोधात्। ननु तथापि व्यवहारेण हिंसा जाता ननु निश्चयेनेति? सत्यमुक्तं भवता व्यवहारेण हिंसा तथा पापमपि नारकादिदु खमपि व्यवहारेणेत्यस्माकं सम्मतमेव। तन्नारकादि दु खं भवतामिष्ट यदि तर्हि हिंसां कुरुत। भीतिरस्ति? इति चेत् तर्हि त्यज्यतामिति। तत्र स्थितमेतत् एकान्तेन सांख्यमतवदकर्ता न भवति किं तर्हि रागादिविकल्परहितसमाधिलक्षणभेदज्ञानकाले कर्मण कर्ता न भवति शेषकाले कर्तेति व्याख्यानमुख्यत्वेनान्तरस्थलत्रयेण चतु स्थले त्रयोदश सूत्राणि गतानि।

अथ यावत्काल निजशुद्धात्मानमात्मभावेन न जानाति पञ्चेन्द्रियविषयादिकं परद्रव्यं च परत्वेन न जानात्ययं जीव तावत्काल रागद्वेषाभ्यां परिणमतीत्यावेदयति—अथवा बहिरात्मपञ्चेन्द्रियविषयत्यागमहत्त्व

शिवनामभिर्भावितभावनोपगमनिर्विकल्पानुग्रहान् समासादयन् विपरीतक्रियापानां विज्ञान करोम्यहमिति-
जानन् स्पर्शादिविरहितज्ञायकमात्मानं दमयति तस्य भेदज्ञानार्थं शिक्षां प्रयच्छति —

आत्मख्याति —कर्मैवात्मानमज्ञानिनं करोति ज्ञानावरणाख्यकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैव ज्ञानिनं करोति ज्ञानावरणाख्यकर्मक्षयोपशममन्तरेण तदनुपपत्तेः। कर्मैव स्वापयति निद्राख्यकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैव जागरयति निद्राख्यकर्मक्षयोपशममन्तरेण तदनुपपत्तेः। कर्मैव सुखयति सद्वेद्याख्यकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैव दुःखयति असद्वेद्याख्यकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैव मिथ्यादृष्टिं करोति मिथ्यात्वकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैवासंयतं करोति चारित्रमोहाख्यकर्मोदयमन्तरेण तदनुपपत्तेः। कर्मैवोर्ध्वाधस्तिर्यग्लोकं भ्रमयति आनुपूर्व्याख्यकर्मोदयमन्तरेण तदनुपपत्तेः। अपरमपि यद्यावत्किंचिच्छुभाशुभभेदं तत्तावत्सकलमपि कर्मैव करोति प्रशस्ताप्रशस्तरागाख्यकर्मोदयमन्तरेण तदनुपपत्तेः। यत एवं समस्तमपि स्वतंत्रं कर्म करोति कर्म ददाति कर्म हरति च ततः सर्व एवात्मा नित्यमेवैकांतेनाकर्तार एवेति निश्चिनुमः। किंच—श्रुतिरप्येनमर्थमाह पुंवेदाख्यं कर्म स्त्रियमभिलषति स्त्रीवेदाख्यं कर्म पुमांसमभिलषति इति वाक्येन कर्मण एव कर्माभिलाषकर्तृत्वसमर्थनेन जीवस्याब्रह्मकर्तृत्वप्रतिषेधात्। तथा यत्परेण हन्ति, येन च परेण हन्यते तत्परघातकर्मेति वाक्येन कर्मण एव कर्मघातकर्तृत्वसमर्थनेन जीवस्य घातकर्तृत्वप्रतिषेधाच्च सर्वथैवाकर्तृत्वज्ञापनात्। एवमीदृशं सांख्यसमयं स्वप्रज्ञापराधेन सूत्रार्थमबुध्यमानाः केचिच्छ्रमणाभासाः प्ररूपयंति तेषां प्रकृतेरेकांतेन कर्तृत्वाभ्युपगमेन सर्वेषामेव जीवानामेकांतेनाकर्तृत्वापत्तेः "जीवः कर्तेति" कोपो दुःशक्यः परिहर्तुं। यस्तु कर्म, आत्मनो ज्ञानादीन् भावान् पर्यायरूपान् करोति, आत्मा त्वात्मानमेवैकं करोति ततो जीवः कर्तेति श्रुतिकोपो न भवतीति अभिप्रायः स मिथ्यैव। जीवो हि द्रव्यरूपेण तावन्नित्योऽसंख्येयप्रदेशो लोकपरिमाणश्च। तत्र न तावन्नित्यस्य कार्यत्वमुपपन्नं कृतकत्वनित्यत्वयोरेकत्वविरोधात्। न चावस्थितासंख्येयप्रदेशस्यैकस्य पुद्गलस्कंधस्येव प्रदेशप्रक्षेपणाकर्षणद्वारेणापि कार्यत्वं प्रदेशप्रक्षेपणाकर्षणे सति तस्यैकत्वव्याघातात्। न चापि सकललोकवास्तुविस्तारपरिमितनियतनिजाभोगसंग्रहस्य प्रदेशसंकोचनविकाशद्वारेण तस्य कार्यत्वं, प्रदेशसंकोचविकाशयोरपि शुष्कार्द्रचर्मवत्प्रतिनियतनिजविस्तारादहीनाधिकस्य तस्य कर्तुमशक्यत्वात्। यस्तु वस्तुस्वभावस्य सर्वथापोढुमशक्यत्वात् ज्ञायको भावो ज्ञानस्वभावेन तिष्ठति, तथातिष्ठंश्च ज्ञायककर्तृत्वयोरत्यंतविरुद्धत्वान्मिथ्यात्वादिभावानां न कर्ता भवति। भवंति च मिथ्यात्वादिभावाः ततस्तेषां कर्मैव कर्तृ प्ररूप्यत इति वासनोन्मेषः स तु नितरामात्मानं करोतीत्यभ्युपगममुपहंत्येव ततो ज्ञायकस्य भावस्य सामान्यापेक्षया ज्ञानस्वभावावस्थितत्वेऽपि कर्मजानां मिथ्यात्वादिभावानां ज्ञानसमयेऽनादिज्ञेयज्ञानशून्यत्वात् परमात्मेति जानतो विशेषापेक्षया त्वज्ञानरूपस्य ज्ञानपरिणामस्य करणात्कर्तृत्वमनुमंतव्यं तावद्यावत्तदादिज्ञेयज्ञानभेदविज्ञानपूर्णत्वादात्मानमेवात्मेति जानतो विशेषापेक्षयापि ज्ञानरूपेणैव ज्ञानपरिणामेन परिणममानस्य केवलं ज्ञातृत्वात्साक्षादकर्तृत्वं स्यात्।

मा कर्तारममी स्पृशंतु पुरुषं सांख्या इवाप्यार्हताः कर्तारं कलयंतु तं किल सदा भेदावबोधादधः।
ऊर्ध्वं तूद्धतबोधधामनियतं प्रत्यक्षमेनं स्वयं पश्यंतु च्युतकर्तृभावमचलं ज्ञातारमेकं परं ॥ ९५ ॥

क्षणिकमिदमिहैकः कल्पयित्वात्मतत्त्वं निजमनसि विधत्ते कर्तृभोक्त्रोर्विभेदं।
अपहरति विमोहं तस्य नित्यामृतौघैः स्वयमयमभिषिंचंश्चिच्चमत्कार एव ॥ ९६ ॥

वृत्त्यंशभेदतोऽत्यंतं वृत्तिमन्नाशकल्पनात्।
अन्यः करोति भुंक्तेऽन्य इत्येकांतश्चकास्तु मा।

---

१ ... पुस्तके। २ कर्म मिथ्यात्वरूपविभावपरिणामप्रधानतया ... कर्माणि ... विरुद्धत्वात् ... ।

दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे विसए ।
तह्मा किं घादयदे चेदयिदा तेसु विसएसु ॥३७९॥
दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे कम्मे ।
तह्मा किं घादयदे चेदयिदा तेसु कम्मेसु ॥३८०॥
दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे काये ।
तह्मा किं घादयदे चेदयिदा तेसु कायेसु ॥३८१॥
णाणस्स दंसणस्स य भणिदो घादो तहा चरित्तस्स ।
णवि तह्मि कोऽवि पुग्गलदव्वे घादो दु णिद्दिट्ठो ॥३८२॥
जीवस्स जे गुणा केई णत्थि ते खलु परेसु दव्वेसु ।
तह्मा सम्मादिट्ठिस्स णत्थि रागो दु विसएसु ॥३८३॥
रागो दोसो मोहो जीवस्सेवदु अणण्ण परिणामा ।
एदेण कारणेण दु सद्दादिसु णत्थि रागादि ॥३८४॥

दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने विषये ।
तस्मात्किं घातयति चेतयिता तेषु कायेषु ॥३७९॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने कर्मणि ।
तस्मात्किं घातयति चेतयिता तेषु कर्मसु ॥३८०॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने काये ।
तस्मात् किं घातयति चेतयिता तेषु कायेषु ॥३८१॥
ज्ञानस्य दर्शनस्य भणितो घातस्तथा चारित्रस्य ।
नापि तत्र पुद्गलद्रव्यस्य कोऽपि घातो निर्दिष्टः ॥३८२॥
जीवस्य ये गुणाः केचिन्न सन्ति खलु ते परेषु द्रव्येषु ।
तस्मात्सम्यग्दृष्टेर्नास्ति रागस्तु विषयेषु ॥३८३॥
रागो द्वेषो मोहो जीवस्यैव चानन्यपरिणामाः ।
एतेन कारणेन तु शब्दादिषु न सन्ति रागादयः ॥३८४॥

तात्पर्यवृत्तिः — दर्शनज्ञानचारित्रं किमपि नास्ति । [illegible] पंचेन्द्रियविषयेषु ज्ञानावरणादि [illegible] अचेतने । तस्मात् किं [illegible] चेतयिता आत्मा तेषु [illegible] द्रव्यकर्मसु [illegible] ज्ञानावरणादि [illegible] कर्मसु [illegible] जड़स्वरूप [illegible] तस्मात् [illegible]
[illegible] ज्ञानस्य दर्शनस्य च भणितो घातो तथा चारित्रस्य [illegible]
[illegible] कायसम्बन्धि [illegible]
[illegible]

रित्वेनानिक्षिप्तचित्तभावनोत्पन्ननिर्विकारसुखामृतरसास्वादबलेन विषयकर्मकायानां विघातं करोम्यहमिति–न जानन् स्वसंवित्तिरहितकायक्लेशेनात्मानं दमयति तस्य भेदज्ञानार्थं शिक्षां प्रयच्छति —

आत्मख्याति —कर्मैवात्मानमज्ञानिनं करोति ज्ञानावरणाख्यकर्मोदयमंतरेण तदनुपपत्तेः कर्मैव ज्ञानिनं करोति ज्ञानावरणाख्यकर्मक्षयोपशममंतरेण तदनुपपत्तेः । कर्मैव स्वापयति निद्राख्यकर्मोदयमंतरेण तदनुपपत्तेः । कर्मैव जागरयति निद्राख्यकर्मोदयक्षयोपशममंतरेण तदनुपपत्तेः । कर्मैव सुखयति सद्वेद्याख्यकर्मोदयमंतरेण तदनुपपत्तेः । कर्मैव दुःखयति असद्वेद्याख्यकर्मोदयमंतरेण तदनुपपत्तेः । कर्मैव मिथ्यादृष्टिं करोति मिथ्यात्वकर्मोदयमंतरेण तदनुपपत्तेः । कर्मैवासंयतं करोति चारित्रमोहाख्यकर्मोदयमंतरेण तदनुपपत्तेः । कर्मैवोर्द्ध्वाधस्तिर्यग्लोकं भ्रमयति आनुपूर्व्याख्यकर्मोदयमंतरेण तदनुपपत्तेः । अपरमपि यद्यावत्किंचित् शुभाशुभभेदं तत्तावत्सकलमपि कर्मैव करोति प्रशस्ताप्रशस्तरागाख्यकर्मोदयमंतरेण तदनुपपत्तेः । यत एवं समस्तमपि स्वतंत्रं कर्म करोति कर्म ददाति कर्म हरति च ततः सर्व एव जीवा नित्यमेवैकांतेनाकर्तार एवेति निश्चिनुमः । किंच—श्रुतिरप्येनमर्थमाह पुंवेदाख्यं कर्म स्त्रियमभिलषति स्त्रीवेदाख्यं कर्म पुमांसमभिलषति इति वाक्येन कर्मण एव कर्माभिलाषकर्तृत्वसमर्थनेन जीवस्याब्रह्मकर्तृत्वप्रतिषेधात् । तथा यत्परं हंति, येन च परेण हन्यते तत्परघातकर्मेति वाक्येन कर्मण एव कर्मघातकर्तृत्वसमर्थनेन जीवस्य घातकर्तृत्वप्रतिषेधाच्च सर्वथैवाकर्तृत्वज्ञापनात् । एवमीदृशं सांख्यसमयं स्वप्रज्ञापराधेन सूत्रार्थमबुध्यमानाः केचिच्छ्रमणाभासाः प्ररूपयंति तेषां प्रकृतेरेकांतेन कर्तृत्वाभ्युपगमेन सर्वेषामेव जीवानामेकांतेनाकर्तृत्वापत्तेः —जीवः कर्तेति कोपो दुःशक्यः परिहर्तुं । यस्तु कर्म, आत्मनो ज्ञानादिसर्वभावान् पर्यायरूपान् करोति, आत्मा त्वात्मानमेवैकं करोति ततो जीवः कर्तेति श्रुतिकोपो न भवतीति अभिप्रायः स मिथ्यैव । जीवो हि द्रव्यरूपेण तावन्नित्योऽसंख्येयप्रदेशो लोकपरिमाणश्च । तत्र न तावन्नित्यस्य कार्यत्वमुपपन्नं कृतकत्वनित्यत्वयोरेकत्वविरोधात् । नचावस्थितासंख्येयप्रदेशस्यैकस्य पुद्गलस्कंधस्येव प्रदेशप्रक्षेपणाकर्षणद्वारेणापि कार्यत्वं प्रदेशप्रक्षेपणाकरणे सति तस्यैकत्वव्याघातात् । नचापि सकललोकवास्तुविस्तारपरिमितनियतनिजाभोगसंग्रहस्य प्रदेशसंकोचनविकाशद्वारेण तस्य कार्यत्वं, प्रदेशसंकोचनविकाशयोरपि शुष्कार्द्रचर्मवत्प्रतिनियतनिजविस्ताराद्धीनाधिकस्य तस्य कर्तुमशक्यत्वात् । यस्तु वस्तुस्वभावस्य सर्वथापोढुमशक्यत्वात् ज्ञायको भावो ज्ञानस्वभावेन तिष्ठति, तथातिष्ठंश्च ज्ञायककर्तृत्वयोरत्यंतविरुद्धत्वान्मिथ्यात्वादिभावानां न कर्ता भवति । भवंति च मिथ्यात्वादिभावाः ततस्तेषां कर्मैव कर्तृ प्ररूप्यत इति वासनोन्मेषः स तु नितरामात्मानं करोतीत्यभ्युपगममुपहंत्येव ततो ज्ञायकस्य भावस्य सामान्यापेक्षया ज्ञानस्वभावावस्थितत्वेऽपि कर्मजानां मिथ्यात्वादिभावानां ज्ञानसमयेऽनादिज्ञेयज्ञानभेदविज्ञानशून्यत्वात् परमात्मेति जानतो विशेषापेक्षया त्वज्ञानरूपस्य ज्ञानपरिणामस्य करणात्कर्तृत्वमनुमंतव्यं तावद्यावत्तदादिज्ञेयज्ञानभेदविज्ञानपूर्णत्वादात्मानमेवात्मेति जानतो विशेषापेक्षयापि ज्ञानरूपेणैव ज्ञानपरिणामेन परिणममानस्य केवलं ज्ञातृत्वात्साक्षादकर्तृत्वं स्यात् ।

मा कर्तारममी स्पृशंतु पुरुषं सांख्या इवाप्यार्हताः कर्तारं कलयंतु तं किल सदा भेदावबोधादधः ।
ऊर्ध्वं तूद्धतबोधधामनियतं प्रत्यक्षमेनं स्वयं पश्यंतु च्युतकर्तृभावमचलं ज्ञातारमेकं परं ॥ १९ ॥
क्षणिकमिदमिहैकः कल्पयित्वात्मतत्त्वं निजमनसि विधत्ते कर्तृभोक्त्रोर्विभेदं ।
अपहरति विमोहं तस्य नित्यामृतौघैः स्वयमयमभिषिंचंश्चिच्चमत्कार एव ॥ २० ॥

इत्यादिकर्मविवादं ज्ञानमयानुसरानंद्

[illegible]

[illegible]

दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे विसए ।
तह्मा किं घादयदे चेदयिदा तेसु विसएसु ॥३७९॥
दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे कम्मे ।
तह्मा किं घादयदे चेदयिदा तेसु कम्मेसु ॥३८०॥
दंसणणाणचरित्तं किंचिवि णत्थि दु अचेदणे काये ।
तह्मा किं घादयदे चेदयिदा तेसु कायेसु ॥३८१॥
णाणस्स दंसणस्स य भणिदो घादो तहा चरित्तस्स ।
णवि तह्मि कोऽवि पुग्गलदव्वे घादो दु णिद्दिट्ठो ॥३८२॥
जीवस्स जे गुणा केई णत्थि ते खलु परेसु दव्वेसु ।
तह्मा सम्मादिट्ठिस्स णत्थि रागो दु विसएसु ॥३८३॥
रागो दोसो मोहो जीवस्सेवदु अणण्ण परिणामा ।
एदेण कारणेण दु सद्दादिसु णत्थि रागादि ॥३८४॥

दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने विषये ।
तस्मात्किं घातयति चेतयिता तेषु कायेषु ॥३७९॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने कर्मणि ।
तस्मात्किं घातयति चेतयिता तेषु कर्मसु ॥३८०॥
दर्शनज्ञानचरित्रं किंचिदपि नास्ति त्वचेतने काये ।
तस्मात् किं घातयति चेतयिता तेषु कायेषु ॥३८१॥
ज्ञानस्य दर्शनस्य भणितो घातस्तथा चारित्रस्य ।
नापि तत्र पुद्गलद्रव्यस्य कोऽपि घातो निर्दिष्टः ॥३८२॥
जीवस्य ये गुणाः केचिन्न सन्ति खलु ते परेषु द्रव्येषु ।
तस्मात्सम्यग्दृष्टेर्नास्ति रागस्तु विषयेषु ॥३८३॥
रागो द्वेषो मोहो जीवस्यैव चानन्यपरिणामाः ।
एतेन कारणेन तु शब्दादिषु न सन्ति रागादयः ॥३८४॥

तात्पर्यवृत्ति — [illegible] णाणस्स दंसणस्स य भणिदो घादो तहा चरित्तस्स [illegible]

दर्शनस्य च। तथैव मिथ्यात्वचारित्रस्य च **णवि तह्मि कोवि पुग्गलदव्वे घादो दु णिद्दिट्ठो** नच चेतने शब्दादिविषयकर्मकायरूपे पुद्गलद्रव्ये कोऽपि घातो निर्दिष्टः। किं च यथा घटाधारभूते हते सति घटो हतो न भवति तथा रागादिनिमित्तभूते शब्दादिपंचेंद्रियहतेऽपि सति मनसि गता रागादयो हता न भवति नचान्यस्य घाते कृते सत्यन्यस्य घातो भवति। कस्मात्? अतिप्रसंगादिति भावः। **जीवस्स जे गुणा केई णत्थि ते खलु परेसु दव्वेसु** यस्माज्जीवस्य ये केचन सम्यक्त्वादयो गुणास्ते परेषु परद्रव्येषु शब्दादिविषयेषु न संति खलु स्फुटं **तह्मा सम्मादिट्ठिस्स णत्थि रागो दु विसयेसु** तस्मात्कारणान्निर्विषयस्वशुद्धात्मभावनोत्थसुखतृप्तस्य सम्यग्दृष्टेर्विषयेषु रागो नास्तीति **रागो दोसो मोहो जीवस्स दु जे अणण्णपरिणामा** रागद्वेषमोहा यस्मादज्ञानिजीवस्याशुद्धनिश्चयनाभिन्न परिणामाः। **एदेण कारणेण दु सद्दादिसु णत्थि रागादी** तेन कारणेन शब्दादिमनोज्ञामनोज्ञपंचेंद्रियविषयेष्वचेतनेषु यद्यप्यज्ञानी जीवो भ्रांतिज्ञानेन शब्दादिषु रागादीन् कल्पयत्यारोपयति तथापि शब्दादिषु रागादयो न संति। कस्मात्. शब्दादीनामचेतनत्वात् ततः स्थितं तावदेव रागद्वेषद्वयमुदयते बहिरात्मनां यावन्मनसि त्रिगुप्तिरूपं स्वसंवेदनज्ञानं नास्ति। इति गाथाषट्कं गतं।

एवमेतदायाति शब्दादींद्रियविषया अचेतनाश्चेतना रागाद्युत्पत्तौ निश्चयेन कारणं न भवति—

आत्मख्यातिः —यद्धि यत्र भवति तत्तद्घाते हन्यत एव यथा प्रदीपघाते प्रकाशो हन्यते। यत्र च यद्भवति तत्तद्घाते हन्यते यथा प्रकाशघाते प्रदीपो हन्यते। यत्तु यत्र न भवति तत्तद्घाते न हन्यते यथा घटप्रदीपघाते घटो न हन्यते। तथात्मनो धर्मा ज्ञानदर्शनचारित्राणि पुद्गलद्रव्यघातेऽपि न हन्यते, नच दर्शनज्ञानचारित्राणां घातेऽपि पुद्गलद्रव्यं हन्यते, एवं दर्शनज्ञानचारित्राणि पुद्गलद्रव्ये न भवंतीत्यायाति अन्यथा तद्घाते पुद्गलद्रव्यघातस्य, पुद्गलद्रव्यघाते तद्घातस्य दुर्निवारत्वात्। यत एवं ततो ये यावंतः केचनापि जीवगुणास्ते सर्वेऽपि परद्रव्येषु न संतीति सम्यक् पश्यामः। अन्यथा अत्रापि जीवगुणघाते पुद्गलद्रव्यघातस्य पुद्गलद्रव्यघाते जीवगुणघातस्य च दुर्निवारत्वात्। यद्येवं तर्हि कुतः सम्यग्दृष्टेर्भवति रागो विषयेषु? न कुतोऽपि। तर्हि रागस्य कतरा खानिः? रागद्वेषमोहादि जीवस्यैवाज्ञानमयाः परिणामास्ततः परद्रव्यत्वाद्विषयेषु न संति, अज्ञानाभावात्सम्यग्दृष्टौ तु न भवंति एवं ते विषयेष्वसंतः सम्यग्दृष्टेर्न भवंतो न भवंत्येव।

रागद्वेषाविह हि भवति ज्ञानमज्ञानभावात् तौ वस्तुत्वप्रणिहितदृशा दृश्यमानौ न किंचित्।
सम्यग्दृष्टिः क्षपयतु ततस्तत्त्वदृष्ट्या स्फुटं तौ ज्ञानज्योतिर्ज्वलति सहजं येन पूर्णाचलार्चिः ॥१७॥

रागद्वेषोत्पादकं तत्त्वदृष्ट्या नान्यद् द्रव्यं वीक्ष्यते किंचनापि।
सर्वद्रव्योत्पत्तिरंतश्चकास्ति व्यक्तात्यंतं स्वस्वभावेन यस्मात् ॥१८॥

अण्णदविएण अण्णदवियस्स णो कीरदे गुणविघादो।
तह्मा दु सव्वदव्वा उप्पज्जंते सहावेण ॥३८५॥

अन्यद्रव्येणान्यद्रव्यस्य न क्रियते गुणोत्पादः।
तस्मात्तु सर्वद्रव्याण्युत्पद्यंते स्वभावेन ॥३८५॥

तात्पर्यवृत्तिः —अण्णदविएण अण्णदवियस्स णो कीरए गुणविघाओ। अन्यद्रव्येण [illegible] [illegible] कुंभकारादिनान्यद्रव्यस्याचेतनरूपस्य मृत्तिकादेर्न क्रियते [illegible] [illegible] [illegible] [illegible] नवनवगुणानां विनाशो न क्रियते यस्मात्। तह्मा दु सव्वदव्वा [illegible]

---

१ [illegible]

अतो महावृत्ति तस्मात्कारणात् मृत्तिकादिसर्वद्रव्याणि कर्तॄणि घटादिरूपेण जायमानानि स्वकीयोपादानकारणेन मृत्तिकादिरूपेण जायते नच कुम्भकारादिबहिरंगनिमित्तरूपेण। कस्मात् ? इति चेत् उपादानकारण सदृशं कार्यं भवतीति यस्मात्। तेन किं सिद्धं ? यद्यपि पंचेंद्रियविषयरूपेण शब्दादीनां बहिरंगनिमित्तभूतेनाज्ञानिजीवस्य रागादयो जायते तथापि जीवस्वरूपा एव चेतना न पुनः शब्दादिरूपा अचेतना भवंतीति भावार्थ । एवं कोऽपि प्राथमिकशिष्यचित्तस्यानुरागादीन् जानाति बहिरंगशब्दादिविषयाणां रागादिनिमित्तानां घात करोमीति निर्विकल्पसमाधिलक्षणभेदज्ञानाभावाच्चिंतयति तस्य संबोधनार्थं पूर्वं गाथादशकेन सह सूत्रसप्तकं गत ।

अथ व्यवहारेण कर्तृकर्मणोर्भेदं, निश्चयेन पुनर्यदेव कर्तृ तदेव कर्मेत्युपदिशति—

आत्मख्यातिः—न च जीवस्य परद्रव्यं रागादीनुत्पादयतीति शंक्यं—अन्यद्रव्येणान्यद्रव्यगुणोत्पादकस्यायोगात्। सर्वद्रव्याणां स्वभावेनैवोत्पादात् । तथा हि मृत्तिका कुम्भभावेनोत्पद्यमाना किं कुम्भकारस्वभावेनोत्पद्यते किं मृत्तिकास्वभावेन ? यदि कुम्भकारस्वभावेनोत्पद्यते तदा कुम्भकरणाहंकारनिर्भरपुरुषाधिष्ठितव्यापृतकरपुरुषशरीराकारः कुम्भः स्यात्, नच तथास्ति द्रव्यांतरस्वभावेन द्रव्यपरिणामोत्पादस्यादर्शनात्। यद्येवं तर्हि मृत्तिका कुम्भकारस्वभावेन नोत्पद्यते किंतु मृत्तिकास्वभावेनैव, स्वस्वभावेन द्रव्यपरिणामोत्पादस्य दर्शनात् । एवं च सति स्वस्वभावानतिक्रमान्न कुम्भकारः कुम्भस्योत्पादक एव मृत्तिकैव कुम्भकारस्वभावमस्पृशती स्वस्वभावेनोत्पद्यते । एवं सर्वाण्यपि द्रव्याणि स्वपरिणामपर्यायेणोत्पद्यमानानि किं निमित्तभूतद्रव्यांतरस्वभावेनोत्पद्यंते किं स्वस्वभावेन ? यदि निमित्तभूतद्रव्यांतरस्वभावेनोत्पद्यंते तदा निमित्तभूतपरद्रव्याकारस्तत्परिणामः स्यात् नच तथास्ति द्रव्यांतरस्वभावेन द्रव्यपरिणामोत्पादस्यादर्शनात् । यद्येवं तर्हि न सर्वद्रव्याणि निमित्तभूतपरस्वभावेनोत्पद्यंते ।किंतु स्वस्वभावेनैव, स्वस्वभावेन द्रव्यपरिणामोत्पादस्य दर्शनात् एवं च सति सर्वद्रव्याणां निमित्तभूतद्रव्यांतराणि स्वपरिणामस्योत्पादकान्येव सर्वद्रव्याण्येव निमित्तभूतद्रव्यांतरस्वभावमस्पृशंति स्वस्वभावेन स्वपरिणामभावेनोत्पद्यंते अतो न परद्रव्यं जीवस्य रागादीनामुत्पादकमुत्पश्यामो यस्मै कुप्यामः ।

> यदिह भवति रागद्वेषदोषप्रसूतिः कतरदपि परेषां दूषणं नास्ति तत्र ।
> स्वयमयमपराधी तत्र सर्पत्यबोधो भवतु विदितमस्तं यात्वबोधोऽस्मि बोधः ॥९९॥
> रागजन्मनि निमित्ततां परद्रव्यमेव कलयंति ये तु ते ।
> उत्तरंति न हि मोहवाहिनीं शुद्धबोधविधुरांधबुद्धयः ॥१००॥

जह सिप्पिओ दु कम्मं कुव्वदि णय सोदु तम्मओ होदि ।
तह जीवोवि य कम्मं कुव्वदि णय तम्मओ होदि ॥३८६॥
जह सिप्पिओ दु करणेहिं कुव्वदि णय सोदु तम्मओ होदि ।
तह जीवो करणेहिं कुव्वदि णय तम्मओ होदि ॥३८७॥
जह सिप्पिउ करणाणि गिह्णदि णय सो दु तम्मओ होदि ।
तह जीवो करणाणिय गिह्णदि णय तम्मओ होदि ॥३८८॥
जह सिप्पिउ कम्मफलं भुंजदि णय सोदु तम्मओ होदि ।
तह जीवो कम्मफलं भुंजदि णय सोवि तम्मओ होदि ॥३८९॥
एवं ववहारस्स दु वत्तव्वं दंसणं समासेण ।

---

१ एवं च सति मृत्तिकायाः स्वस्वभावेन कुम्भभावो नोत्पद्यते इति च पुस्तके पाठोऽस्ति ।

सुणु णिच्छयस्स वयण परिणामकद तु ज होदि ॥२९०॥
जह सिप्पिओ दु चिट्ठं कुव्वदि हवदिय तहा अणण्णो सो ।
तह जीवोवि य कम्मं कुव्वदि हवदि य अणण्णो सो ॥२९१॥
जह चिट्ठं कुव्वंतो दु सिप्पिओ णिच्च दुक्खिदो होदि ।
तत्तोसेय अणण्णो तह चेट्ठंतो दुही जीवो ॥२९२॥

यथा शिल्पिकस्तु कर्म करोति नच स तु तन्मयो भवति ।
तथा जीवोऽपि च कर्म करोति न च तन्मयो भवति ॥२८६॥
यथा शिल्पिकः करणैः करोति न स तु तन्मयो भवति ।
तथा जीवः करणैः करोति न च तन्मयो भवति ॥२८७॥
यथा शिल्पिकस्तु करणानि गृह्णाति न स तु तन्मयो भवति ।
तथा जीवः करणानि च गृह्णाति न च तन्मयो भवति ॥२८८॥
यथा शिल्पिकः कर्मफलं भुंक्ते न च स तु तन्मयो भवति ।
तथा जीवः कर्मफलं भुंक्ते न च तन्मयो भवति ॥२८९॥
एवं व्यवहारस्य तु वक्तव्यं दर्शनं समासेन ।
शृणु निश्चयस्य वचनं परिणामकृतं तु यद्भवति ॥२९०॥
यथा शिल्पिकस्तु चेष्टां करोति भवति च तथानन्यस्तस्याः ।
तथा जीवोऽपि च कर्म करोति भवति चानन्यस्तस्मात् ॥२९१॥
यथा चेष्टां कुर्वाणस्तु शिल्पिको नित्यदुःखितो भवति ।
तस्माच्च स्यादनन्यस्तथा चेष्टमानो दुःखी जीवः ॥२९२॥

[illegible] यह खडिया तु [illegible] भित्ति [illegible] खडिया [illegible] न भवति [illegible] एव [illegible] भवति [illegible] ॥

[illegible] आत्मख्याति — [illegible] भवति [illegible] तथा— [illegible] करोति । [illegible] परिणामात्मकानि [illegible] सति [illegible] तथापि [illegible] करोति [illegible] पुण्यपापादिकर्म [illegible] निमित्तनैमित्तिकभावमात्रेणैव तत्र [illegible] करोति । [illegible] सति [illegible] भवति [illegible] ततोऽन्यत्वे सति [illegible] ।

ननु परिणाम एव किल कर्म विनिश्चयतः स भवति नापरस्य परिणामिन एव भवेत् ।
न भवति कर्तृशून्यमिह कर्म न चैकतया स्थितिरिह वस्तुनो भवतु कर्तृ तदेव ततः (?) ॥१०१॥
बहिर्लुठति यद्यपि स्फुटदनन्तशक्तिः स्वयं तथाप्यपरवस्तुनो विशति नान्यवस्त्वन्तरं ।
स्वभावनियतं यतः सकलमेव वस्त्विष्यते स्वभावचलनाकुलः किमिह मोहितः क्लिश्यते ॥१०२॥
वस्तु चैकमिह नान्यवस्तुनो येन तेन खलु वस्तु वस्तु तत् ।
निश्चयोऽयमपरोऽपरस्य कः किं करोति हि बहिर्लुठन्नपि ॥१०३॥
यत्तु वस्तु कुरुतेऽन्यवस्तुनः किंचनापि परिणामिनः स्वयं ।
व्यावहारिकदृशैव तन्मतं नान्यदस्ति किमपीह निश्चयात् ॥१ ४॥

जह सेटिया दु ण परस्स सेटिया सेटिया य सा होदि ।
तह जाणगो दु ण परस्स जाणगो जाणगो सोदु ॥३९३॥
जह सेटिया दु ण परस्स सेटिया सेटिया य सा होदि ।
तह पस्सगो दु ण परस्स पस्सगो पस्सगो सोदु ॥३९४॥

जह सेटिया दु ण परस्स सेटिया सेटिया दु सा होदि ।
तह सजदो दु ण परस्स सजदो संजदो सोदु ॥३९५॥
जह सेटिया दु ण परस्स सेटिया सेटिया दु सा होदि ।
तह दसण दु ण परस्स दसण दसण ततु ॥३९६॥
एवं तु णिच्छयणयस्स भासिय णाणदसणचरित्ते ।
सुणु ववहारणयस्सय वत्तव्व से समासेण ॥३९७॥
जह परदव्व सेटदि हु सेटिया अप्पणो सहावेण ।
तह परदव्व जाणदि णादा विसएण भावेण ॥३९८॥
जह परदव्व सेटदि हु सेटिया अप्पणो सहावेण ।
तह परदव्व पस्सादि जीवोवि सएण भावेण ॥३९९॥
जह परदव्व सेटदि हु सेटिया अप्पणो सहावेण ।
तह परदव्व विरमदि णादावि सएण भावेण ॥४००॥
जह परदव्व सेटदि हु सेटिया अप्पणो सहावेण ।
तह परदव्व सद्दहदि सम्मादिट्ठी सहावेण ॥४०१॥
एसो ववहारस्स दु विणिच्छओ णाणदसणचरित्ते ।
भणिदो अण्णेसु वि पज्जएसु एमेव णादव्वो ॥४०२॥

यथा सेटिका तु न परस्य सेटिका सेटिका च सा भवति ।
तथा ज्ञायकस्तु न परस्य ज्ञायको ज्ञायकः स तु ॥३९३॥
यथा सेटिका तु न परस्य सेटिका सेटिका तु सा भवति ।
तथा दर्शकस्तु न परस्य दर्शको दर्शकस्तु स भवति ॥३९४॥
यथा सेटिकास्तु न परस्य सेटिका सेटिका च सा भवति ।
तथा संयतस्तु न परस्य संयतः संयतः स तु ॥३९५॥
यथा सेटिका तु न परस्य सेटिका सेटिका च सा भवति ।
तथा दर्शनं तु न परस्य दर्शनं दर्शनं तत्तु ॥३९६॥
एवं तु निश्चयनयस्य भाषितं ज्ञानदर्शनचरित्रे ।
शृणु व्यवहारनयस्य च वक्तव्यं तस्य समासेन ॥३९७॥
यथा परद्रव्यं सेटयति खलु सेटिकात्मनः स्वभावेन ।
तथा परद्रव्यं जानाति ज्ञातापि स्वकेन भावेन ॥३९८॥
यथा परद्रव्यं सेटयति सेटिकात्मनः स्वभावेन ।
तथा परद्रव्यं पश्यति ज्ञातापि स्वकेन भावेन ॥३९९॥
यथा परद्रव्यं सेटयति सेटिकात्मनः स्वभावेन ।

तथा परद्रव्य विमहाति ज्ञाताि स्वकेन भावन ॥४०७॥
यथा परद्रव्य सेटयति सटिकात्मन स्वभावन ।
तथा परद्रव्य श्रद्धत्त ज्ञाताि स्वकेन भावन ॥४०१॥
एव व्यवहारस्य तु विनिश्चया ज्ञानदर्शनचरित्र ।
भणिताऽन्यस्त्वापि पर्यायषु एवमव ज्ञातव्य ॥४०२॥

तात्पर्यवृत्ति —यथा लाके श्वेतिका श्वतमृत्तिका खटिका परद्रव्यस्य कुड्यादर्निश्चयेन श्वेतमृत्तिका वति त मयो न भवति बहिभाग तिष्ठतीत्यथ । तर्हि किं भवति ? श्वतिका श्वतिकैव स्वस्वरूप तिष्ठती । तथा श्वतमृत्तिकादृष्टातन ज्ञानात्मा घटपटादिज्ञयपदार्थस्य निश्चयन ज्ञायको न भवति तन्मयो न यथ । तर्हि किं भवति ? ज्ञायका ज्ञायक एव स्वस्वरूप तिष्ठतीत्यथ । एव महाद्वैतवादिनं-ज्ञान न न परिणमति-इति कथनमुख्यत्वन गाथा गता । तथा तनैव च श्वतमृत्तिकादृष्टातन दर्शक दृश्यस्य घटादिपदार्थस्य निश्चयन दर्शका न भवति, तन्मयो न भवतीत्यथ । तर्हि किं भवति ? दर्शक एव स्वस्वरूपण तिष्ठतीत्यर्थ । एव सत्तावलोकनदर्शन दृश्यपदार्थरूपण न परिणमतीति ख्यत्वन गाथा गता । तथा तनैव श्वतमृत्तिकादृष्टातन सयत आत्मा त्याज्यस्य परिग्रहाद परद्रव्यस्य निश्चयन त्याजको न भवति तन्मया न भवतीत्यथ । तर्हि किं भवति ? सयत सयत एव निर्विकार निजनन्दाहरानन्दलक्षणस्वस्वरूप तिष्ठतीत्यथ । एव वीतरागचारित्रमुख्यत्वन गाथा गता । तथैव च तनैव श्वतमृत्तिकादृष्टातन तत्त्वार्थश्रद्धानरूप सम्यग्दर्शन श्रद्धेयस्य बहिर्भूतजीवादिपदार्थस्य निश्चयनयन श्रद्धानकारक न भवति, तन्मय न भवतीत्यथ । तर्हि किं भवति ? सम्यग्दर्शन सम्यग्दर्शनमेव स्वस्वरूप तिष्ठतीत्यथ । एव तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनमुख्यत्वन गाथा गता ।

एव तु णिच्छयणयस्स भासिद णाणदसणचरित्त एव पूर्वोक्तगाथाचतुष्टयेन भणित व्याख्यान कृत । कस्य सबधि वन ? निश्चयनयस्य । क ? विषये ज्ञानदर्शनचारित्र । **सुणु ववहारणयस्स य वत्तव्व** इदानी ह शिष्य ! शृणु समाकर्णय किं ? वक्तव्य व्याख्यान । कस्य सबन्धित्वन ? व्यवहारनयस्य । कस्य सबन्धि व्यवहार ? य तस्य पूर्वोक्तज्ञानदर्शनचारित्रत्रयस्य । कन ? **समासण सक्षपण** । इति निश्चयनय व्याख्यानमुख्यत्वेन सूत्रपचक गत ।

अथ व्यवहार कथ्यत —यथा येन प्रकारण लाक परद्रव्य कुड्यादिक व्यवहारनयन श्वतयत श्वत करोति नच कुड्यादिपरद्रव्यण सह तन्मयं भवति । का ? कर्त्री श्वतिका श्वतमृत्तिका खटिका । कन ... श्वत करोति । स्वस्य ... । ... व्यवहारण जानाति नच ... सह तन्मय ... । ... द्रव्य घटादिक ज्ञय ... नभ वनति प्रथमगाथा गता । ... । कन जानाति ? स्वकीय ... ति न च परद्रव्यण सह तन्मय ... परद्रव्य व्यवहारण ... ादगाथा गता । तथैव च ... स्वकीयदर्शनन ... व परद्रव्यण सह तन्मय ... व्यवहारण । ... परिणमति पूर्णगाथा ... यजति ? स्वकीयनिर्वि ... श्रद्धान न च परद्रव्यण सह ... तन वैराग्यिक परद्रव्य ... परिणमति चतुर्थगाथा ... **एमा ववहारस्स दु विणिच्छिया णाणदसणचरित्त** ... सम्यग्दृष्टि । कन कृत्वा ? ... कथित कोऽसौ ? ... नयन ... ... सानुगत निश्चय इत्यथ । ... ... विषय ज्ञानदर्शन ...

। यदि सेटिका कुड्यादेर्भवति तदा यस्य यद्भवति तत्तदेव भवति यथात्मनो ज्ञानं भवदात्मैव तत्त्वसंबंधे जीवति सेटिका कुड्यादेर्भवती कुड्यादिरेव भवेत् एवं सति सेटिकायाः स्वद्रव्योच्छेदः । तरसंक्रमस्य पूर्वमेव प्रतिषिद्धत्वादस्त्युच्छेदः । ततो न भवति सेटिका कुड्यादेः । यदि न भ का कुड्यादेस्तर्हि कस्य सेटिका भवति ? सेटिकाया एव सेटिका भवति । ननु कतरान्या सेटिका यस्याः सेटिका भवति ? न खल्वन्या सेटिका सेटिकायाः किंतु स्वस्वाम्यंशावेवान्यौ । किमत्र स्वाम्यव्यवहारेण ? न किमपि । तर्हि न कस्यापि सेटिका सेटिका, सेटिकेवेति निश्चयः । यथाय ाय दार्ष्टांतिकः —चेतयितात्र तावद्दर्शनगुणनिर्भरस्वभावं द्रव्यं तस्य तु व्यवहारेण दृश्यं पुद्गलादि अथात्र पुद्गलादेः परद्रव्यस्य दृश्यस्य दर्शकश्चेतयिता किं भवति किं न भवतीति ? तदुभयतत्त्वस स्यते यदि चेतयिता पुद्गलादेर्भवति तदा यस्य यद्भवति तत्तदेव भवति यथात्मनो ज्ञानं भवदात्मैव ति तत्त्वसंबंधे जीवति चेतयिता पुद्गलादेर्भवन् पुद्गलादिरेव भवेत् एवं सति चेतयितुः स्वद्रव्यो च द्रव्यांतरसंक्रमस्य पूर्वमेव प्रतिषिद्धत्वाद्द्रव्यस्यास्त्युच्छेदः । ततो न भवति चेतयिता पुद्गलादेः । वति चेतयिता पुद्गलादेस्तर्हि कस्य चेतयिता भवति ? चेतयितुरेव चेतयिता भवति । ननु कत यिता चेतयितुर्यस्य चेतयिता भवति ? न खल्वन्यश्चेतयिता चेतयितुः किंतु स्वस्वाम्यंशावेवान्यौ । न्य स्वस्वाम्यंशव्यवहारेण ? न किमपि । तर्हि न कस्यापि दर्शकः, दर्शको दर्शक एवेति निश्चयः ।

पि च सेटिका तावच्छ्वेतगुणनिर्भरस्वभावं द्रव्यं तस्य तु व्यवहारेण श्वैत्यं कुड्यादि परद्रव्यं अथात्र परद्रव्यस्य श्वैत्यस्य श्वेतयित्री सेटिका किं भवति किं न भवतीति ? तदुभयतत्त्वसंबंधो मीमांस्यते । का कुड्यादेर्भवति तदा यस्य यद्भवति तत्तदेव भवति यथात्मनो ज्ञानं भवदात्मैव भवति इति जीवति सेटिका कुड्यादेर्भवती कुड्यादिरेव भवेत् । एवं सति सेटिकायाः स्वद्रव्योच्छेदः । नच क्रमस्य पूर्वमेव प्रतिषिद्धत्वाद्द्रव्यस्यास्त्युच्छेदः ? ततो न भवति सेटिका कुड्यादेः । यदि न टिका कुड्यादेस्तर्हि कस्य सेटिका भवति ? सेटिकाया एव सेटिका भवति । ननु कतरान्या टिकाया यस्याः सेटिका भवति ? न खल्वन्या सेटिका सेटिकायाः किंतु स्वस्वाम्यंशावेवान्यौ । कि स्वस्वाम्यंशव्यवहारेण ? न किमपि तर्हि न कस्यापि सेटिका, सेटिका सेटिकेति निश्चयः । यथाय ाय दार्ष्टांतिकः —चेतयितात्र तावद् ज्ञानदर्शनगुणनिर्भरपरापोहनात्मकस्वभावं द्रव्यं । तस्य तु ापोह्यं पुद्गलादिपरद्रव्यं । अथात्र पुद्गलादेः परद्रव्यस्यापोह्यस्यापोहकः किं भवति किं न भव दुभयतत्त्वसंबंधो मीमांस्यते । यदि चेतयिता पुद्गलादेर्भवति तदा यस्य यद्भवति तत्तदेव भवति यथा न भवदात्मैव भवति इति तत्त्वसंबंधे जीवति चेतयिता पुद्गलादेर्भवन् पुद्गलादिरेव भवेत् । एवं सति स्वद्रव्योच्छेदः । नच द्रव्यांतरसंक्रमस्य पूर्वमेव प्रतिषिद्धत्वाद्द्रव्यस्यास्त्युच्छेदः । ततो न भवति पुद्गलादेः । यदि न भवति चेतयिता पुद्गलादेस्तर्हि कस्य चेतयिता भवति ? चेतयितुरेव चेत वति । ननु कतरोऽन्यश्चेतयिता चेतयितुर्यस्य चेतयिता भवति ? न खल्वन्यश्चेतयिता चेतयितुः स्वाम्यंशावेवान्यौ । किमत्र साध्यं स्वस्वाम्यंशव्यवहारेण ? न किमपि । तर्हि न कस्याप्यपोहकः ऽपोहक एवेति निश्चयः ।

था च सैव सेटिका श्वेतगुणनिर्भरस्वभावा स्वयं कुड्यादिपरद्रव्यस्वभावेनापरिणममाना कुड्या निमित्तकेनात्मनः श्वेतगुणनिर्भरस्वभावस्य परिणामेनोत्पद्यमाना आत्मस्वभावेन श्वेतयतीति व्यवहि तयितापि ज्ञानगुणनिर्भरस्वभावः स्वयं पुद्गलादिपरद्रव्यस्वभावेनापरिणममानः पुद्गलादिपरद्रव्यं वा वेनापरिणमयन् पुद्गलादिपरद्रव्यनिमित्तकेनात्मनो ज्ञानगुणनिर्भरस्वभावस्य परिणामेनोत्पद्यमानः परद्रव्यं चेतयितृनिमित्तकेनात्मनः स्वभावस्य परिणामेनोत्पद्यमानः स्वभावेन जानातीति ते ।

किंच यथा च सेटिका श्वेतगुणनिर्भरस्वभावा स्वयं कुड्यादिपरद्रव्यस्वभावेनापरिणममाना कुड्या य आत्मस्वभावेनापरिणमयती कुड्यादिपरद्रव्यनिमित्तकेनात्मनः श्वेतगुणनिर्भरस्वभावस्य पर

णामेनोत्पद्यमाना कुड्यादिपरद्रव्यं सेटिकानिमित्तकेनात्मनः स्वभावस्य परिणामेनोत्पद्यमानमात्मनः स्वभावेन श्वेतयतीति व्यवह्रियते। तथा चेतयितापि दर्शनगुणनिर्भरस्वभावः स्वयं पुद्गलादिपरद्रव्यस्वभावेनापरिणममानः पुद्गलादिपरद्रव्यं चात्मस्वभावेनापरिणमयन् पुद्गलादिपरद्रव्यनिमित्तकेनात्मनः दर्शनगुणनिर्भरस्वभावस्य परिणामेनोत्पद्यमानः पुद्गलादिपरद्रव्यं चेतयितृनिमित्तकेनात्मनः दर्शनगुणनिर्भरस्वभावस्य परिणामेनोत्पद्यमानमात्मनः स्वभावेन पश्यतीति व्यवह्रियते।

अपि च—यथा च सैव सेटिका श्वेतगुणनिर्भरस्वभावा स्वयं कुड्यादिपरद्रव्यस्वभावेनापरिणममाना कुड्यादिपरद्रव्यं चात्मस्वभावेनापरिणामयंती कुड्यादिपरद्रव्यनिमित्तकेनात्मनः श्वेतगुणनिर्भरस्वभावस्य परिणामेनोत्पद्यमाना कुड्यादिपरद्रव्यं सेटिकानिमित्तकेनात्मनः स्वभावस्य परिणामेनोत्पद्यमानमात्मनः स्वभावेन श्वेतयतीति व्यवह्रियते। तथा चेतयितापि ज्ञानदर्शनगुणनिर्भरपरापोहनात्मकस्वभावः स्वयं पुद्गलादिपरद्रव्यस्वभावेनापरिणममानः पुद्गलादिपरद्रव्यं चात्मस्वभावेनापरिणमयन् पुद्गलादिपरद्रव्यनिमित्तकेनात्मना ज्ञानदर्शनगुणनिर्भरपरापोहनात्मकस्वभावस्य परिणामेनोत्पद्यमानः पुद्गलादिपरद्रव्यं चेतयितृनिमित्तकेनात्मनः स्वभावस्य परिणामेनोत्पद्यमानमात्मनः स्वभावेनापोहतीति व्यवह्रियते। एवमयमात्मनो ज्ञानदर्शनचारित्रपर्यायाणां निश्चयव्यवहारप्रकारः। एवमेवान्येषां सर्वेषामपि पर्यायाणां दृष्टव्यः।

शुद्धद्रव्यनिरूपणार्पितमतेस्तत्त्वं समुत्पश्यतो नैकद्रव्यगतं चकास्ति किमपि द्रव्यांतरं जातुचित्।
ज्ञानं ज्ञेयमवैति यत्तु तदयं शुद्धस्वभावोदयः किं द्रव्यांतरचुंबनाकुलधियस्तत्त्वाच्च्यवंते जनाः ॥१०१॥
शुद्धद्रव्यस्वरसभवनात्किं स्वभावस्य शेषमन्यद्द्रव्यं भवति यदि वा तस्य किं स्यात्स्वभावः।
ज्योत्स्नारूपं स्नपयति भुवं नैव तस्यास्ति भूमिर्ज्ञानं ज्ञेयं कलयति सदा ज्ञेयमस्यास्ति नैव ॥१०२॥
रागद्वेषद्वयमुदयते तावदेतन्न यावद् ज्ञानं ज्ञानं भवति न पुनर्बोध्यतां याति बोध्यं।
ज्ञानं ज्ञानं भवतु तदिदं न्यक्कृताज्ञानभावं भावाभावौ भवति तिरयन्येन पूर्णस्वभावः ॥१०३॥

कम्मं जं पुव्वकयं सुहासुहमणेयवित्थरविसेसं।
तत्तो णियत्तदे अप्पयं तु जो सो पडिक्कमणं ॥४०३॥
कम्मं जं सुहमसुहं जह्मि य भावेण वज्झदि भविस्सं।
तत्तो णियत्तदे जो सो पच्चक्खाणं हवे चेदा ॥४०४॥
जं सुहमसुहमुदिण्णं संपडि य अणेयवित्थरविसेसं।
तं दोसं जो चेददि स खलु आलोयणं चेदा ॥४०५॥
णिच्चं पच्चक्खाणं कुव्वदि णिच्चंपि जो पडिक्कमदि।
णिच्चं आलोचेयदि सो हु चरित्तं हवदि चेदा ॥४०६॥

कर्म यत्पूर्वकृतं शुभाशुभमनेकविस्तरविशेषं।
तस्मान्निवर्तयत्यात्मानं तु यः स प्रतिक्रमणं ॥४०३॥
कर्म यच्छुभमशुभं यस्मिंश्च भावे बध्यते भविष्यत्।
तस्मान्निवर्तते यः स प्रत्याख्यानं भवति चेतयिता ॥४०४॥
यच्छुभमशुभमुदीर्णं संप्रति चानेकविस्तरविशेषं।
स दोषं चेतयते स खल्वालोचनं चेतयिता ॥४०५॥

निल्य मत्याख्यान करोति नित्यमपि य प्रतिक्रामति।
नित्यमालोचयति स खलु चरित्र भवति चेतयिता ॥४०६॥

तात्पर्यवृत्ति—णियत्तदे अप्पयतु जो इहलोकपरलोकाकांक्षारूपख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षालक्षणनिदानबन्धादिसमस्तपरद्रव्यालम्बनोत्पन्नशुभाशुभसकलविकल्परहित शून्य। शुद्धज्ञानदर्शनस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभवनरूपाभेदरत्नत्रयात्मकनिर्विकल्पपरमसमाधिसमुत्पन्नवीतराग सहजपरमानन्दस्वभावसुखरसास्वादसमरसीभावपरिणामन सालंबन भरितावस्थ केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्योत्पादके कारणसमयसारे स्थित्वा य कर्ता, आत्मानं कर्मतापन्नं निवर्तयति। कस्मात्सकाशात्? कम्मं जं पुव्वकयं सुहासुहमणेयवित्थरविसेसं तथा शुभाशुभमूलोत्तरप्रकृतिभेदेनानेकविस्तरविस्तीर्णं पूर्वकृत यत्कर्म तस्मात्, सो पडिक्कमणं स पुरुष एवाभेदनयेन निश्चयप्रतिक्रमण भवतीत्यर्थः। णियत्तदे जो अनन्तज्ञानादिस्वरूपानन्तद्रव्यसम्यक्श्रद्धानज्ञानानुभूतिस्वरूपाभेदरत्नत्रयलक्षण परमसामायिके स्थित्वा य कर्ता आत्मानं निवर्तयति। कस्मात्? कम्मं जं सुहमसुहं जम्हि य भावम्हि बज्झदि भविस्सं तत्तो शुभाशुभानेकविस्तरं [illegible] भविष्यत्कर्म यस्मिन् मिथ्यात्वादिरागादिपरिणामे सति बध्यते तस्मात् सो पच्चक्खाणं हवे चेदा स एवंगुणविशिष्टस्तपोधन एवाभेदनयेन निश्चयप्रत्याख्यानं भवतीति विज्ञेयं। जो वददि [illegible] शुद्धात्मसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मके शुद्धे ख्यातिपूजालाभजीवितमरणादि विकल्प सर्वोपेक्षां [illegible] य कर्ता वदत्यनुभवति जानाति। किं जानाति। न च कर्म स तत्। [illegible]! [illegible] मम स्वरूपं न भवति। कथंभूतं कर्म? उदिण्णं उदयागतं। पुनरपि कथंभूतं? सुहमसुहं [illegible]। पुनश्च किंरूप? अणयवित्थरविसेसं मूलोत्तरप्रकृतिभेदेनानेकविस्तरविस्तारं। तप्पडिय [illegible] काउं वद्ध एदं। सो आलोयणं चेदा स चेतयिता पुरुष एवाभेदनयेन निश्चयालोचन भ[illegible]। णिच्चं पच्चक्खाणं कुव्वदि णिच्चपि जो पडिक्कमदि णिच्चं आलोचेदि निश्चयरत्नत्रयलक्षण शुद्धात्मस्वरूपे स्थित्वा य कर्ता पूर्वोक्तनिश्चयप्रतिक्रमण [illegible] नित्य सर्वकाल करोति सोदु चरित्तं हवदि चेदा स चेतयिता पुरुष [illegible] भवति। कस्मात्? इति चेत् शुद्धात्मस्वरूपे चरण चारित्रमिति वचनात्। [illegible]
साधनाचारित्रव्याख्यानरूपेण [illegible] गाथात्रयं गतं।

अथेन्द्रियमनोविषयेषु रागद्वेषौ [illegible] ज्ञानस्वरूप जीव [illegible]

आत्मख्याति:—य खलु [illegible] पूर्वकर्म प्रतिक्रामन् स्वयमेव प्रतिक्रमणं भवति। स एव [illegible] प्रत्याख्यानं भवति। स एव वर्तमान [illegible] नित्य प्रतिक्रामन् नित्य प्रत्याच [illegible] निवृत्त [illegible] चारित्र भवति। चारित्र तु भवन् स्वस्य ज्ञानमात्रस्य [illegible]

ज्ञानस्य [illegible]

[illegible]

णिंदिदसंथुदवयणाणि पोग्गला परिणमंति बहुगाणि।
ताणि सुणिदूण रूसदि तूसदि य अहं पुणो भणिदो ॥४०७॥

तह्मा ण तुम भणिदो किंचिवि किं रूससे अबुद्धो ॥४०८॥
असुहो सुहोव सद्दो ण त भणदि सुणसु मति सो चेव ।
णय एदि विणिग्गहिदु सोदु विसयमागद सद्द ॥४०९॥
असुह सुह च रूव ण त भणदि पेच्छ मति सो चेव ।
णय एदि विणिग्गहिदु चक्खुविसयमागद रूव ॥४१०॥
असुहो सुहोय गधो ण त भणदि जिग्घ मति सो चेव ।
णय एदि विणिग्गहिदु घाणविसयमागद गध ॥४११॥
असुहो सुहोय रसो ण त भणदि रसय मति सो चेव ।
णय एदि विणिग्गहिदु रसणविसयमागद तु रस ॥४१२॥
असुहो सुहोय फासो ण त भणदि फासमति सो चेव ।
णय एदि विणग्गहिदु कायविसयमागद फास ॥४१३॥
असुहो सुहोव गुणो ण त भणदि बुज्झ मति सो चेव ।
णय एदि विणिग्गहिदु बुद्धिविसयमागद तु गुण ॥४१४॥
असुह सुह च दव्व ण त भणदि बुज्झमति सो चेव ।
णय एदि विणग्गहिदु बुद्धिविसयमागद दव्व ॥४१५॥
एव तु जणि दव्वस्स उवसमेणेव गच्छदे मूढो ।
णिग्गहमणा परस्सय सयच बुद्धि सिवमपत्तो ॥४१६॥

निंदितसंस्तुतवचनानि पुद्गला परिणमति बहुकानि ।
तानि श्रुत्वा रुष्यति तुष्यति च पुनरह भणित ॥४०७॥
पुद्गलद्रव्य शब्दत्वपरिणत तस्य यदि गुणाऽन्यः ।
तस्मान्न त्वां भणित किंचिदपि किं रुष्यस्यबुद्ध ॥४०८॥
अशुभ शुभो वा शब्द न त्वा भणति शृणु मामिति स एव ।
नचैति विनिगृहीतु श्रोत्रविषयमागत शब्द ॥४०९॥
अशुभ शुभ वा रूप न त्वां भणति पश्य मामिति स एव ।
नचैति विनिर्ग्रहीतु चक्षुर्विषयमागत रूप ॥४१ ॥
अशुभ शुभोवा गधो न त्वां भणति जिघ्र मामिति स एव ।
नचैति विनिगृहीतु घ्राणविषयमागत गध ॥४११॥
अशुभ शुभो वा रसो न त्वां भणति रसय मामिति स एव ।
नचैति विनिगृहीतु बुद्धिविषयमागत तु रस ॥४१२॥
अशुभ शुभोवा स्पर्शो न त्वां भणति स्पृश मामिति स एव ।

नचैति विनिर्गृहीतुं कायविषयमागतं तु स्पर्शं ॥ ४१३ ॥
अशुभः शुभो वा गुणो न त्वां भणति बुध्यस्व मामिति स एव ।
नचैति विनिर्गृहीतुं बुद्धिविषयमागतं तु गुणं ॥ ४१४ ॥
अशुभं शुभं वा द्रव्यं न त्वां भणति बुध्यस्व मामिति स एव ॥
नचैति विनिर्गृहीतुं बुद्धिविषयमागतं तु द्रव्यं ॥ ४१५ ॥
एवं तु ज्ञातद्रव्यस्य उपशमेनैव गच्छति मूढः ।
विनिग्रहमनाः परस्य तु स्वयं च बुद्धिं शिवामप्राप्तः ॥ ४१६ ॥

तात्पर्यवृत्तिः — रूसदि तूसदि य एकेंद्रियविकलेंद्रियादिदुर्लभपरंपराक्रमणातीतानंतकाल [illegible] प्राग्नुभूतमिथ्यात्वविषयकषायादिविभावपरिणामाधीनतया अत्यंतदुर्लभेन कथंचित्काललब्धिवशेन मि थ्यात्वादिसप्तप्रकृतीनां तथैव चारित्रमोहनीयस्य चोपशमक्षयोपशमक्षये सति षड्द्रव्यपंचास्तिकायसप्ततत्त्व नवपदार्थादिश्रद्धानज्ञानरागद्वेषपरिहाररूपेण भेदरत्नत्रयात्मकव्यवहारमोक्षमार्गसंज्ञेन व्यवहारकारणसमय सारेण साध्येन विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्प समाधिरूपेणानंतकेवलज्ञानादिचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्योत्पादकेन निश्चयकारणसमयसारेण विना खल्वज्ञानिजीवो रुष्यति तुष्यति च । किं कृत्वा ? सुणिऊण श्रुत्वा । पुनः पश्चात् केन रूपेण ? [illegible] भणिदा भणनाह भणित इति । कानि श्रुत्वा ? णिंदिदसंथुदवयणाणि निंदितसंस्तुतवचनानि । णि तानि । किं विशिष्टानि ? पोग्गला परिणमंति बहुगाणि भाषावर्गणायोग्यपुद्गलाः कर्तारः यानि [illegible]तापन्नानि बहुविधानि परिणमंति । ज्ञानी पुनर्व्यवहारमोक्षमार्गं निश्चयमोक्षमार्गभूतं पूर्वोक्तद्विविधं [illegible] समयसारं ज्ञात्वा बहिरंगेष्टानिष्टविषये रागद्वेषौ न करोतीति भावार्थः । पुग्गलदव्वं सद्दत्तपरिणदं [illegible] भाषावर्गणायोग्यपुद्गलद्रव्यं कर्तृ प्रियस्वाति जायस्वमिति रूपेण निंदितसंस्तुतशब्दत्वपरिणतं तस्स जदि गुणो अण्णो तस्य पुद्गलद्रव्यस्य शुद्धात्मस्वरूपादयं गुणोऽन्यो भिन्नो जडरूपः, तर्हि जीवस्य किमायातं ? किमपि । तस्यैवाज्ञानिजीवस्य पूर्वोक्तव्यवहारकारणसमयसारनिश्चयसमयसारकारणरहितस्य [illegible] यते । कथं ? इति चेत् यस्मान्निंदितसंस्तुतवचनेन पुद्गलाः परिणमंति तम्हा ण तुव भणिदं । किं [illegible] वि तस्मात्कारणात्त्व न भणितं किंचिदपि किं रूसस अबुद्धो किं रुष्यसि अबुध ? [illegible] चैवाज्ञानिजीवो व्यवहारनिश्चयकारणसमयसाराभ्यां रहितः पुनरपि संबोध्यते । हे अज्ञ [illegible] [illegible] रसस्पर्शरूपा मनोज्ञामनोज्ञपंचेंद्रियविषयाः कर्तारः, त्वां कर्मतापन्नं किमपि न भणंति । किं न भणंति ? [illegible] देवदत्त ! मां कर्मतापन्नं शृणु, मां पश्य मां जिघ्र मां स्वादय, मां स्पृशेति । पुनरपि [illegible] [illegible] दादय कर्तारो मां किमपि न भणंति परं किंतु मदीयमात्रा [illegible] [illegible] रमाह—हे मूढ ! नचायाति विनिगृहीतुं—एते शब्दादिपंचेंद्रियविषयाः । [illegible] देशकीयस्वकीयविषयभावमागच्छंत । कस्मात् ? इति चेत् [illegible] [illegible] स पूर्वोक्तव्यवहारनिश्चयकारणसमयसाराभ्यां [illegible] रहित [illegible] [illegible]दिविषयेषु समागतेषु रागद्वेषौ न करोति । किंतु स्वस्थभावेन शुद्धात्मा [illegible] [illegible] पंचेंद्रियविषयेषु मनोज्ञामनोज्ञेषु [illegible] रागद्वेषौ करोत्यज्ञानी जीवः । तथा [illegible] [illegible] परद्रव्यपरिणत [illegible] मनोविषयेऽपि रागद्वेषौ करोति [illegible] [illegible] तद्यथा—परकीयगुणः शुभोऽशुभो वा चेतनोऽचेतनो वा । [illegible] भणति हे मनोबुद्धे अज्ञानिजीव ! मां कर्मतापन्नं बुध्यस्व जानीहि । [illegible] [illegible] मदीयमनसि परकीयगुणो द्रव्यं वा [illegible] [illegible] परकीयगुणः परकीयद्रव्यं वा मनोबुद्धिविषयमागतं विनिगृहीतुं नायाति । कस्मात् ? [illegible]

धस्य निषेधयितुमशक्यत्वात् इति हेतो —यद्रागद्वेषकरण तदज्ञान । यस्तु ज्ञानी स पुन [illegible]
निश्चयकारण समयसार जानन् हर्षविषादौ न करोतीति भावार्थ । एव तु एव पूर्वोक्तप्रकारेण [illegible]
आमनाक्षशब्दादिपचेंद्रियविषयस्य परकीयगुणद्रव्यरूपस्य मनोविषयस्य वा । कथभूतस्य ? जाणदव्व
ज्ञातद्रव्यस्य पचेंद्रियमनोविषयभूतस्येत्यर्थ । तस्य पूर्वोक्तप्रकारेण स्वरूप ज्ञात्वापि उवसमणेव गच्छ
मूढो उपशमनैव गच्छति मूढो बहिरात्मा स्वय कथभूत ? णिग्गहमणा निग्रहमना निराकुल [illegible]
कस्य सबधित्वेन ? परस्सय परस्य पचेंद्रियमनोविषयस्य । कथभूतस्य ? परकीयशब्दादिगुणरूपस्य । पु[illegible]
कथभूतस्य स्वकीयाविषयमागतस्य प्राप्तस्य । पुनरपि किं रूपश्चाज्ञानी जीव । सय च बुद्धिं सिवमपत्तो स[illegible]
च शुद्धात्मसवित्तिरूपा बुद्धिमप्राप्त । वीतरागसहजपरमानदरूप शिवशब्दवाच्य सुख चाप्राप्त इति । कि[illegible]
मथायस्कातापलाकृष्टा सूची स्वस्थानात्प्रच्युत्यायस्कातोपलपाषाणसमीप गच्छति तथा शब्दादयो[illegible]
क्षोभरूपविकृतिकरणार्थ जीवसमीप न गच्छति । जीवोऽपि तत्समीप न गच्छति किं तु स्वस्थान स्वस्वरूपे
तिष्ठति । एव वस्तुस्वभावे सत्यपि यदज्ञानी जीव उदसीनभाव मुक्त्वा रागद्वेषौ करोति तदज्ञानमिति ।

हे भगवन् पूर्वे बधाधिकारे भणित—

एव णाणी सुद्धो ण सय परिणमदि रायमादीहिं ।
राइज्जदि अण्णेहिं दु सो रत्तादिएहिं भावहिं ॥ १ ॥

इत्यादि रागादीनामकर्ता ज्ञानी, परद्रव्यजनिता रागादय इत्युक्त । अत्र तु स्वकीयबुद्धिदोषजनित[illegible]
रागादय परषा दूषण नास्तीति पूर्वापरविरोध ? । अत्रोत्तरमाह तत्र बधाधिकारव्याख्यान ज्ञानिजीवस्य
मुख्यत्वात् ज्ञानी तु रागादिभिर्न परिणमति तेन कारणेन परद्रव्यजनिता भणिता । अत्र चाज्ञानिजीवस्य
मुख्यता स चाज्ञानी जीव स्वकीयबुद्धिदोषेण परद्रव्यनिमित्तमात्रमाश्रित्य रागादिभि परिणमति, तेन का[illegible]
[illegible]

[illegible]

तद्वस्तुस्थितिबोधबन्ध्यधिषणा एते किमज्ञानिना।
रागद्वेषमयी भवति सहजां मुंचत्युदासीनतां ॥ १०९ ॥

ागद्वेषविभावमुक्तमहसो नित्यं स्वभावस्पृशः पूर्वागामिसमस्तकर्मविकला भिन्नास्तदात्वोदयात्।
ारूढचरित्रवैभवबलाच्चंचच्चिदर्चिर्मयीं विंदन्ति स्वरसाभिषिक्तभुवनां ज्ञानस्य संचेतनां ॥ ११० ॥

वेदंतो कम्मफलं अप्पाणं जो दु कुणदि कम्मफलं।
सो तं पुणोवि बंधदि वीयं दुक्खस्स अट्ठविहं ॥ ४१७ ॥
वेदंतो कम्मफलं मयेकदं जो दु मुणदि कम्मफलं।
सो तं पुणोवि बंधदि वीयं दुक्खस्स अट्ठ विहं ॥ ४१८ ॥
वेदंतो कम्मफलं सुहिदो दुहिदो दु हवदि जो चेदा।
सो तं पुणोवि बंधदि वीयं दुक्खस्स अट्ठविहं ॥ ४१९ ॥

वेदयमानः कर्मफलमात्मानं यस्तु करोति कर्मफलं।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥ ४१७ ॥
वेदयमानः कर्मफलं मया कृतं यस्तु जानाति कर्मफलं।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥ ४१८ ॥
वेदयमानः कर्मफलं सुखितो दुःखितश्च भवति चेतयिता।
स तत्पुनरपि बध्नाति बीजं दुःखस्याष्टविधं ॥ ४१९ ॥

ात्पर्यवृत्तिः—ज्ञानाज्ञानभेदेन चेतना तावद्द्विविधा भवति। इयं तावदज्ञानचेतना गाथात्रयेण —उदयागतं शुभाशुभं कर्म वेदयन्ननुभवन् सन्नज्ञानिजीवः स्वस्वभावाद् भ्रष्टो भूत्वा ममेदं कर्मेति ं मया कृतं कर्मेति च भणति। स जीवः पुनरपि तदष्टविधं कर्म बध्नाति। कथंभूतं ? बीजं कारणं। दुःखस्य। इति गाथाद्वयेनाज्ञानरूपा कर्मभावचेतना व्याख्याता। कर्मचेतना कोऽर्थ ? इति चेत् कर्म मया कृतं कर्मेत्याद्यज्ञानभावेन—ईहापूर्वकमिष्टानिष्टरूपेण निरुपरागशुद्धात्मानुभूतिच्युतस्य मनो [illegible] व्यापारकरणं यत् सा बंधकारणभूता कर्मचेतना भण्यते। उदयागतं कर्मफलं [illegible] समं चेतयन् मनोज्ञामनोज्ञेंद्रियविषयनिमित्तेन यः सुखितो दुःखितो वा भवति स जीवः पुनरपि तद [illegible] कर्म बध्नाति। कथंभूतं ? बीजं कारणं। कस्य ? दुःखस्य। इत्येकगाथया कर्मफलचेतना व्याख्याता। [illegible] चेतना कोऽर्थः ? इति चेत् स्वस्वभावरहितेनाज्ञानभावेन यथा संभवं व्यक्ताव्यक्तस्वभावेन [illegible] [illegible]निष्टविकल्परूपेण हर्षविषादमयं सुखदुःखानुभवनं यत्, सा बंधकारणभूता कर्मफलचेतना भण्यते। [illegible] चेतना कर्मफलचेतना द्विरूपापि त्याज्या बंधकारणत्वादिति। तत्र तयोर्द्वयोः कर्मचेतनकर्मफल- [illegible] मध्ये पूर्वं तावन्निश्चयप्रतिक्रमण-निश्चयप्रत्याख्यान-निश्चयालोचनास्वरूपं यत्पूर्वं [illegible] शुद्धज्ञानचेतनाबलेन कर्मचेतनासंन्यासभावनां नाटयति। कर्मचेतन [illegible]

द्वयमिति द्विसंयोगेन च भंगत्रयं जातं। कृतकारितानुमतत्रयमिति संयोगेनैको भंग इति सप्तभंगी। तथैव मनसा वाचा कायेनेति प्रत्येकभंगत्रयं भवति। मनोवचनद्वयं मनःकायद्वयं वचनकायद्वयमिति द्विसंयोगेन भंगत्रयं जातं। मनोवचनकायत्रयमिति च त्रिसंयोगेनैको भंग इयमपि सप्तभंगी। कृतं मनसा सह, कृतं वाचा सह, कृतं कायेन सह, कृतं मनोवचनद्वयेन सह, कृतं मनःकायद्वयेन सह, कृतं वचनकायद्वयेन सह, कृतं मनोवचनकायत्रयेण सहेति कृते निरुद्धे विवक्षिते सप्तभंगी जाता यथा। तथा कारितेऽपि तथा—अनुमतेऽपि, तथा कृतकारितद्वयेऽपि, तथा कृतानुमतद्वयेऽपि, तथा कारितानुमतद्वयेऽपि, तथा कृतकारितानुमतत्रये चेति प्रत्येकमनेन क्रमेण सप्तभंगी योजनीया। एवमेकोनपञ्चाशद्भंगा भवन्तीति प्रतिक्रमणकल्पः समाप्तः।

इदानीं प्रत्याख्यानकल्पः कथ्यते-तथाहि-यदहं करिष्यामि यदहं कारयिष्यामि यदहं कुर्वन्तमप्यन्यं प्राणिनं समनुज्ञास्यामि। केन मनसा वाचा कायेन तन्मिथ्या मे दुष्कृतमिति पूर्ववत् षट्संयोगेनैको भंगः। यथा यदहं करिष्यामि यदहं कारयिष्यामि यदहं कुर्वन्तमप्यन्यं प्राणिनं समनुज्ञास्यामि। केन ? मनसा वाचा चेति तन्मिथ्या मे दुष्कृतमिति पूर्ववदेकैकापनयनेन पञ्चसंयोगेन भंगत्रयं भवति। एवं पूर्वोक्तक्रमेण एकोनपञ्चाशद्भंगा ज्ञातव्याः। इति प्रत्याख्यानकल्पः समाप्तः।

इदानीमालोचनाकल्पः कथ्यते तद्यथा—यदहं करोमि यदहं कारयामि यदहं कुर्वन्तमप्यन्यं प्राणिनं समनुजानामि। केन ? मनसा वाचा कायेनेति तन्मिथ्या मे दुष्कृतमिति पूर्ववत् षट्संयोगेनैको भंगः। तथा यदहं करोमि यदहं कारयामि यदहं कुर्वन्तमप्यन्यं प्राणिनं समनुजानामि केन ? मनसा वाचेति तन्मिथ्या मे दुष्कृतमिति-एकैकापनयनेन पञ्चसंयोगेन भंगत्रयं भवति। एवं पूर्वोक्तप्रकारेण एकोनपञ्चाशद्भंगा ज्ञातव्याः। इत्यालोचनाकल्पः समाप्तः। कल्पः पर्वः परिच्छेदोऽधिकारोऽध्यायः प्रकरणमित्याद्येकार्थो ज्ञातव्यः। एवं निश्चयप्रतिक्रमण-निश्चयप्रत्याख्यान-निश्चयालोचनाप्रकारेण शुद्धज्ञानचेतनाभावनामुख्यत्वेन गाथाद्वयव्याख्यानेन कर्मचेतनासंन्यासभावना समाप्ता। इदानीं शुद्धज्ञानचेतनाभावनाबलेन कर्मफलचेतनासंन्यासभावनां नाटयति करोतीत्यर्थः।

तद्यथा—नाहं मतिज्ञानावरणीयकर्मफलं भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये सम्यगनुभवे इत्यर्थः। नाहं श्रुतज्ञानावरणीयकर्मफलं भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये। नाहमवधिज्ञानावरणीयकर्मफलं भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये। नाहं मनःपर्ययज्ञानावरणीयफलं भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये। नाहं केवलज्ञानावरणीयफलं भुंजे। किं तर्हि करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये इति पंचप्रकारज्ञानावरणीयरूपेण कर्मफलसंन्यासभावना व्याख्याता। नाहं चक्षुर्दर्शनावरणीयफलं भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये। एवं टीकाकथितक्रमेण—

णाणं णव दु अट्ठावीसा चउ तिय णउदीय दुण्णि पंचेव।
बावण्णहीण वियसय पयडिविणासेण होंति ते सिद्धा ॥ १ ॥

[illegible] अष्टचत्वारिंशदधिकशतप्रमितोत्तरप्रकृतीनां कर्मफलसंन्यासभावना नाटयितव्या, [illegible]। किंच उदयागतस्य कर्मणो मनोवचनकायैः कृतकारितानुमतैश्चानुभूतं [illegible] शुद्धज्ञानदर्शनस्वभावं [illegible] निर्विकल्पसमाधिबलेन [illegible] केवलज्ञानादिअनन्तचतुष्टयव्यक्तिरूपस्य [illegible] निश्चयकारणसमयसाररूपेण शुद्धज्ञानचेतनाभावनाबलेन [illegible] कर्मचेतना कर्मफलचेतनासंन्यासभावना च [illegible] शुद्धज्ञानचेतनैव भावनीया। एवं [illegible] कर्मचेतनासंन्यासभावनामुख्यत्वेन, गाथैका कर्मफलचेतनासंन्यास[illegible] शुद्धस्वभावेति दश

[illegible]

[illegible]

[illegible] —

कृतकारितानुमननैस्त्रिकालविषयं मनोवचनकायैः ।
परिहृत्य कर्म सर्वं परमं नैष्कर्म्यमवलम्बे ॥ [illegible] ॥

यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा वाचा च कायेन चेति तन्मिथ्या मे दुष्कृतमिति १ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा वाचा च तन्मिथ्या मे दुष्कृतमिति २ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति ३ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ४ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च तन्मिथ्या मे दुष्कृतमिति ५ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च तन्मिथ्या मे दुष्कृतमिति ६ यदहमकार्षं यदचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं कायेन च तन्मिथ्या मे दुष्कृतमिति ७ यदहमकार्षं यदचीकरं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ८ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ९ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १० यदहमकार्षं यदचीकरं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति ११ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति १२ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति १३ यदहमकार्षं यदचीकरं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति १४ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति १५ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च कायेन च तन्मिथ्या मे दुष्कृतमिति १६ यदहमकार्षं यदचीकरं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १७ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १८ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति १९ यदहमकार्षं यदचीकरं मनसा च तन्मिथ्या मे दुष्कृतमिति २० यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च तन्मिथ्या मे दुष्कृतमिति २१ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च तन्मिथ्या मे दुष्कृतमिति २२ यदहमकार्षं यदचीकरं वाचा च तन्मिथ्या मे दुष्कृतमिति २३ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च तन्मिथ्या मे दुष्कृतमिति २४ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं वाचा च तन्मिथ्या मे दुष्कृत २५ यदहमकार्षं यदचीकरं कायेन च तन्मिथ्या मे दुष्कृतमिति २६ यदहमकार्षं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं कायेन च तन्मिथ्या मे दुष्कृत २७ यदहमचीकरं यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं कायेन तन्मिथ्या मे दुष्कृतमिति २८ यदहमकार्षं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति २९ यदचीकरं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृत ३० यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ३१ यदहमकार्षं मनसा च वाचा च कायेन च तन्मिथ्या मे दुष्कृतमिति ३२ यदहमचीकरं मनसा च वाचा च तन्मिथ्या मे दुष्कृतमिति ३३ यत्कुर्वन्तमप्यन्यं समन्वज्ञासिषं मनसा च वाचा च तन्मिथ्या मे दुष्कृत

[illegible]

[illegible]

[illegible]

[illegible] तवे। [illegible] पंचप्रकारज्ञानावरणीयकर्मफलं [illegible] नाहं [illegible] भुंजे। तर्हि किं करोमि ? शुद्धचैतन्यस्वभावमात्मानमेव संचेतये। [illegible]—

[illegible] दु अट्ठदाला चउ तिय [illegible]
[illegible] हीण [illegible] पयडीणाम [illegible] ॥ १॥

इमां गाथामादिं कृत्वा अष्टचत्वारिंशत्प्रमितानां कर्मप्रकृतीनां कर्मफलसंन्यासभावना नाटयितव्या, कथनीयेत्यर्थः। किंच जगत्त्रयकालत्रयमनोवचनकायकृतकारितानुमतख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबन्धादिसमस्तपरद्रव्यालम्बनोत्पन्नशुभाशुभसंकल्पविकल्परहितेन शून्येन चिदानन्दैकस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसंजातवीतरागसहजपरमानन्दरूपसुखरसास्वादपरमसमरसीभावानुभवसालम्बेन भरितावस्थेन केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपस्य साक्षादुपादेयभूतस्य कार्यसमयसारस्योत्पादकेन निश्चयकारणसमयसाररूपेण शुद्धज्ञानचेतनाभावनावष्टम्भेन कृत्वा कर्मचेतनासंन्यासभावना कर्मफलचेतनासंन्यासभावना च मोक्षार्थिना पुरुषेण कर्तव्येति भावार्थः। एवं गाथाद्वयं कर्मचेतनासंन्यासभावनामुख्यत्वेन, गाथैका कर्मफलचेतनासंन्यासभावनामुख्यत्वेनेति दशमस्थले गाथात्रयं गतं।

नुजानामि वाचा चेति ४६ न करोमि कायेन चेति ४७ न कारयामि कायेन चेति ४८ न कुर्वंतमप्यन्य समनुजानामि कायेन चेति ४९ ।

> मोहविलासविजृंभितमिदमुदयत्कर्म सकलमालोच्य ।
> आत्मनि चैतन्यात्मनि निष्कर्मणि नित्यमात्मना वर्ते ॥ ११३ ॥

इत्यालोचनाकल्पः समाप्तः ॥

न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा च कायेन चेति १ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा चेति २ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च कायेन चेति ३ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा च कायेन चेति ४ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा चेति ५ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा चेति ६ न करिष्यामि न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि कायेन चेति ७ न करिष्यामि न कारयिष्यामि मनसा वाचा च कायेन चेति ८ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा च कायेन च ९ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा च कायेन चेति १० न करिष्यामि न कारयिष्यामि मनसा च वाचा चेति ११ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा चेति १२ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च वाचा चेति १३ न करिष्यामि न कारयिष्यामि मनसा च कायेन चेति १४ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च कायेन चेति १५ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च कायेन चेति १६ न करिष्यामि न कारयिष्यामि वाचा च कायेन चेति १७ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च कायेन चेति १८ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा च कायेन चेति १९ न करिष्यामि न कारयिष्यामि मनसा चेति २० न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा चेति २१ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा चेति २२ न करिष्यामि न कारयिष्यामि वाचा चेति २३ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा चेति २४ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा चेति २५ न करिष्यामि न कारयिष्यामि कायेन चेति २६ न करिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि कायेन चेति २७ न कारयिष्यामि न कुर्वंतमप्यन्य समनुज्ञास्यामि कायेन चेति २८ न करिष्यामि मनसा वाचा कायेन चेति २९ न कारयिष्यामि मनसा वाचा कायेन चेति ३० न कुर्वंतमप्यन्य जन समनुज्ञास्यामि मनसा वाचा कायेन चेति ३१ न करिष्यामि मनसा वाचा चेति ३२ न कारयिष्यामि मनसा वाचा चेति ३३ न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा वाचा चेति ३४ न करिष्यामि मनसा च कायेन चेति ३५ न कारयिष्यामि मनसा च कायेन चेति ३६ न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा च कायेन चेति ३७ न करिष्यामि वाचा च कायेन चेति ३८ न कारयिष्यामि वाचा च कायेन चेति ३९ न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा च कायेन चेति ४० न करिष्यामि मनसा चेति ४१ न कारयिष्यामि मनसा चेति ४२ न कुर्वंतमप्यन्य समनुज्ञास्यामि मनसा चेति ४३ न करिष्यामि वाचा चेति ४४ न कारयिष्यामि वाचा चेति ४५ न कुर्वंतमप्यन्य समनुज्ञास्यामि वाचा चेति ४६ न करिष्यामि कायेन चेति ४७ न कारयिष्यामि कायेन चेति ४८ न कुर्वंतमप्यन्य समनुज्ञास्यामि कायेन चेति ४९

> प्रत्याख्याय भविष्यत्कर्म समस्तं निरस्तसंमोहः ।
> आत्मनि चैतन्यात्मनि निष्कर्मणि नित्यमात्मना वर्ते ॥ ११४ ॥

इति प्रत्याख्यानकल्पः समाप्तः ।

> समस्तमित्येवमपास्य कर्म त्रैकालिकं शुद्धनयावलंबी ।
> विलीनमोहो रहितं विकारैश्चिन्मात्रमात्मानमथावलंबे ॥ ११५ ॥

अथ सकलकर्मफलसंन्यासभावनां नाटयति ।

> विगलंतु कर्मविषतरुफलानि मम भुक्तिमंतरेणैव ।
> संचेतयेऽहमचलं चैतन्यात्मानमात्मानं ॥ ११६ ॥

नाहं मतिज्ञानावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १ नाहं श्रुतज्ञानावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २ नाहमवधिज्ञानावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३ नाहं मनःपर्ययज्ञानावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४ नाहं केवलज्ञानावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५ नाहं चक्षुर्दर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६ नाहमचक्षुर्दर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७ नाहमवधिदर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८ नाहं केवलदर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९ नाहं निद्रादर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १० नाहं निद्रानिद्रादर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ११ नाहं प्रचलादर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १२ नाहं प्रचलाप्रचलादर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १३ नाहं स्त्यानगृद्धिदर्शनावरणीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १४ नाहं सातवेदनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १५ नाहमसातवेदनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १६ नाहं सम्यक्त्वमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १७ नाहं मिथ्यात्वमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १८ नाहं सम्यक्त्वमिथ्यात्वमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये १९ नाहं अनंतानुबंधिक्रोधकषायवेदनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २० नाहं अप्रत्याख्यानावरणीयक्रोधकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २१ नाहं प्रत्याख्यानावरणीयक्रोधवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २२ नाहं संज्वलनक्रोधकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २३ नाहं अनंतानुबंधिमानकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २४ नाहमप्रत्याख्यानावरणीयमानकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २५ नाहं प्रत्याख्यानावरणीयमानकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २६ नाहं संज्वलनमानकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २७ नाहमनंतानुबंधिमायाकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २८ नाहमप्रत्याख्यानावरणीयमायाकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये २९ नाहं प्रत्याख्यानावरणीयमायाकषायवेदनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३० नाहं संज्वलनमायाकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३१ नाहमनंतानुबंधिलोभकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३२ नाहमप्रत्याख्यानावरणीयलोभकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३३ नाहं प्रत्याख्यानावरणीयलोभकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३४ नाहं संज्वलनलोभकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३५ नाहं हास्यनोकषायवेदनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३६ नाहं रतिनोकषायवेदनीयमोहनीयकर्मफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३७ नाहमरतिनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३८ नाहं शोकनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ३९ नाहं भयनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४० नाहं जुगुप्सानोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मा-

१ मदखेदखापविनोदार्थं स्वापः निद्रा तस्या उपर्युपरि वृत्तिर्निद्रानिद्रा । २ या क्रिया आत्मानं प्रचलयति सा प्रचला । शोकश्रममदादिप्रभवासापि नेत्रगात्रविक्रियासूचिका सैव पुनःपुनरावर्तमाना प्रचलाप्रचला ।

मानमेव संचेतये ४१ नाहं स्त्रीवेदनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचे-
तये ४२ नाहं पुंवेदनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४३ नाहं नपुं-
सकवेदनोकषायवेदनीयमोहनीयफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४४ नाहं नरकायुःफलं
भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४५ नाहं तिर्यगायुःफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४६
नाहं मनुष्यायुःफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४७ नाहं देवायुःफलं भुंजे चैतन्यात्मानमात्मा-
नमेव संचेतये ४८ नाहं नरकगतिनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ४९ नाहं तिर्यग्गतिनाम-
फलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५० नाहं मनुष्यगतिनामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ५१ नाहं देवगतिनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५२ नाहमेकेंद्रियनामफलं
भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५३ नाहं द्वींद्रियजातिनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचे-
तये ५४ नाहं त्रींद्रियजातिनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५५ नाहं चतुरिंद्रि-
यजातिनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५६ नाहं पंचेंद्रियजातिनामफलं भुंजे चैत-
न्यात्मानमात्मानमेव संचेतये ५७ नाहमौदारिकशरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ५८ नाहं वैक्रियकशरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ५९ नाहमाहारकशरीर-
नामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६० नाहं तैजसशरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ६१ नाहं कार्मणशरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६२ नाहमौदारिकशरीरांगो-
पांगनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६३ नाहं वैक्रियकशरीरांगोपांगनामफलं भुंजे चैतन्यात्मा-
नमात्मानमेव संचेतये ६४ नाहमाहारकशरीरांगोपांगनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६५
नाहमौदारिकशरीरबंधननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६६ नाहं वैक्रियकशरीरबंधननामफलं
भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६७ नाहमाहारकशरीरबंधननामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ६८ नाहं तैजसशरीरबंधननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ६९ नाहं कार्मणशरीर-
बंधननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७० नाहमौदारिकशरीरसंघातनामफलं भुंजे चैतन्या-
त्मानमात्मानमेव संचेतये ७१ नाहं वैक्रियकशरीरसंघातनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७२
नाहमाहारकशरीरसंघातनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७३ नाहं तैजसशरीरसंघातनाम-
फलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७४ नाहं कार्मणशरीरसंघातनामफलं भुंजे चैतन्यात्मानमा-
त्मानमेव संचेतये ७५ नाहं समचतुरस्रसंस्थाननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७६ नाहं
न्यग्रोधपरिमंडलसंस्थाननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७७ नाहं सातिसंस्थाननामफलं
भुंजे चैतन्यात्मानमात्मानमेव संचेतये ७८ नाहं कुब्जसंस्थाननामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ७९ नाहं वामननामसंस्थाननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८० नाहं हुंडकसं-
स्थाननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८१ नाहं वज्रवृषभनाराचसंहनननामफलं भुंजे चैत-
न्यात्मानमात्मानमेव संचेतये ८२ नाहं वज्रनाराचसंहनननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८३
नाहं नाराचनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८४ नाहमर्धनाराचसंहनननामफलं भुंजे चैत-
न्यात्मानमात्मानमेव संचेतये ८५ नाहं कीलिकासंहनननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८६
नाहमसंप्राप्तसंहनननामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८७ नाहं स्निग्धस्पर्शनामफलं भुंजे
चैतन्यात्मानमात्मानमेव संचेतये ८८ नाहं रूक्षस्पर्शनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ८९
नाहं शीतस्पर्शनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९० नाहमुष्णस्पर्शनामफलं भुंजे चैतन्यात्मा-
नमात्मानमेव संचेतये ९१ नाहं गुरुस्पर्शनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९२ नाहं लघुस्पर्श-
नामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९३ नाहं मृदुस्पर्शनामफलं भुंजे चैतन्यात्मानमात्मानमेव
संचेतये ९४ नाहं कर्कशस्पर्शनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९५ नाहं मधुररसनामफलं
भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९६ नाहमम्लरसनामफलं भुंजे चैतन्यात्मानमात्मानमेव संचेतये ९७

नाहं तिक्तरसनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ९८ नाहं कटुकरसनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ९९ नाहं कषायरसनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०० नाहं सुरभिगन्धनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०१ नाहं दुरभिगन्धनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०२ नाहं शुक्लवर्णनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०३ नाहं रक्तवर्णनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०४ नाहं पीतवर्णनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०५ नाहं हरितवर्णनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०६ नाहं कृष्णवर्णनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०७ नाहं नरकगत्यानुपूर्वीनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०८ नाहं तिर्यग्गत्यानुपूर्वीनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १०९ नाहं मनुष्यगत्यानुपूर्वीनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११० नाहं देवगत्यानुपूर्वीनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १११ नाहं निर्माणनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११२ नाहमगुरुलघुनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११३ नाहमुपघातनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११४ नाहं परघातनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११५ नाहमातपनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११६ नाहमुद्योतनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११७ नाहमुच्छ्वासनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११८ नाहं प्रशस्तविहायोगतिनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये ११९ नाहमप्रशस्तविहायोगतिनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२० नाहं साधारणशरीरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२१ नाहं प्रत्येकनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२२ नाहं स्थावरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२३ नाहं त्रसनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२४ नाहं सुभगनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२५ नाहं दुर्भगनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२६ नाहं सुस्वरनामकर्मफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२७ नाहं दुःस्वरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२८ नाहं शुभनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १२९ नाहमशुभनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३० नाहं सूक्ष्मशरीरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३१ नाहं बादरशरीरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३२ नाहं पर्याप्तनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३३ नाहमपर्याप्तनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३४ नाहं स्थिरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३५ नाहमस्थिरनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३६ नाहमादेयनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३७ नाहमनादेयनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३८ नाहं यशःकीर्तिनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १३९ नाहमयशःकीर्तिनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४० नाहं तीर्थकरत्वनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४१ नाहमुच्चैर्गोत्रनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४२ नाहं नीचैर्गोत्रनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४३ नाहं दानान्तरायनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४४ नाहं लाभान्तरायनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४५ नाहं भोगान्तरायनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४६ नाहमुपभोगान्तरायनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४७ नाहं वीर्यान्तरायनामफलं भुञ्जे चैतन्यात्मानमात्मानमेव संचेतये १४८ ॥

निःशेषकर्मफलसंन्यसनान्ममैवं सर्वक्रियान्तरविहारनिवृत्तवृत्तेः ।
चैतन्यलक्ष्म भजतो भृशमात्मतत्त्वं कालावलीयमचलस्य वहत्वनन्ता ॥ ११७ ॥

---

१ सर्वं यत्कषायोदयवेदनातिरिक्तविभावरूपं न तु विहरणं नाम प्रवृत्तिस्तस्मान्निवृत्ता वृत्तिः ज्ञानचेतना यस्य तस्य तथाभूतस्यैव ।

पूर्वभावकृतकर्मविषद्रुमाणां भुङ्क्ते फलानि न खलु स्वत एव तृप्तः ।
आपातकालरमणीयमुदर्करम्यं निष्कर्मशर्ममयमेति दशान्तरं सः ॥ ११८ ॥
अत्यन्तं भावयित्वा विरतिमविरतं कर्मणस्तत्फलाच्च ।
प्रस्पष्टं नाटयित्वा प्रलयनमखिलाज्ञानसंचेतनायाः ॥
पूर्णं कृत्वा स्वभावं स्वरसपरिगतं ज्ञानसंचेतनां स्वां ।
सानन्दं नाटयन्तः प्रशमरसमितः सर्वकालं पिबन्तु ॥ ११९ ॥
इतः पदार्थप्रथनावगुण्ठिताद्विना कृतेरेकमनाकुलं ज्वलत् ।
समस्तवस्तुव्यतिरेकनिश्चयात् विवेचितं ज्ञानमिहावतिष्ठते ॥ १२० ॥

सत्थं णाणं ण हवदि जह्मा सत्थं ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं सत्थं जिणा विंति ॥ ४१० ॥
सद्दो णाणं ण हवदि जह्मा सद्दो ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं सद्दं जिणा विंति ॥ ४११ ॥
रूवं णाणं ण हवदि जह्मा रूवं ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं रूवं जिणा विंति ॥ ४१२ ॥
वण्णो णाणं ण हवदि जह्मा वण्णो ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं वण्णं जिणा विंति ॥ ४१३ ॥
गंधो णाणं ण हवदि जह्मा गंधो ण याणदे किंचि ।
तह्मा णाणं अण्णं अण्णं गंधं जिणा विंति ॥ ४१४ ॥
ण रसो दु होदि णाणं जह्मा दु रसो अचेदणो णिच्चं ।
तह्मा अण्णं णाणं रसं च अण्णं जिणा विंति ॥ ४१५ ॥
फासो णाणं ण हवदि जह्मा फासो ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं फासं जिणा विंति ॥ ४१६ ॥
कम्मं णाणं ण हवदि जह्मा कम्मं ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं कम्मं जिणा विंति ॥ ४१७ ॥
धम्मच्छिओ ण णाणं जह्मा धम्मो ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णं धम्मं जिणा विंति ॥ ४१८ ॥
ण हवदि णाणमधम्मच्छिओ जं ण याणदे किंचि ।
तह्मा अण्णं णाणं अण्णमधम्मं जिणा विंति ॥ ४१९ ॥

---

१ [illegible]
२ [illegible]
[illegible]

नाहं तिक्तरसनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये ९८ नाहं कटुकरसनाम
न्यात्मानमात्मानमेव सचेतये ९९ नाहं कषायरसनामफलं भुंजे चैतन्यात्मानमात्मानमेव
नाहं सुरभिनामगंधफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १०१ नाहमसुरभिनामगंध
त्मानमात्मानमेव सचेतये १०२ नाहं शुक्लवर्णनामफलं भुंजे चैतन्यात्मानमानमेव सच
रक्तवर्णनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १०४ नाहं पीतवर्णनामफलं भुंजे
मात्मानमेव सचेतये १०५ नाहं हरितवर्णनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १०
नामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १०७ नाहं नरकगत्यानुपूर्वीनामफलं भुं
त्मानमेव सचेतये १०८ नाहं तिर्यग्गत्यानुपूर्वीनामफलं भुंजे चैतन्यात्मानमात्मानमेव स
मनुष्यगत्यानुपूर्वीनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये ११० नाहं देवगत्या
चैतन्यात्मानमात्मानमेव सचेतये १११ नाहं निर्माणनामफलं भुंजे चैतन्यात्मानमात्मानम
नाहमगुरुलघुनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये ११३ नाहमुपघातना
न्यात्मानमात्मानमेव सचेतये ११४ नाहं परघातनामफलं भुंजे चैतन्यात्मानमात्मान
नाहमातपनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये ११६ नाहमुद्योतनामफल
नमेव सचेतये ११७ नाहमुच्छ्वासनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १
योगतिनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये ११९ नाहमप्रशस्तविहायोग
न्यात्मानमात्मानमेव सचेतये १२० नाहं साधारणशरीरनामफलं भुंजे चैतन्या
१२१ नाहं प्रत्येकनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १२२
चैतन्यात्मानमात्मानमेव सचेतये १२३ नाहं त्रसनामफलं भुंजे चैतन्या
१२४ नाहं सुभगनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १२५
चैतन्यात्मानमात्मानमेव सचेतये १२६ नाहं सुस्वरनामकर्मफलं भुं
सचेतये १२७ नाहं दुःस्वरनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये
भुंजे चैतन्यात्मानमात्मानमेव सचेतये १२९ नाहमशुभनामफलं भु
सचेतये १३० नाहं सूक्ष्मशरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव
शरीरनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १३२ नाहं पर्याप्तनाम
मेव सचेतये १३३ नाहमपर्याप्तनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेत
भुंजे चैतन्यात्मानमात्मानमेव सचेतये १३५ नाहमस्थिरनामफलं भुंजे
१३६ नाहमादेयनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १३
चैतन्यात्मानमात्मानमेव सचेतये १३८ नाहं यशःकीर्तिनामफलं भुंजे चैतन्य
नाहमयशःकीर्तिनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १४० नाहं
त्मानमात्मानमेव सचेतये १४१ नाहमुच्चैर्गोत्रनामफलं भुंजे चैतन्यात्मानम
नीचैर्गोत्रनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १४३ नाहं दानांतरा
मात्मानमेव सचेतये १४४ नाहं लाभांतरायनामफलं भुंजे चैतन्यात्मानमात्म
भोगांतरायनामफलं भुंजे चैतन्यात्मानमात्मानमेव सचेतये १४६ नाहमुपभोगांतरा
त्मानमात्मानमेव सचेतये १४७ नाहं वीर्यांतरायनामफलं भुंजे चैतन्यात्मानमात्मा

नि ···कर्म···मन्यसनामेव सेवनिर्गतविहारनिवृत्तये ।
चैतन्य··· भजता भृशमात्मतत्त्व··· ···वीयमचलस्य वहत्वनंत ॥ १

१ सर्वं ··· ··· ··· ··· ··· नाम ··· ···
··· ··· ···।

कालोऽपि नास्ति ज्ञानं यस्मात्कालो न जानाति किंचित् ।
तस्मान्न भवति ज्ञानं यस्मात्कालोऽचेतनो नित्यं ॥ ४३० ॥
आकाशमपि ज्ञानं न भवति यस्मान्न जानाति किंचित् ।
तस्मादन्यदाकाशमन्यज्ज्ञानं जिना वदंति ॥ ४३१ ॥
अध्यवसानं ज्ञानं न भवति यस्मादचेतनं नित्यं ।
तस्मात् यज्ज्ञानमध्यवसानं तथान्यत् ॥ ४३२ ॥
यस्माज्जानाति नित्यं तस्माज्जीवस्तु ज्ञायको ज्ञानी ।
ज्ञानं च ज्ञायकादव्यतिरिक्तं ज्ञातव्यं ॥४३३॥
ज्ञानं सम्यग्दृष्टिं तु संयमं सूत्रमंगपूर्वगतं ।
धर्माधर्मं च तथा प्रव्रज्यामभ्युपयाति बुधाः ॥४३४॥

तात्पर्यवृत्ति—न श्रुतं ज्ञान–अचेतनत्वात् ततो ज्ञानश्रुतयोर्व्यतिरेकः । न शब्दो ज्ञानमचेतनत्वात् ततो ज्ञानशब्दयोर्व्यतिरेकः । न रूपं ज्ञानमचेतनत्वात् ततो ज्ञानरूपयोर्व्यतिरेकः । न वर्णो ज्ञानमचेतनत्वात् ततो ज्ञानवर्णयोर्व्यतिरेकः । न गंधो ज्ञानमचेतनत्वात् ततो ज्ञानगंधयोर्व्यतिरेकः । न रसो ज्ञानमचेतनत्वात् ततो ज्ञानरसयोर्व्यतिरेकः । न स्पर्शो ज्ञानमचेतनत्वात् ततो ज्ञानस्पर्शयोर्व्यतिरेकः । न कर्म ज्ञानमचेतनत्वात् ततो ज्ञानकर्मणोर्व्यतिरेकः । न धर्मो ज्ञानमचेतनत्वात् ततो ज्ञानधर्मयोर्व्यतिरेकः । नाधर्मो ज्ञानमचेतनत्वात् ततो ज्ञानाधर्मयोर्व्यतिरेकः । न कालो ज्ञानमचेतनत्वात् ततो ज्ञानकालयोर्व्यतिरेकः । नाकाशं ज्ञानमचेतनत्वात् ततो ज्ञानाकाशयोर्व्यतिरेकः । नाध्यवसानं ज्ञानमचेतनत्वात् ततो ज्ञानाध्यवसानयोर्व्यतिरेकः । इत्येवं ज्ञानस्य सर्वैरेव परद्रव्यैः सह व्यतिरेको निश्चयसाधितो द्रष्टव्यः । अथ जीव एवैको ज्ञानं चेतनत्वात् ततो ज्ञानजीवयोरेवाव्यतिरेकः । न च जीवस्य स्वयं ज्ञानत्वात् ततो व्यतिरेकः कथंचनापि शंकनीयः । एवं सति ज्ञानमेव सम्यग्दृष्टिः, ज्ञानमेव संयमः, ज्ञानमेवांगपूर्वरूपं सूत्रं, ज्ञानमेव धर्माधर्मौ, ज्ञानमेव प्रव्रज्येति ज्ञानस्य जीवपर्यायैरपि सहाव्यतिरेको निश्चयसाधितो द्रष्टव्यः ।

अथैवं सर्वपरद्रव्यव्यतिरेकेण सर्वदर्शनादिजीवस्वभावाव्यतिरेकेण वा अतिव्याप्तिमव्याप्तिं च परिहरमाणमनादिविभ्रममूलं धर्माधर्मरूपं परसमयमुद्वम्य स्वयमेव प्रव्रज्यारूपमापाद्य दर्शनज्ञानचारित्रस्थितिरूपं स्वसमयमवाप्य मोक्षमार्गमात्मन्येव परिणतं कृत्वा समवाप्तसंपूर्णविज्ञानघनभावं हानोपादानशून्यं साक्षात्समयसारभूतं परमार्थरूपं शुद्धज्ञानमेकमवस्थितं द्रष्टव्यं ।

अन्येभ्यो व्यतिरिक्तमात्मनियतं बिभ्रत्पृथग्वस्तुतामादानोज्झनशून्यमेतदमलं ज्ञानं तथावस्थितं ।
मध्याद्यन्तविभागमुक्तसहजस्फारप्रभाभासुरः शुद्धज्ञानघनो यथास्य महिमा नित्योदितस्तिष्ठति ॥ २ ॥

उन्मुक्तमुन्मोच्यमशेषतस्तत्तथात्तमादेयमशेषतस्तत् यदात्मनः संहृतसर्वशक्तेः पूर्णस्य सन्धारणमात्मनीह ।

तात्पर्यवृत्ति—[illegible] येन नयेन एतत् सर्वं ज्ञानं मन्यते ? इति चेत्, [illegible] शुद्धनिश्चयनयेन [illegible] शुद्धद्रव्यार्थिकनयेन [illegible] निजनिरंजन [illegible] शुद्धात्मभावनारूपं [illegible] भूतार्थनयेन शुद्धात्मा एक एव [illegible] इति [illegible] गाथा गता ।

विशेष—[illegible]
[illegible]

कालोवि णत्थि णाण जह्मा कालो ण याणदे किंचि ।
तह्मा ण होदि णाण जह्मा कालो अचेदणो णिच्च ॥४३०॥
आयासंपि य णाण ण हवदि जह्मा ण याणदे किंचि ।
तह्मा अण्णायास अण्ण णाण जिणा विंति ॥ ४३१[1] ॥
अज्झवसाण णाण ण हवदि जह्मा अचेदण णिच्च ।
तह्मा अण्णं णाण अज्झवसाण तहा अण्ण ॥ ४३२ ॥
जह्मा जाणदि णिच्च तह्मा जीवो दु जाणगो णाणी ।
णाण च जाणयादो अव्वदिरित्त मुणेयव्व ॥ ४३३ ॥
णाण सम्मादिट्ठी दु सजमं सुत्तमगपुव्वगय ।
धम्माधम्म च तहा पव्वज अज्झवति बुहा ॥ ४३४ ॥

शास्त्र ज्ञान न भवति यस्माच्छास्त्र न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यच्छास्त्र जिना वदति ॥ ४२० ॥
शब्दो ज्ञान न भवति यस्माच्छब्दो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्य शब्दं जिना वदति ॥ ४२१ ॥
रूप ज्ञान न भवति यस्माद्रूप न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यद्रूप जिना वदति ॥ ४२२ ॥
वर्णो ज्ञान न भवति यस्माद्वर्णो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्य वर्ण जिना वदति ॥ ४२३ ॥
गधो ज्ञान न भवति यस्माद्गधो न जानाति किंचित् ।
तस्माज्ज्ञानमन्यदन्य गधं जिना वदति ॥ ४२४ ॥
न रसस्तु भवति ज्ञान यस्मात्तु रसो अचेतना नित्य ।
तस्मादन्यज्ज्ञानं रस चान्य जिना वदति ॥ ४२५ ॥
स्पर्शो ज्ञान न भवति यस्मात्स्पर्शो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्य स्पर्शं जिना वदति ॥ ४२६ ॥
कर्म ज्ञानं न भवति यस्मात्कर्म न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यत्कर्म जिना वदति ॥ ४२७ ॥
धर्मास्तिकायो न ज्ञान यस्माद्धर्मो न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्य धर्म जिना वदति ॥ ४२८ ॥
न भवति ज्ञानमधर्मास्तिकायो यस्मान्न जानाति किंचित् ।
तस्मादन्यज्ज्ञानमन्यमधर्म जिना वदति ॥ ४२९ ॥

---

१ [illegible] । २ [illegible]

कालो वि नास्ति ज्ञानं यस्मात्कालो न जानाति किंचित्।
तस्माद् भवति ज्ञानं यस्मात्कालोऽचेतनो नित्यं ॥ ४२० ॥
आकाशमपि ज्ञानं न भवति यस्मान्न जानाति किंचित्।
तस्मादाकाशमन्यज्ज्ञानं जिना ब्रुवंति ॥ ४२१ ॥
अध्यवसानं ज्ञानं न भवति यस्मादचेतनं नित्यं।
तस्मादन्यज्ज्ञानमध्यवसानं तथान्यत् ॥ ४२२ ॥
यस्माज्जानाति नित्यं तस्माज्जीवस्तु ज्ञायको ज्ञानी।
ज्ञानं च ज्ञायकादव्यतिरिक्तं ज्ञातव्यं ॥४२३॥
ज्ञानं सम्यग्दृष्टिं तु संयमं सूत्रमंगपूर्वगतं।
धर्माधर्मं च तथा प्रव्रज्यामभ्युपयांति बुधाः ॥४२४॥

तात्पर्यवृत्तिः—न श्रुतं ज्ञानमचेतनत्वात् ततो ज्ञानश्रुतयोर्व्यतिरेकः। न शब्दो ज्ञानमचेतनत्वात् ततो ज्ञानशब्दयोर्व्यतिरेकः। न रूपं ज्ञानमचेतनत्वात् ततो ज्ञानरूपयोर्व्यतिरेकः। न वर्णो ज्ञानमचेतनत्वात् ततो ज्ञानवर्णयोर्व्यतिरेकः। न गंधो ज्ञानमचेतनत्वात् ततो ज्ञानगंधयोर्व्यतिरेकः। न रसो ज्ञानमचेतनत्वात् ततो ज्ञानरसयोर्व्यतिरेकः। न स्पर्शो ज्ञानमचेतनत्वात् ततो ज्ञानस्पर्शयोर्व्यतिरेकः। न कर्म ज्ञानमचेतनत्वात् ततो ज्ञानकर्मणोर्व्यतिरेकः। न धर्मो ज्ञानमचेतनत्वात् ततो ज्ञानधर्मयोर्व्यतिरेकः। नाधर्मो ज्ञानमचेतनत्वात् ततो ज्ञानाधर्मयोर्व्यतिरेकः। न कालो ज्ञानमचेतनत्वात् ततो ज्ञानकालयोर्व्यतिरेकः। नाकाशं ज्ञानमचेतनत्वात् ततो ज्ञानाकाशयोर्व्यतिरेकः। नाध्यवसानं ज्ञानमचेतनत्वात् ततो ज्ञानाध्यवसानयोर्व्यतिरेकः। इत्येवं ज्ञानस्य सर्वैरेव परद्रव्यैः सह व्यतिरेको निश्चयसाधितो द्रष्टव्यः। अथ जीव एवैको ज्ञानं चेतनत्वात् ततो ज्ञानजीवयोरेवाव्यतिरेकः। नच जीवस्य स्वयं ज्ञानत्वात् ततो व्यतिरेकः कश्चनापि शंकनीयः। एवं सति ज्ञानमेव सम्यग्दृष्टिः, ज्ञानमेव संयमः, ज्ञानमेवांगपूर्वरूपं सूत्रं, ज्ञानमेव धर्माधर्मौ, ज्ञानमेव प्रव्रज्येति ज्ञानस्य जीवपर्यायैरपि सहाव्यतिरेको निश्चयसाधितो द्रष्टव्यः।

अथैवं सर्वपरद्रव्यव्यतिरेकेण सर्वदर्शनादिजीवस्वभावाव्यतिरेकेण वातिव्याप्तिमव्याप्तिं च परिहरमाणमनादिविभ्रममूलं धर्माधर्मरूपं परसमयमुद्वम्य स्वयमेव प्रव्रज्यारूपमापाद्य दर्शनज्ञानचारित्रस्थितिरूपं स्वसमयमवाप्य मोक्षमार्गमात्मन्येव परिणतं कृत्वा समवाप्तसंपूर्णविज्ञानघनभावं हानोपादानशून्यं साक्षात्समयसारभूतं परमार्थरूपं शुद्धज्ञानमेकमेवावस्थितं द्रष्टव्यं।

अन्येभ्यो व्यतिरिक्तमात्मनियतं बिभ्रत्पृथग्वस्तुतामादानोज्झनशून्यमेतदमलं ज्ञानं तथावस्थितं।
मध्याद्यन्तविभागमुक्तसहजस्फारप्रभाभास्वरः शुद्धज्ञानघनो यथास्य महिमा नित्योदितस्तिष्ठति ॥ २ ॥

उन्मुक्तमुन्मोच्यमशेषतस्तत् तथात्तमादेयमशेषतस्तत्। यदात्मनः संहृतसर्वशक्तेः पूर्णस्य संधारणमात्मनीह।

तात्पर्येण न चात् केन नयेन एतत्सर्वं ज्ञानं मन्यते? इति चेत् मिथ्यादृष्ट्यादिक्षीणकषायपर्यंतस्वकीयस्वकीयगुणस्थानयोग्यशुभाशुभशुद्धोपयोगाविनाभूतविवक्षिताशुद्धनिश्चयनयेनाशुद्धोपादानरूपेणेति। मतस्थितं शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन शुद्धोपादानरूपेण जीवादिव्यावहारिकनवपदार्थेभ्यो भिन्नमादिमध्यान्तमुक्तमेकमखंडप्रतिभासमयं निजनिरंजनसहजशुद्धपरमसमयसाराभिधानं सर्वप्रकारोपादेयभूतं शुद्धज्ञानस्वभावं शुद्धात्मतत्त्वमेव श्रद्धेयं ज्ञेयं ध्यातव्यमिति। एवं व्यावहारिकनवपदार्थमध्ये भूतार्थनयेन शुद्धजीव एक एव वास्तवः स्थित इति व्याख्यानमुख्यत्वेन एकादशस्थले पंचदशगाथा गताः।

किंच—मत्यादिसंज्ञानपंचकं पर्यायरूपं तिष्ठति शुद्धपारिणामिकभावस्तु द्रव्यरूपः। जीवपदार्थो हि न च केवलं द्रव्यं, न च पर्यायः, किंतु परस्परसापेक्षद्रव्यपर्यायधर्माधर्मभूतो धर्मी। तत्रेदानीं कतं

कर्मणा मोक्षो भवतीति चिन्तयत—केवलज्ञानं ... भविष्यति । ... कृपिश्वयत्वे । तदनन्तभाग मन पर्ययज्ञान ... मर्यादया बहिर्विषयमतिज्ञानश्रुतज्ञानावधिज्ञान ... स्वरूपमानसमतिज्ञानश्रुतज्ञानमञ्च ... निर्विकारस्वसंवेदनशब्दवाच्य ससारणां ... न भवति कस्मात् ? इति चेत् समस्तामेप्या ... सुखामृतरसास्वादैकाकारपरमसमरसीभावपरिणामेन कार्यभूतेनानन्तज्ञानसुखादिरूपस्य साक्षादुपादेयस्य ... तेकशुद्धनिश्चयनयेन शुद्धोपादानकारणत्वादिति । तथा चोक्तं

भेदविज्ञानत सिद्धा सिद्धा ये किल केचन ।
तस्यैवाभावतो बद्धा बद्धा ये किल केचन ॥ १ ॥

अत परमेव सति शुद्धबुद्धैकस्वभावपरमात्मतत्त्वस्य देह एव नास्ति कथमाहारो भविष्यतीत्युदिशति—

आत्मख्याति —न श्रुतं ज्ञानमचेतनत्वात् ततो ज्ञानश्रुतयोर्व्यतिरेक । न शब्दो ज्ञानमचेतनत्वात् ततो ज्ञानशब्दयोर्व्यतिरेक । न रूपं ज्ञानमचेतनत्वात् ततो ज्ञानरूपयोर्व्यतिरेक । न वर्णो ज्ञानमचेतनत्वात् ततो ज्ञानवर्णयोर्व्यतिरेक । न गधो ज्ञानमचेतनत्वात् ततो ज्ञानगंधयोर्व्यतिरेक । न रसो ज्ञानमचेतनत्वात् ततो ज्ञानरसयोर्व्यतिरेक । न स्पर्शो ज्ञानमचेतनत्वात् ततो ज्ञानस्पर्शयोर्व्यतिरेक । न कर्म ज्ञानमचेतनत्वात् ततो ज्ञानकर्मणोर्व्यतिरेक । न धर्मो ज्ञानमचेतनत्वात् ततो ज्ञानधर्मयोर्व्यतिरेक । नाधर्मो ज्ञानमचेतनत्वात् ततो ज्ञानाधर्मयोर्व्यतिरेक । न कालो ज्ञानमचेतनत्वात् ततो ज्ञानकालयोर्व्यतिरेक । नाकाशं ज्ञानमचेतनत्वात् ततो ज्ञानाकाशयोर्व्यतिरेक । नाध्यवसानं ज्ञानमचेतनत्वात् ततो ज्ञानाध्यवसानयोर्व्यतिरेक । इत्येवं ज्ञानस्य सर्वैरेव परद्रव्यै सह व्यतिरेकोनिश्चयसाधितो भवति । अथ जीव एवैको ज्ञानं चेतनत्वात् ततो ज्ञानजीवयोरेवाव्यतिरेक, नच जीवस्य स्वयं ज्ञानत्वात्तता व्यतिरेक कश्चनापि शङ्कनीय । एवं तु सति ज्ञानमेव सम्यग्दृष्टि, ज्ञानमेव सयम, ज्ञानमेवांगपूर्वरूप सूत्र, ज्ञानमेव धर्माधर्मौ, ज्ञानमेव प्रव्रज्येति ज्ञानस्य जीवपर्यायैरपि सहाव्यतिरेकोनिश्चयसाधितो द्रष्टव्य ।

अथैवं सर्वद्रव्यव्यतिरेकेण सर्वदर्शनादिजीवस्वभावाव्यतिरेकेण वा अतिव्याप्तिमव्याप्तिं च परिहरमाणमनादिविभ्रममूलं धर्माधर्मरूपं परसमयमुद्वम्य स्वयमेव प्रव्रज्यारूपमापाद्य दर्शनज्ञानचारित्रस्थितिस्वरूपं समयमवाप्य मोक्षमार्गमात्मन्येव परिणतं कृत्वा समवाप्तसंपूर्णविज्ञानघनभावं हानोपादानशून्यं साक्षात्समयसारभूतं शुद्धज्ञानमेकमेव स्थितं द्रष्टव्यं ।

अन्येभ्यो व्यतिरिक्तमात्मनियतं बिभ्रत्पृथग्वस्तुतामादानोज्झनशून्यमेतदमलं ज्ञानं तथावस्थितं ।
मध्याद्यन्तविभागमुक्तसहजस्फारप्रभाभासुर शुद्धज्ञानघनो यथास्य महिमा नित्योदितस्तिष्ठति ॥१२१॥

उन्मुक्तमुन्मोच्यमशेषतस्तत्तथात्तमादेयमशेषतस्तत् ।
यदात्मन संहृतसर्वशक्त पूर्णस्य सधारणमात्मनीह ॥१२२॥

व्यतिरिक्त परद्रव्यादेव ज्ञानमवस्थितं ।
कथमाहारकं तत्स्यायतदेहोऽस्य शक्यते ॥१२३॥

अत्ता जस्स अमुत्तो णहु सो आहारओ हवदि एवं ।
आहारो खलु मुत्तो जह्मा सो पुग्गलमओ दु ॥४३५॥
णवि सक्कदि घित्तु जे णं मुचदे चेव जं परं दव्वं ।
सो कोवि य तस्स गुणो पाउग्गिय विस्ससो वापि ॥४३६॥

१ नार्थ पदेऽकी ज्ञानमचेतनत्वात् ततो ज्ञानाजीवयोर्व्यतिरेक ग पु पाठ । २ अभिन्नत्वात् पाठोऽयं ... पुस्तके । ३ ... पाठ ... ।

तह्मा दु जो विसुद्धो चेदा सो णेव गिह्णदे किंचि ।
णेव विमुंचदि किंचिवि जीवाजीवाणदव्वाण ॥४३७॥

आत्मा यस्यामूर्तो न खलु स आहारको भवत्येव ।
आहारः खलु मूर्तो यस्मात्स पुद्गलमयस्तु ॥४३५॥
नापि शक्यते गृहीतुं यन्न मुंचति चैव यत्परं द्रव्यं ।
स कोऽपि च तस्य गुणो प्रायोगिको वैस्रसो वापि ॥४३६॥
तस्मात्तु यो विशुद्धश्चेतयिता स नैव गृह्णाति किंचित् ।
नैव विमुंचति किंचिदपि जीवाजीवयोर्द्रव्ययोः ॥४३७॥

तात्पर्यवृत्ति -अत्ता जस्स अमुत्तो आत्मा यस्य शुद्धनयस्याभिप्रायेण मूर्तो न भवति णहु सो आहारगो हवदि एवं स एवममूर्तत्वे सति हु स्फुटं तस्य शुद्धनयस्याभिप्रायेणाहारको न भवति । आहारो खलु मुत्तो आहारः कथंभूतः ? खलु स्फुटं मूर्तः । जह्मा सो पुग्गलमओ दु यस्मात् स आहारः पुद्गलमयः ।

सो कोवि य तस्स गुणो स कोपि तस्य गुणोऽस्त्यात्मनः । कथं ? पाउग्गिय विस्ससो वावि प्रायोगिको वैस्रसिकश्चेति । प्रायोगिकः कर्मसंयोगजनितः । वैस्रसिकः स्वभावजः । येन गुणेन किं करोति ? णवि सक्कदि घित्तु जं ण मुंचिदु चेव जं परं दव्वं परद्रव्यमाहारादिकं गृहीतुं [illegible] । [illegible] हे भगवन् ? कर्मजनितप्रायोगिकगुणेन आहारं गृह्णतस्तु कथमनाहारको भवति इति । [illegible] परं किंतु निश्चयेन तन्मयो न भवति स व्यवहारनयः । इदं तु निश्चयव्याख्यानमिति ।

तह्मादु जो विसुद्धो चेदा यस्मान्निश्चयनयेनानाहारकः तस्मात्कारणात् [illegible] रागादिरहितश्चेतयितात्मा सो णेव गिह्णद किंचि णेव विमुंचदि किंचिवि जीवाजीवाणदव्वाण [illegible] कर्माहार-नोकर्माहार-कवलाहार-लेप्याहार ओजआहार मानसाहाररूपेण जीवाजीवद्रव्याणां मध्ये [illegible] किंचिद्गृह्णाति न मुंचति । ततः कारणात् [illegible] जीवस्वरूपं न भवति [illegible] द्रव्यलिंगमपि जीवस्वरूपं न भवति इति । एवं निश्चयेन जीवस्याहारो [illegible] गाथात्रयं गतं ।

अथेदं विशुद्धज्ञानदर्शनस्वभावस्य परमात्मनो [illegible] द्रव्यलिंगं निश्चयेन मुक्तिकारणं न भवतीति प्रतिपादयति—

आत्मस्वभावानि ज्ञानं [illegible]

[illegible]

[illegible]

[illegible]

पासंडियलिंगाणि य गिहलिंगाणिय बहुप्पयाराणि ।
घित्तु वदंति मूढा लिंगमिणं मोक्खमग्गोत्ति ॥४३८॥
णय होदि मोक्खमग्गो लिंगं ज देहणिम्ममा अरिहा ।
लिंगं मुइत्तु दंसणणाणचरित्ताणि सेवंति ॥४३९॥

पाखंडिलिंगानि च गृहिलिंगानि च बहुप्रकाराणि ।
गृहीत्वा वदंति मूढा लिंगमिदं मोक्षमार्ग इति ॥ ४३८ ॥
न तु भवति मोक्षमार्गो लिंगं यद्देहनिर्ममा अर्हंत ।
लिंगं मुक्त्वा दर्शनज्ञानचारित्राणि सेवंते ॥ ४३९ ॥

तात्पर्यवृत्तिः—पाखंडिलिंगानि गृहस्थलिंगानि बहुप्रकाराणि गृहीत्वा वदंति मूढा । किं वदंति ? इदं द्रव्यमयलिंगमेव मुक्तिकारणं । कथंभूताः संतः ? रागादिविकल्पोपाधिरहितं परमसमाधिरूपं भावलिंगमजानंतः । ण य होदि मोक्खमग्गो लिंगं भावलिंगरहितं द्रव्यलिंगं कर्तृ मोक्षमार्गो न भवति कस्मात् ? इति चेत्—ज यस्मात्कारणात् देहणिम्ममा अरिहा अर्हंतो भगवंतो देहनिर्ममाः संतः किं कुर्वंति ? लिंगं मुइत्तु लिंगाधारं यच्छरीरं तस्य शरीरस्य ममत्वं मनोवचनकायैर्मुक्त्वा । पश्चात् दंसणणाणचरित्ताणि सेवंते सम्यग्दर्शनज्ञानचारित्राणि तानि सेवंते भावयंतीत्यर्थः ।

अथैतदेव व्याख्यानं विशेषेण दृढयति ।

आत्मख्यातिः—केचिद्द्रव्यलिंगमज्ञानेन मोक्षमार्गं मन्यमानाः संतो मोहेन द्रव्यलिंगमेवोपाददते । तदनुपपन्नं सर्वेषामेव भगवतामर्हद्देवानां शुद्धज्ञानमयत्वे सति द्रव्यलिंगाश्रयभूतशरीरममकारत्यागात् । तदाश्रितद्रव्यलिंगत्यागेन दर्शनज्ञानचारित्राणां मोक्षमार्गत्वेनोपासनस्य दर्शनात् ।

अथैतदेव साधयति

णवि एस मोक्खमग्गो पाखंडी गिहमयाणि लिंगाणि ।
दंसणणाणचरित्ताणि मोक्खमग्गं जिणा विंति ॥ ४४० ॥

नाप्येष मोक्षमार्गः पाखंडिगृहमयानि लिंगानि ।
दर्शनज्ञानचारित्राणि मोक्षमार्गं जिना वदंति ॥ ४४० ॥

तात्पर्यवृत्तिः—णवि एस मोक्खमग्गो नैव मोक्षमार्गः । एष कः ? पाखंडिगिहमयाणि लिंगाणि निर्विकल्पसमाधिरूपभावलिंगनिरपेक्षाणि रहितानि यानि पाखंडिगृहिमयानि द्रव्यलिंगानि । कथंभूतानि ? निर्ग्रंथकौपीनग्रहणरूपाणि बहिरंगाकारचिह्नानि । तर्हि को मोक्षमार्गः ? इति चेत् दंसणणाणचरित्ताणि मोक्खमग्गं जिणा विंति शुद्धबुद्धैकस्वभाव एव परमात्मतत्त्वश्रद्धानज्ञानानुभूतिरूपाणि सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गं जिना वदंति कथयंति ।

यत एव—

आत्मख्यातिः—न खलु द्रव्यलिंगं मोक्षमार्गः शरीराश्रितत्वे सति परद्रव्यत्वात् । तस्माद्दर्शनज्ञानचारित्राण्येव मोक्षमार्गः, आत्माश्रितत्वे सति स्वद्रव्यत्वात् ।

यत एव—

जह्मा जहित्तु लिंगे सागारणगारि एहिं वा गहिदे ।
दंसणणाणचरित्ते अप्पाणं जुंज मोक्खपहे ॥ ४४१ ॥

तस्मात्तु हित्वा लिंगानि सागारैरनगारिकैर्वा गृहीतानि ।
दर्शनज्ञानचारित्रे आत्मानं युंक्ष्व मोक्षपथे ॥ ४४१ ॥

तात्पर्यवृत्तिः—तह्मा जहित्तु लिंगे सागारणगारि एहिं वा गहिदे यस्मात्पूर्वोक्तप्रकारेण सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गं जिना प्रतिपादयंति तस्मात्त्यक्त्वा कानि निर्विकारस्वसंवेदनरूपभाव

...इति मानमनादरौ मगृह्य -गृहीतानि बहिरंगावस्थाद्रव्यलिंगानि। पश्चात् किं कुरु? दर्शनज्ञानचारित्र अप्पाण मुंज मोक्खपहे हे भव्य ! आत्मानं योजय स्वशुद्धात्मभावनायनतचतुष्टयसम्यग्दर्शनज्ञानानुचरणरूपाभेदरत्नत्रयस्वरूपे मोक्षमार्गे।

अथ निश्चयरत्नत्रयात्मक शुद्धात्मानुभूतिलक्षणो मोक्षमार्गो यः पुरुषः सेवितव्य इत्युपदिशति—

आत्मख्याति यतो द्रव्यलिंगे न मोक्षमार्गः, ततः समस्तमपि द्रव्यलिंगं त्यक्त्वा दर्शनज्ञानचारित्रेष्वेव मोक्षमार्गत्वात् आत्मा योक्तव्य इति सूत्रानुमतिः।

दर्शनज्ञानचारित्रत्रयात्मा तत्त्वमात्मनः।
एक एव सदा सेव्यो मोक्षमार्गो मुमुक्षुणा ॥१२५॥

मुक्खपहे अप्पाणं ठवेहि वेदयदि झायहि तं चेव।
तत्थेव विहर णिच्चं माविरहसु अण्णदव्वेसु ॥ ४४२ ॥

मोक्षपथे आत्मानं स्थापय वेदय ध्याय हि तं चैव।
तत्रैव विहर नित्यं मा विहार्षीरन्यद्रव्येषु ॥ ४४२ ॥

तात्पर्यवृत्तिः-मोक्खपहे अप्पाणं ठवेहि हे भव्य ! आत्मानं स्थापय क? शुद्धज्ञानदर्शनस्वभावनतसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयस्वरूपे मोक्षपथे। वेदयहि तमेव मोक्षपथं चेतयस्व परमसमरसीभावेन अनुभवस्व झायहि तं चेव तमेव ध्याय निर्विकल्पसमाधौ स्थित्वा भावय। तत्थेव विहर णिच्चं तत्रैव विहर वर्तनापरिणतिं कुरु। नित्यं सर्वकालं। माविहरसु अण्णदव्वेसु दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादिपरद्रव्यालंबनोत्पन्नशुभाशुभसंकल्पविकल्पेषु मा विहार्षीः, मा गच्छ मा परिणतिं कुर्विति।

अथ सहजशुद्धपरमात्मानुभूतिलक्षणभावलिंगरहिता ये द्रव्यलिंगे ममतां कुर्वंति तेऽद्यापि समयसारं न जानंतीति प्रकाशयति—

आत्मख्याति —आ संसारात्परद्रव्ये रागद्वेषादौ नित्यमेव स्वप्रज्ञादोषेणावतिष्ठमानमपि स्वप्रज्ञागुणेनैव ततो व्यावर्त्य दर्शनज्ञानचारित्रेषु नित्यमेवावस्थापयति निश्चितमात्मानं। तथा चिंतांतरनिरोधेनात्यंतमेकाग्रो भूत्वा दर्शनज्ञानचारित्राण्येव ध्यायस्व। तथा सकलकर्मकर्मफलचेतनासंन्यासेन शुद्धज्ञानचेतनामयो भूत्वा दर्शनज्ञानचारित्राण्येव चेतयस्व। तथा द्रव्यस्वभाववशतः प्रतिक्षणविजृंभमाणपरिणामतया तन्मयपरिणामो भूत्वा दर्शनज्ञानचारित्रेष्वेव विहर। तथा ज्ञानरूपमेकमेवाचलितमवलंबमानो ज्ञेयरूपेणोपाधितया सर्वत एव प्रधावत्स्वपि परद्रव्येषु सर्वेष्वपि मनागपि मा विहार्षीः।

एको मोक्षपथो य एष नियतो दृग्ज्ञप्तिवृत्त्यात्मकस्तत्रैव स्थितिमेति यस्तमनिशं ध्यायेच्च तं चेतति।
तस्मिन्नेव निरंतरं विहरति द्रव्यांतराण्यस्पृशन् सोऽवश्यं समयस्य सारमचिरान्नित्योदयं विंदति ॥१२६॥
ये त्वेनं परिहृत्य संवृतिपथप्रस्थापितेनात्मना लिंगे द्रव्यमये वहंति ममतां तत्त्वावबोधच्युताः।
नित्योद्योतमखंडमेकमतुलालोकं स्वभावप्रभाप्राग्भारं समयस्य सारममलं नाद्यापि पश्यंति ते ॥१२७॥

पाखंडियलिंगेसु व गिहलिंगेसु व बहुप्पयारेसु।
कुव्वंति जे ममत्तिं तेहिं ण णादं समयसारं ॥ ४४३ ॥

पाखंडिलिंगेषु वा गृहिलिंगेषु वा बहुप्रकारेषु।
कुर्वंति ये ममतां तैर्न ज्ञातः समयसारः ॥ ४४३ ॥

---

१ तत्त्वज्ञानवर्जिता इत्यर्थः।

अलमलमतिजल्पैर्दुर्विकल्पैरनल्पैरयमिह परमार्थश्चित्यतां नित्यमेकः ।
स्वरसविसरपूर्णज्ञानविस्फूर्तिमात्रान्न खलु समयसारादुत्तरं किंचिदस्ति ॥ १२९ ॥

इदमेकं जगच्चक्षुरक्षयं याति पूर्णतां ।
विज्ञानघनमानंदमयमध्यक्षतां नयत् ॥१३०॥

जो समयपाहुडमिणं पठिदूणय अच्छतच्चदो णादुं ।
अच्छे ठाहिदि चेदा सो पावदि उत्तमं सुक्खं ॥४४५॥

यः समयसारप्राभृतमिदं पठित्वा अर्थतत्त्वतो ज्ञात्वा ।
अर्थे स्थास्यति चेतयिता स प्राप्नोत्युत्तमं सौख्यं ॥४४५॥

तात्पर्यवृत्तिः—श्री कुंदकुंदाचार्यदेवाः समयसारग्रंथसमाप्तिं कुर्वंतः फलं दर्शयंति-तद्यथा-**जो समयपाहुणमिण पठिदूणय** यः कर्ता समयप्राभृताख्यमिदं शास्त्रं पूर्वं पठित्वा न केवलं पठित्वा **अत्थतच्चदो णादु** ज्ञात्वा च कस्मात्? ग्रंथार्थतः न केवलं ग्रंथार्थतः ? तत्त्वतो भावपूर्वेण **अत्थ ठाहिदि** पश्चादुपादेयरूपे शुद्धात्मलक्षणेऽर्थे निर्विकल्पसमाधौ स्थास्यति **चेदा सो पावदि उत्तम सोक्खं** स चेतयितात्मा भाविकाले प्राप्नोति लभते। किं लभते? वीतरागसहजापूर्वपरमाह्लादरूपं आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वंद्वभावं अन्यद्रव्यानपेक्षं निरुपमं, अमितं, शाश्वतं सर्वकालमुत्कृष्टानंतसारं परमसुखं सिद्धस्य जातमिति।

अत्राह शिष्यः—हे भगवन्! अतींद्रियसुखं निरंतरं व्याख्यातं भवद्भिस्तच्च जनैर्न ज्ञायते? भगवानाह कोऽपि देवदत्तः स्त्रीसेवनादिप्रभृतिपंचेंद्रियविषयव्यापाररहितप्रस्तावे निर्व्याकुलचित्तः, तिष्ठति स केनापि पृष्टः भो देवदत्त! सुखेन तिष्ठसि त्वमिति? तेनोक्तं सुखमस्तीति तत्सुखमतींद्रियं कस्मात्? इति चेत् संसारिसुखं पंचेंद्रियप्रभवं। यत्पुनरतींद्रियसुखं तत्पंचेंद्रियविषयव्यापाराभावेऽपि दृष्टं यत इदं तावत् सामान्येनातींद्रियसुखमुपलभ्यते। यत्पुनः पंचेंद्रियमनोजनितसमस्तविकल्पजालरहितानां समाधिस्थपरमयोगिनां स्वसंवेदनगम्यमतींद्रियसुखं तद्विशेषेणेति। यच्च मुक्तात्मनामतींद्रियसुखं तदनुमानगम्यमागम्यं च। तथाहि—मुक्तात्मनामिंद्रियविषयव्यापाराभावेऽपि अतींद्रियसुखमस्तीति पक्षः। कस्मात्? इति चेत् इदानीं तन विषयव्यापारातीतनिर्विकल्पसमाधिरतपरममुनींद्राणां स्वसंवेद्यात्मसुखोपलब्धिरिति हेतुः। एवं पक्षहेतुरूपेण द्व्यंगमनुमानं ज्ञातव्यं। आगमं तु प्रसिद्धमात्मोपादानसिद्धमित्यादि वचनेन। अतः कारणात् अतींद्रियसुखे संदेहो न कर्तव्य इति। उक्तं च—

यदेवमनुजाः सर्वे सौख्यमक्षार्थसंभवं।
निर्विशंति निराबाधं सर्वाक्षप्रीणनक्षमं ॥ १ ॥
सर्वेणातीतकालेन यच्च भुक्तं महर्द्धिकं।
भाविनो यच्च भोक्ष्यंति स्वादिष्टं स्वांतरंजकं ॥ २ ॥
अनंतगुणितं तस्मादत्यक्षं स्वस्वभावजं।
एकस्मिन् समये भुंक्ते तत्सुखं परमेश्वरः ॥ ३ ॥

एवं पूर्वोक्तक्रमेण विष्णुकर्तृत्वनिराकरणमुख्यत्वेन गाथासप्तकं। तदनंतरमन्यः करोति अन्यो भुंक्ते इत्येकांतनिराकरणमुख्यत्वेन गाथाचतुष्टयं। ततः परमात्मा रागादिभावकर्म न करोतीति सांख्यैकांतनिराकरणमुख्यत्वेन सूत्रत्रयं। ततः परं कर्मैव सुखादिकं करोति न चात्मेति पुनरपि सांख्यैकांतनिराकरणमुख्यत्वेन गाथात्रयोदश। तदनंतरं चित्तस्थरागस्य घातः कर्तव्य इत्यज्ञानिवारा

इति कथनरूपेण सूत्रदशकं । तदनंतरं शुद्धात्मोपलब्धिरूपनिश्चयप्रतिक्रमणप्रत्याख्यानालोचनाचारित्र[illegible]नमुख्यत्वेन सूत्रचतुष्टयं । तदनंतरं पंचेंद्रियविषयनिरोधकथनरूपेण सूत्रदशकं । तदनंतरं कर्म[illegible]चेतनाकर्मफलचेतनाव्याख्यानरूपेण मुख्यत्वेन गाथात्रयं । ततः परं शास्त्रेंद्रियविषयादिकं ज्ञानं न भवतीति प्रतिपादनरूपेण गाथापंचदश । ततः परं शुद्धात्मा कर्मनोकर्माहारादिकं निश्चयेन न गृह्णाति इति [illegible]मुख्यत्वेन गाथात्रयं । तदनंतरं शुद्धात्मभावनारहितं [illegible] द्रव्यलिंगं मुक्तिकारणं न भवतीति प्रतिपादनमुख्यत्वेन गाथासप्तकं । तदनंतरं शुद्धस्वरूप[illegible]मुख्यत्वेन सूत्रमेकं ।

इति समयसारव्याख्यायां शुद्धात्मानुभूतिलक्षणायां तात्पर्यवृत्तौ समुदायेन पंचाधिकनवतिगाथाभिरष्टमोऽधिकारः समयसार—

चूलिकाभिधाना दशमोऽधिकारः समाप्तः —

आत्मख्यातिः—य एव समयसारभूतस्य भगवतः परमात्मनोऽस्य विश्वप्रकाशकत्वेन विश्वसमयस्य प्रतिपादनात् स्वयं शब्दब्रह्मायमाणं शास्त्रमिदमधीत्य विश्वप्रकाशनक्षमपरमार्थभूतचित्प्रकाशरूपमात्मानं निश्चिन्वन् अर्थतस्तत्त्वतश्च परिच्छिद्य अस्यैवार्थभूते भगवति एकस्मिन् पूर्णविज्ञानघने परमब्रह्मणि सर्वारंभेण स्थास्यति चेतयिता, स साक्षात्तत्क्षणविजृम्भमाणचिदेकरसनिर्भरस्वभावसुस्थितनिराकुलात्मरूपतया परमानंदशब्दवाच्यमुत्तममनाकुलत्वलक्षणं सौख्यं स्वयमेव भविष्यतीति ।

इतीदमात्मनस्तत्त्वं ज्ञानमात्रमवस्थितं ।
अखंडमेकमचलं स्वसंवेद्यमबाधितं ॥११॥

तात्पर्यवृत्तिः—

अत्र स्याद्वादसिद्ध्यर्थं वस्तुतत्त्वव्यवस्थितिः ।
उपायोपेयभावश्च मनाग्भूयोऽपि चिन्त्यते ॥

चिन्त्यते विचार्यते कथ्यते मनाक् संक्षेपेण भूयः पुनरपि [illegible] वस्तुतत्त्वव्यवस्थितिः [illegible] वस्तुतत्त्वव्यवस्थितिर्व्यवस्था । किमर्थं । स्याद्वादशुद्ध्यर्थं [illegible] व्याख्याने समाप्ते [illegible] केवलं वस्तुतत्त्वव्यवस्थितिर्विचार्यते । [illegible] उपायोपेय[illegible] इति ।

अथ स्याद्वादशब्दार्थः कः ?—इति प्रश्ने [illegible] — [illegible] सर्वथैकान्तरूपेण वदनं वादो जल्पः कथनं प्रतिपादनमिति [illegible]

[illegible] शासनमिदं । [illegible]

[illegible] इति [illegible]

[illegible]

अलमलमतिजल्पैर्दुर्विकल्पैरनल्पैरयमिह परमार्थश्चिन्त्यतां नित्यमेकः ।
स्वरसविसरपूर्णज्ञानविस्फूर्तिमात्रान्न खलु समयसारादुत्तरं किंचिदस्ति ॥ १२९ ॥
इदमेकं जगच्चक्षुरक्षयं याति पूर्णताम् ।
विज्ञानघनमानन्दमयमध्यक्षतां नयत् ॥१३०॥

जो समयपाहुडमिणं पठिदूणय अच्छतच्चदो णादुं ।
अच्छे ठाहिदि चेदा सो पावदि उत्तमं सुक्खं ॥१४५॥

यः समयसारप्राभृतमिदं पठित्वा अर्थतत्त्वतो ज्ञात्वा ।
अर्थे स्थास्यति चेतयिता स प्राप्नोत्युत्तमं सौख्यं ॥४४५॥

तात्पर्यवृत्तिः—श्री कुंदकुंदाचार्यदेवाः समयसारग्रंथसमाप्तिं कुर्वंतः फलं दर्शयंति-तद्यथा- **जो समयपाहुणमिणं पठिदूणय** यः कर्ता समयप्राभृताख्यमिदं शास्त्रं पूर्वं पठित्वा न केवलं पठित्वा **अत्थ तच्चदो णादुं** ज्ञात्वा च कस्मात् ? यथार्थतः न केवलं यथार्थतः ? तत्त्वतः भावपूर्वेण **अत्थे ठाहिदि** पश्चात्पादेयरूपे शुद्धात्मलक्षणेऽर्थे निर्विकल्पसमाधौ स्थास्यति **चेदा सो पावदि उत्तमं सोक्खं** स चेतयितात्मा भाविकाले प्राप्नोति लभते । किं लभते ? वीतरागसहजापूर्वपरमाह्लादरूपं आत्मोपादानसिद्धं स्वयमतिशयवद्बाधारहितं विशालवृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वंद्वभावं अन्यद्रव्यानपेक्षं निरुपमं, अमितं, शाश्वतं सर्वकालमुत्कृष्टानंतसारं परमसुखं सिद्धस्य जातमिति ।

अत्राह शिष्यः—हे भगवन् ! अतींद्रियसुखं निरंतरं व्याख्यातं भवद्भिस्तच्च जनैन ज्ञायते ? भगवानाह कोऽपि देवदत्तः स्त्रीसेवनादिप्रभृतिपंचेंद्रियविषयव्यापाररहितप्रस्तावे निर्व्याकुलचित्तः, तिष्ठति स केनापि पृष्टः भो देवदत्त ! सुखेन तिष्ठसि त्वमिति ? तेनोक्तं सुखमस्तीति तत्सुखमतींद्रियं कस्मात् ? इति चेत् समारंभसुखं पंचेंद्रियप्रभवं । यत्पुनरतींद्रियसुखं तत्पंचेंद्रियविषयव्यापाराभावेऽपि दृष्टं यत इदं तावत्सामान्येनातींद्रियसुखमुपलभ्यते । यत्पुनः पंचेंद्रियमनोभवसमस्तविकल्पजालरहितानां समाधिस्थपरमयोगिनां स्वसंवेदनगम्यमतींद्रियसुखं तद्विशेषेणेति । यच्च मुक्तात्मनामतींद्रियसुखं तदनुमानगम्यमागम्यं च । तथाहि—मुक्तात्मनामिंद्रियविषयव्यापाराभावेऽपि अतींद्रियसुखमस्तीति पक्षः । कस्मात् ? इति चेत् इदानीं तनविषयव्यापारातीतनिर्विकल्पसमाधिरतपरममुनींद्राणां स्वसंवेद्यमानसुखोपलब्धेरिति हेतुः । एवं पक्षहेतुरूपेण द्व्यंगमनुमानं ज्ञातव्यं । आगमं तु प्रसिद्धमेवात्मोपादानसिद्धमित्यादि वचनेन । अतः कारणात् अतींद्रियसुखे संदेहो न कर्तव्य इति । उक्तंच—

> यदेवमनुजाः सर्वे सौख्यमक्षार्थसंभवं ।
> निर्विशंति निराबाधं सर्वाक्षप्रीणनक्षमं ॥ १ ॥
> सर्वेणातीतकालेन यच्च भुक्तं महर्द्धिकं ।
> भाविनो यच्च भोक्ष्यंति स्वादिष्टं स्वांतरंजकं ॥ २ ॥
> अनंतगुणितं तस्मादत्यक्षं स्वस्वभावजं ।
> एकस्मिन् समये भुंक्ते तत्सुखं परमेश्वरः ॥ ३ ॥

एवं पूर्वोक्तप्रकारेण विशुद्धपूर्णज्ञानाधिकारचूलिकाव्याख्यानमुख्यत्वेन गाथासप्तकं । तदनंतरमेवं करोति अन्योऽयं—अत्र बंधनस्य कारणमुख्यत्वेन गाथाचतुष्टयं । ततः परमात्मा रागादिभावकर्म न करोति इति व्याख्यानमुख्यत्वेन सूत्रपंचकं । ततः परं कर्म सुखादिकं करोति न चात्मेति पुनरपि व्याख्यानमुख्यत्वेन गाथासप्तकं । तदनंतरं चित्तस्थरागस्य घातः कर्तव्य-इत्यज्ञानस्य निराकरणमुख्यत्वेन ४५ गाथाः चिंतयति तत्रगाथाः गाथासप्तकं । तदनंतरं द्रव्यस्य स्वरूपं दर्शनं निश्चयेन दर्शनं निरूपणमुख्यत्वेन गाथासप्तकं । ततः परं ज्ञानं ज्ञेयरूपेण न परिणमति

इति ... [illegible] ... ।

[illegible]

... सूत्रम् ॥१२॥

अत्र स्याद्वादसिद्धयर्थं वस्तुतत्त्वव्यवस्थितिः ।
[illegible] ... विचित्र ॥

[illegible]

... स्यात्कथंचित् विवक्षित ... [illegible]

[illegible]

ज्ञानक्रियानयपरस्परतीव्रमैत्रीपात्रीकृतः श्रयति भूमिमिमां स एकः ॥ १३१ ॥
चित्पिण्डचण्डिमविलासिविकासहासः शुद्धप्रकाशभरनिर्भरसुप्रभातः ।
आनन्दसुस्थितसदास्खलितैकरूपस्तस्यैव चायमुदयत्यचलार्चिरात्मा ॥ १३२ ॥
स्याद्वाददीपितलसन्महसि प्रकाशे शुद्धस्वभावमहिमन्युदिते मयीति ।
किं बन्धमोक्षपथपातिभिरन्यभावैर्नित्योदयः परमयं स्फुरतु स्वभावः ॥ १३३ ॥
चित्रात्मशक्तिसमुदायमयोऽयमात्मा सद्यः प्रणश्यति नयेक्षणखण्ड्यमानः ।
तस्मादखण्डमनिराकृतखण्डमेकमेकान्तशान्तमचलं चिदहं महोऽस्मि ॥ १३४ ॥
न द्रव्येण खण्डयामि । न क्षेत्रेण खण्डयामि । न भावेन खण्डयामि । सुविशुद्ध एको ज्ञानमात्रो [illegible]
योऽयं भावो ज्ञानमात्रोऽहमस्मि ज्ञेयो ज्ञेय ज्ञानमात्रः स नैव ।
ज्ञेयो ज्ञेयज्ञानकल्लोलवल्गन् ज्ञानज्ञेयज्ञातृमद्वस्तुमात्रः ॥ १३५ ॥
क्वचिल्लसति मेचकं क्वचिन्मेचकामेचकं क्वचित्पुनरमेचकं सहजमेव तत्त्वं मम ।
तथापि न विमोहयत्यमलमेधसां तन्मनः परस्परसुसंहतप्रकटशक्तिचक्रं स्फुरत् ॥ १३६ ॥
इतो गतमनेकतां दधदितः सदाप्येकतामितः क्षणविभङ्गुरं ध्रुवमितः सदैवोदयात् ।
इतः परमविस्तृतं धृतमितः प्रदेशैर्निजैरहो सहजमात्मनस्तदिदमद्भुतं वैभवम् ॥ १३७ ॥
कषायकलिरेकतः स्खलति शान्तिरस्त्येकतो भवोपहतिरेकतः स्पृशति मुक्तिरप्येकतः ।
जगत्त्रितयमेकतः स्फुरति चिच्चकास्त्येकतः स्वभावमहिमात्मनो विजयतेऽद्भुतादद्भुतः ॥ १३८ ॥
जयति सहजपुञ्जः पुञ्जमज्जत्त्रिलोकीस्खलदखिलविकल्पोऽप्येक एव स्वरूपः ।
स्वरसविसरपूर्णाच्छिन्नतत्त्वोपलम्भः प्रसभनियमितार्चिश्चिच्चमत्कार एषः ॥ १३९ ॥
अविचलितचिदात्मन्यात्मनात्मानमात्मन्यनवरतनिमग्नं धारयद्ध्वस्तमोहम् ।
उदितममृतचन्द्रज्योतिरेतत्समन्ताज्ज्वलतु विमलपूर्णं निःसपत्नस्वभावम् ॥ १४० ॥
मुक्तामुक्तैकरूपो यः कर्मभिः संविदादितः ।
अक्षयं परमात्मानं ज्ञानमूर्तिं नमाम्यहम् ॥ १४१ ॥

अथ द्रव्यस्यादेशवशेनोक्ता सप्तभङ्गी प्रवर्तयाम —

स्यादस्ति द्रव्यं १ स्यान्नास्ति द्रव्यं २ स्यादस्ति नास्ति च द्रव्यं ३ स्यादवक्तव्यं द्रव्यं ४ स्यादस्ति चावक्तव्यं च द्रव्यं ५ स्यान्नास्ति चावक्तव्यं च द्रव्यं ६ स्यादस्ति च नास्ति चावक्तव्यं च [illegible] अत्र सर्वथात्वनिषेधको नैकान्तद्योतकः कथंचिदर्थे स्याच्छब्दो निपातः । [illegible] एवास्ति द्रव्यं । परद्रव्यक्षेत्रकालभावैरादिष्टं नास्ति द्रव्यं । स्वद्रव्यक्षेत्रकालभावैः [illegible] द्रव्यं । स्वद्रव्यक्षेत्रकालभावैः परद्रव्यक्षेत्रकालभावैश्च युगपदादिष्टमवक्तव्यं द्रव्यं [illegible] द्रव्यक्षेत्रकालभावैश्चादिष्टमस्ति चावक्तव्यं द्रव्यं । परद्रव्यक्षेत्रकालभावैः युगपत् [illegible] श्चादिष्टं नास्ति चावक्तव्यं द्रव्यं । स्वद्रव्यक्षेत्रकालभावैः परद्रव्यक्षेत्रकालभावैश्च युगपत् [illegible] श्चादिष्टमस्ति च नास्ति चावक्तव्यं च द्रव्यमिति । इति सप्तभङ्गी समाप्ता ।

इति समयसारव्याख्यायामात्मख्यातौ नवमोऽङ्कः ।

[illegible]
[illegible]
[illegible] ॥ १४२ ॥
[illegible]
[illegible]